ततुदत्तं ज्ञात एव अपरस्तनीत्युक्तत्वात् एतच्चन केषांचिद्विरुद्धं यदितु अविभक्तः कश्चित्तु सर्व
मेव ददाति न दातुं तु तरां तदाह ॥०॥ बृहस्पतिः ॥०॥ विभक्ता अविभक्ता वा दायादाः स्थावरे स
माः एकोऽह्यनीशः सर्वत्र दानाधमनविक्रये दायादाः पुत्राद्य इति रत्नाकरः ॥ अत्र विभक्तान
मनीशत्वकथनं दानस्यासिद्ध्यर्थं अस्वामिकृतत्वात् स्थावर इत्युपलक्षणं मण्यादानपितुल्या
यात् जीमूतवाहनादयस्तु विभक्तानामपि स्वकीयभागे भ्रातृन्तरभागे च स्थावरे दानादावनी
शत्वं तस्मात् भ्रात्रन्तरानुमतिं विना स्वांशमपि स्थावरं दातुं नार्हतीति अत्र वीजं दुर्वृत्तपुरु
षगोचरदानविक्रयादिना भ्रात्रन्तरपीडनात् पापं अत्र न दानासिद्धिरित्याहुः पूर्वमते सर्व
स्येति किमर्थं स्वांशस्यादेयत्वस्य रत्नाकरकृतोक्त प्रायत्वात् तथाहि यतस्तेन विभक्तानामे
व स्वांशदानमनुमतं अतोऽविभक्तानां तदनुमतमिति लक्ष्यते इति चेदुच्यते सर्वस्य दानेम
हान् प्रत्यवायः स्वांशयोग्यदाने तु अल्प एवेति स्ववुध्याधिकमाकलनीयं अत्र मिश्राः।
यत्तु स्वग्रामज्ञातिसामन्तदायादानुमतेन तु। हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी। इति
तत्वग्रामस्वदायादज्ञात्यनुमतिर्दानप्रकाशार्थं सामन्तानुमतिः सीमाविवादनिरासाय हिर
ण्योदकदानं तु स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञयेत्यादि निषेधात् भूमिं यः प्रतिगृ
ह्णाति भूमिं यश्च प्रयच्छति। उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ॥ इत्यादि भूमिदान
प्रशंसादर्शनाच्च विक्रयेऽपि कर्तव्ये हिरण्यमुदकं च दत्वा दानरूपेणैव विक्रयः कार्य इत्येत
त्परमित्याहुः दानप्रकाशार्थं अन्यथा उत्तरकालं दायादा विवदेरन् दायादाश्च पुत्रा
दयो दौहित्रादयश्च उत्तराधिकारिणः स्वग्रामज्ञात्योः साक्षित्वार्थं प्रकाश इति भावः स्था
वरे विक्रयो नास्तीति वाक्यं विक्रयनिषेधपरं तेन तत्करणे प्रत्यवाय एव वोध्यते न तु वि
क्रयासिद्धिपरं स्वमीच्छया स्वत्वनाशस्य दान इव विक्रयेऽपि तुल्यत्वात् शतशो व्यवहार
दर्शनाच्च न च षड्भिर्गच्छति मेदिनीति वचनेन षट्विना मेदिनीस्वत्वनाशाभावो वोध्यतेऽ
न्यथा मेदिनीत्यस्य वैयर्थ्यात् एवं च हिरण्योदकदानाभावे मेदिनीविक्रयो मासिद्ध्यतु
दृश्यमानव्यवहारश्च शास्त्रविरुद्ध एवेति वाच्यं मण्यादाविव स्वत्वनाशक्रियया विक्रये
ण मेदिन्यां स्वत्वनाशस्य कल्पकाभावात् षड्भिरिति नियमस्तु न कल्पकः हिरण्योदक
दानस्य दान इव विक्रयेऽपि अतिरिक्तांगत्वकल्पने श्चत्यभावात् नन्वत्र मास्तु दानं हिर
ण्योदकदानं विना विक्रयोऽपि न सिद्ध्येत् न चांगासिद्धावपि प्रधानसिद्धिरिति वाच्यं विक्र
यस्य लौकिककर्मणः अंगत्वासंभवात् हिरण्योदकदानस्य इति चेद ये केचित् जाता ये
प्यजाता वापि च गर्भे व्यवस्थिताः। वृत्तिं तेऽपि हि कांक्षन्ति वृत्तिलोपो विगर्हितः इति वचनेन
स्थावरस्य वृत्तिपरिभाषितस्य विक्रयादेरति निषिद्धत्वात् तत्करणे अतिद्वेष्टेहिकानिष्ट
संभावनातश्च कदाचिदयं मिथ्याविक्रयं यथा जेन धनं गृह्णातीति शंकया विक्रयदार्ढ्यार्थं हिर १२२

एयसहभावेनदानंजलत्यागश्चउक्तः अन्यथाग्रामस्थलोकानामनुमतिंविनाकिमियंभूरस्य
भवतुइतीच्छानजायतएवजायमानापिवास्वत्वं ननाशयितुमीष्टेवस्तुतोजातोपिस्वत्वनाशः
विक्रेतुःर्लोभाभिभूतत्वेननप्रमीयितमध्यस्थैरितिएवंचज्ञातिसाक्षिद्वाराक्रियाप्रामाण्येपि
मयाच्छलेनसाक्रियाकृताइतिविवादनिवृत्त्यर्थमेवहिरण्यदानंउदकत्यागश्चउदकत्यागं
विनाविक्रेतुश्छलवादेविक्रयासिद्धिः सन्दिह्यतेइतिविक्रयस्तुतदिच्छामात्रेणभवतीतितु
निग्रत्यूहमेवतत्प्रामाण्यार्थंन्तुषड्भिर्गच्छतिमेदिनीतिध्येयमितिकल्पयन्ति एकोपिस्थाव
रेकुर्य्यादानाधमनविक्रयं आपत्कालेकुटुम्बार्थेधर्म्मार्थेतुविशेषतः धर्मार्थेसाधारणध
र्म्मार्थेएषुविषयेषुअनिषिद्धमितिभावः स्थावरंनिवंधःद्विपदश्चएकव्यवस्थाविषयः ॥
स्थावरंद्विपदचैवयद्यपिस्वयमर्जितं ॥असंभूयसुतान्सर्वान्नदानंनचविक्रयः॥स्वार्जितस्यापि
स्थावरस्यपरिभाषितवृत्तित्वंअत्रवीजंतथाचवृत्तिभुजांअनुमत्यावृत्तिलोपोनदोषायेतिभावः॥
यत्तुविभक्तानामपिस्थावरविक्रयेषुवृत्तपुरुषगोचरेपिज्ञातीनांनिषेधव्यवहारनैरत्तत्रमूलंवि
भक्ताअविभक्तावादायादाःस्थावरेसमाःनैकोह्यनीशःसर्वस्यदानाधमनविक्रये इतिव
चनंतत्रसर्वस्यस्वकीयस्यभ्रात्रंतरीयस्यचइत्यर्थः व्यवहरंतिअन्यस्यभ्रात्रादेरेवमूल्यंदत्वाक्र
यंतस्मात्तत्रयुक्त्यभावेपि वचनवलात् विभक्ताविभक्तभ्रात्रनुमतिंविनाविभक्तमपिस्थावरंन
विक्रेयमितिकश्चित् केचित्तु तद्युक्तमेववस्तुतस्तत्रतदननुमतौदानादिसिद्धिः यदिच
स्थावरार्जकसंतानः तत्स्थावरक्रीणातितदान्योनक्रिणीयात् मूल्यंतुयथार्थमेवदातव्यं
किंतुत्वदनुमत्यैवपूर्वक्रयेसिद्धेऽस्यद्वितीयःक्रयोनसिद्ध्यतीतिदिशेयं ॥नानामतव्याख्याने
नस्फुटीकरणायपुनर्विभक्तजविभागोलिख्यतेतत्र ॥०॥ मनुः॥ऊर्द्ध्वंविभागाज्जातस्तुपि
त्र्यमेवहरेद्धनं संसृष्टास्तेनवायेस्युर्विभजेतसतैःसह ।पित्रासहविभक्तेषुपुत्रेषुपश्चा
ज्जातोमृतेपितरिपित्र्यंशंसर्वंहरेत् जीवतःपितुःपुनर्विभागेच्छायांपित्र्यधनादेवांशंप्रा
प्नुयान्नतुपूर्वविभक्तभ्रात्रंशादपिएवकारेणैतत्द्योत्यते इतिरत्नाकराशयः ॥मिश्रा
अप्येवंतेतुपुनराहुः स्वपिताचेत्स्वभ्रात्रास्वपुत्रेणवासहसंसृष्टीभूतःततःप्रमीतः
तदाविभक्तजःपितुरंशंततोलभतेइतिवाक्यार्थइति ॥ वृहस्पतिः ॥पित्रासहविभ
क्तायेसापत्नावासहोदराः जघन्यजाश्चयेतेषांपितृभागहरास्तुते ॥ अनीशःपूर्वजः
पित्र्येभ्रातृभागेविभक्तजः पूर्वजोविभागपूर्वजःविभक्तइतियावत् असौपितृभागे
ऽनीशःविभक्तपितृजातोभातृभागेऽनीशइत्यर्थः॥इतिरत्नाकरः अनीशःपूर्वजःवि
भक्तजस्तत्त्वज्ञेयः॥जीवनापित्रागृहीतभागेव्यवस्थामुक्त्वाविभक्तेनपित्रार्जितेव्यवस्था
माह ॥पुत्रैःसहविभक्तेनपित्रायत्स्वयमर्जितं ॥विभक्तजस्यतत्स्यतत्सर्वमनीशाःपू
र्वजाःस्मृताः। तत्सर्वमितिपितुर्मरणेजीवतितुतस्यस्वेच्छयास्वयमुपात्तेऽर्थेइतिविष्णु

श्लोकः ३०

सुत्रातृव्यवस्थापैतामहधनपष्टम्भेनापि पित्रार्जिते पितुः स्वेच्छा । विशेषात्तु मिश्रास्तु पैताम
हद्रव्योपष्टम्भेनार्जिते पितुर्न स्वाच्छन्द्यं इत्याहुः ॥ अत्रेदमवधेयं ॥ यत्पुत्रैः सह विभागात्प्र
व्यं पैतामहं धनं विभक्तं न विभागकालेपि तत्र पैतामहधनोक्तैव व्यवस्था कर्तव्या इति रत्नाकरा
दिमते स्मर्तव्यं धनवत्तु ऋणेपि विभागमाह यथा धने तथर्णेपि दानाधानक्रयेषु च ॥ इति आ
धानं बंधकरणं तथा च पुत्रैः सह विभक्तादृणं गृह्णता योबन्धो दत्तः तत्र विभक्तजस्यैव वशीकरणा
दिकमिति भावः ॥ किं विशेषोक्तानिः क्षेपादिषु सर्वेष्वेव विवादपदेषु अयमेवाधिकारीत्यर्थं अय
न्नाह परस्परमनीशास्ते मुक्त्वा शौचोदकक्रियाद् इति ॥ गौतमः ॥ विभक्तजः पित्र्यमेव अत्र वि
वदेत याज्ञवल्क्यवचनं यथा विभक्तेषु सुतो जातः सवर्णायां विभागभाक् दृश्याद्वा तद्विभा
गः स्यादायव्ययविशोधितात् दृश्याद्वेति कल्पांतरं निर्गुणापेक्षया तथा च गुणवान् विभ
क्तजः सर्वस्मादेव दृश्यादृश्यरूपोभयविधधनादेवांशं प्राप्नुयात् गुणहीनस्तु दृश्यादेव
आयव्ययविशोधितादिति उदीच्यवृद्धिरहितात् यद्भ्रातृभिर्भुक्तं तद्रहिताच्च एवं भ्रा
तृकृतमृणं च संशोध्य इति विभागश्चाविभक्तैर्भ्रातृभिस्वस्वभागादाकृष्य पूरणीय इति ह
लायुधः ॥ मिश्रचण्डेश्वरावप्येवं ॥ सवर्णायामिति पितृसवर्णायामित्यर्थः जात इत्यस्य अ
पादानत्वे न पितुरुपस्थितौ तस्य एव सवर्णत्वबोधउचितः ननु पश्चादन्नीयमानवि
भागभागित्यत्र वि भागभागित्यत्र विभागापादानत्वेनोपस्थितस्य भ्रात्रादेः सवर्णत्व
मिति केचित् परे तु सवर्णायां जातः सवर्णेभ्यो विभागभागित्यर्थः तथा च पूर्वविभक्ता ब्रा
ह्मणाः विभक्तजायक्षत्रियायभागं न दद्युश्च क्षत्रियाइत्याहुः अनयोर्मतयोः परमतमानु
भविकमिति विष्णुः पितृविभक्ता विभागानंतरोत्पन्नस्य विभागं दद्युः अत्र भागदाने भ्रा
तृणामेव कर्तृत्वश्रुतेः पितृतोऽशं प्राप्नुयान्नवा इति चेत् पुत्रः पितृतोऽशं लभेतैव य
दि विभक्तः स्यात् भ्रातृणां अदानशंकयैव वचनमिदं इत्यवेहि तथा च विष्णुयाज्ञवल्क्या
भ्यां भ्रातृतो विभागलाभ उक्तः मनुबृहस्पतिगौतमैः भ्रातृतो विभक्तजस्य भागालाभ
उक्त इति विरोधः ॥ अत्र च प्रकाशाकारश्च चण्डेश्वर वाचस्पतिमिश्रशूलपाणयः ॥ विभा
गकाले ऽस्पष्टगर्भस्थितस्य भ्रातृभ्योऽशप्राप्तिः विभागानंतरं गर्भाधानेन उत्पन्नस्य
पित्र्यधनमात्रप्राप्तिरित्याहुः ॥ स्पष्टगर्भायां तु विभाग एव नास्तीति प्रकाशाकारश्च चण्डे
श्वरौ अत्यंतकालासहिष्णुत्वे एकभागस्तदर्थं स्थापयितुं युक्तः यावन्नपत्यास्ता सा
मा पुत्रलाभादिति वशिष्ठोक्तवत् । यदि च तद्गर्भात् कन्या जायते तदा सोंऽशः पश्चात्तैरेव वि
भजनीयः इति बोध्यं एतन्मते पैतामहद्रव्यस्य परेणापहृतस्य विभागानंतरं पित्रा उद्धृत
स्य पितृस्वार्जितवद्विभागदर्शनात् पूर्वविभक्तानां [illegible]ल्वं इति मते विचारः किं तद्द्रव्ये
अपहरणकालेपि सम्बन्धो विद्यते उत न यदि संबंधो विद्यते तदा पूर्वार्जिते तस्मिन् पूर्ववि ११३

मक्तानां मंशोऽस्ति यदि तत्र तदानीं सम्बन्धो नास्ति तदोद्धार एव न स्यात् अथ अपहरणात् स्वा
मिनः स्वत्वं नश्यत्येव परन्तु उद्धारात् पुनः स्वत्वं जायते तच्च स्वत्वं पितुरेवाव्यवहितसन्तानत्वादिति
चेत् पैतामहस्वत्वसम्बंधादेव तत्र स्वत्वमिति पुत्रादेरपि अंशग्राहित्वं युज्यते अत्र समाधा ए
तादृशसूक्ष्मविवेचनानुसरणे विभागात् पूर्वमपि उद्धृते पितुः स्वातन्त्र्यानुपपत्तिः स्यादतः पितु
र्जनकत्वेनाधिक्यमालोच्य इदमेव व्यवस्थेयं यथा विभागानंतरं पित्रोद्धृते पितुरेवाधिकारः न
तु पूर्वविभक्तानां भ्राता केन चिदुद्धृते तु पैतामहं द्रव्यमित्यादियाज्ञवल्क्यात् उद्धर्तुरधिकारः ॥
पितुश्च स्वामिपुत्रत्वादधिकारः यन्मते यत्र तुरीयांशदानं तत्र तुरीयांश उद्धर्तुः तदतिरिक्ते स
र्वेषां भ्रातॄणामधिकारः पिता च तत्रार्द्धहरः पितृद्रव्योपष्टम्भेन पुत्रार्जिते ऽर्द्धहरत्वोक्तेरत्र तन्न्यून
त्वस्यायोग्यत्वात् अधिकस्य चानध्यवसायेन वक्तुमशक्यत्वादिति पितुश्च यत्र यत्र यादृशोऽधिकारः
स्त्वत्र तत्र विभक्तस्यापि पितादृशोऽधिकारः यदि च पुत्रैः सह विभज्य पुत्रान्तरमुत्पाद्य स पिता मृतः
। अनंतरं पैतामहं पूर्वं परैरपहृतं केनचित् भ्रात्रोद्धृतं तत्र कीदृशी व्यवस्थेति चेत् पितुर्मरणानं
न्तरं तद्द्रव्यस्याविभक्तत्वेन सर्वेषां समानस्वत्वे संभाविते अविभक्तोद्धृतवद्व्यवहारो युक्तः न चाविभ
क्तार्जितवत् अविभक्तोद्धृतेपि भागोस्तु विभक्तार्जितवत् विभक्तोद्धृते पित्र्यत्वे किं प्रमाणमिति वाच्यं त
द्वचनस्य अन्येषां निरंशत्वे प्रमाणाभावस्यैवात्र प्रमाणत्वात् न च तद्वचनेऽपहरणेन पूर्वस्वत्वना
शात् अनंतरं उद्धर्तुरेव उद्धारेण स्वत्वं जायत इति केचिदुक्तं युक्तमिति वाच्यं तथा सति अन्यस्या
पि उद्धर्तुः स्वत्वापत्तिः नहि स्वामिनं तत्सन्ततिं वा विना अन्यस्य उद्धृतद्रव्ये स्वत्वं भवतीति वक्तुं यु
ज्यते अनुमतिसत्वे तु उद्धर्तुरेवांशः सर्वसिद्धः अन्येषां उद्धारकांक्षाभावेपि उद्धर्तुरेव इति केषां
चिन्मते ॥ अनुमतिसत्वासत्वे विवेचनामंतरेणैव उद्धर्तृमात्राधिकार इति च चण्डेश्वरमतं यदि
च तादृशस्थले सर्वेषामुद्धाराकांक्षासत्वेपि दैवादेकेनैवोद्धृते विभक्तस्य नांशित्वं अविभक्तोद्धारे
एव अनुद्धर्तॄणामंशकल्पनादित्युच्यते तदा च चण्डेश्वरमतमेव श्रेयः स्यात् तथा हि विभक्तेनोद्धृतं अस्य
पूर्वपुरुषधनं नाप्नुयात् तदविभक्तेनोद्धृतमपि नाप्नुयात् याज्ञवल्क्यादिना विशेषानभिधाना
त् अनुभवबाधस्य तुल्यत्वाच्चेत्यधिकं अविभाज्यप्रकरणे दृष्ट्वा स्वधियैवालोचनीयं । जीमूतवाहन
स्मार्तप्रभृतयस्तु मातुर्निवृत्ते रजसीत्यादिषु निवचनेषु मातृरजोनिवृत्तेर्विभागनियामकदर्शनात्
। विभक्तजस्य केचित् मुनिभिर्भागदानकथनाच्च पैतामहधने मातृरजोनिवृत्तिं विना भ्रान्त्या वि
भागे कृते विभागानन्तरजातस्य भागदानं भ्रातॄणां पैतृकधने मातृरजोनिवृत्त्यपेक्षां विनैव
विभागस्य कर्तव्यत्वात् तदनंतरं जातस्य पितृधनमात्रग्राहित्वं न तु मातृरजोनिवृत्तिः सर्वत्रै
वापेक्षा अविशेषादिति च चण्डेश्वरादेरभिप्रायः एवं च विधिलाघवं भवति पितृकृतविभागे तत्पू
र्वकालीनगर्भाधानेन जातानामंशो देयः तदुत्तरजातास्तु पित्र्यमात्रं गृह्णीयुरिति विधिद्वयं भव
न्मते तु पितामहधनं मातृरजोनिवृत्तेः परं विभजनीयमित्येकः पितृधनं तु यदा कदाचित् पितु

रिक्थात इति विधिद्वयं विभागानंतरोत्पन्नाः पितृभागं गृह्णीयुः पितामहधने भ्रातृभ्योपि अंशं गृ
ह्णीयुरिति विधिचतुष्टयं तथाच एडेश्वर मतापेक्षया एको विधिरधिकः इति वाच्यं मातृरजो नि
वृत्तेः परं पुत्रोत्पत्त्यभावेन विभक्तजस्य पित्र्य धन ग्राहित्व विधेर्निर्विषयत्वापत्तेः नचैवमपि
विष्णु याज्ञवल्क्य वचनयो निर्विषयतापत्तिरिति वाच्यं अस्पष्ट गर्भजातस्य पैतामह धन गोचर
तयैव सार्थक्यादित्याहुः ॥ अत्र जीमूतवाहनादिमते वचनानां विषयदुर्भिक्षं नास्ति किंतु विधिबाहु
ल्यमस्ति च एडेश्वरादिमते तु ऊर्द्ध्वं विभागाज्जातस्तु इत्यादि वचनानां विषयः भ्रांत्या कृत विभाग
स्थले विभागानंतरं विवाहाज्जातपुत्रो वा विषयो वाच्यः पितुरतिसामर्थ्याभावेपि महौषधादि
वशात् पुनारतिसामार्थ्यात् पत्निश्च प्राप्तां प्रवादात् ऊर्ध्वतदूत्यादिकमेवशरणीयमितिविशेषः
अधिकस्तु बुद्ध्या कल्पनीयं ॥०॥ ः॥०॥ अथ विदेशस्थागत विभागः ॥ तत्र बृहस्पतिः ॥० ॥
कृतेकृत विभागे वा ऋक्थी यत्र प्रवर्त्तते ॥ सामान्यं चेद्भवेत्तत्तु तत्र भागहरस्तु सः ॥ ऋणं लेख्यं गृहंक्षे
त्रं यस्य पैतामहं भवेत् चिरकाल प्रोषितोपि भागभागतस्तु सः गोत्रसाधारणं त्यक्त्वा योन्यदे
शं समाश्रितः ॥ तद्वंशस्यागतस्यांशः प्रदातव्यो न संशयः तृतीयः पंचमो वापि सप्तमो वापि यो
भवेत् जन्मनाम परिज्ञाने लभेतांशं क्रमागतं यं परं परया मौलाः सामन्ताः स्वामिनं विदुः तद
न्वयस्यागतस्य दातव्या गोत्रजैर्मही ॥ यत्र वीजि पुरुषस्य एक पुत्रो विदेशं गतः तत्रैव तस्य स
न्तानपरंपरास्थिता इहच अन्य पुत्राणां सन्तानास्तिष्ठंति तेतु विभक्ता अविभक्ता वा अनंतरं
विदेशागतस्यापि संताना आगतास्तत्र एते तत्संतानेभ्यो भागं दद्युः तत्र भागक्रमस्तु वीजिपु
रुषस्य पुत्रसंख्ययातत्र एको भागः विदेशागतस्य संतानैः स्वस्वपितृक्रमेण विभज्य ग्राह्यः
एभिश्चैवं विभागांतरं आगमने तु स्वस्वभामात्तदनुसारेनैकाकर्षणं वोध्यं सामान्यं इति
नतु कस्यचित्स्वयमुपार्जितमित्यर्थः भागार्हमिति यावत् ऋणमिति स्व पूर्वपुरुषैः प्रयुक्तं गृही
तं वा अविशेषात् लेख्यं निवंधपत्रादि त्यक्त्वा इति न उपेक्ष्य किंतु तदननुरूथ्य इत्यर्थः ॥ अं
श इति पूर्वोक्तऋणादीनां मेवांश इति भवदेव मतं ॥ सामान्यद्रव्यस्यैवांश इति स्मार्त्तमतं
॥ वस्तुत उभयमेव युक्तं चिरकालोत्तरं पूर्व पुरुषार्जितमण्यादेः प्रायः स्थित्यसम्भवात् तृती
यः वीजिपुरुषस्य पौत्रः पंचमः प्रतिप्रणप्तातस्य अनधिकारिधारामूलत्वात् कीर्त्तनं सप्तम
इति तु परिशेषार्थं अष्टमस्यानधिकारात् अत्रेदमवधेयं पंचमादेरधिकारस्तु वीजिनो मर
णानंतरं तत् पितृपितामहादेः कस्यचित् कस्यचित् जीवने सती वोध्यं अन्यथा चतुर्थः संप्रदातॄ
णां पंचमेनोपपद्यते इति मनुवचनेन तेषामनधिकारापत्तेः नन्वेवं क्रमिकमरणस्थले अष्टमा
दीनां अप्यधिकारो भवत्विति चेत् न सत्यामपि अधिकार संभवनायां अप्यधिकारो भवत्विति
ति चेत् न सत्यामपि अधिकार संभवनायां अन्योपभोगेन स्वत्व ध्वंसात् मुनिवचनाच्च ननुप
श्यतो ब्रुवतो हानिर्भूमेर्विंशतिवार्षिकीत्यादिवचनजातात् पश्यतामेव भोगे हानेरुक्तत्वा
त् विदेशगतानां नहानिरिति चेत् न विंशतिवर्षरूपकालेनैव पश्यतामभोगेहानिः अपश्यता १२४

श्लोकः २२

मति चिरदिनोत्तरं ह्यानिर्भव तथाहि यद्यमिदं नोपेक्ष्यतेत थाकथंनास्यवार्त्ताह्वारंकरोतीत्युपेक्षानु
मानंस्यादितिभावः ।अतएववर्षाणि विंशतिं भुक्त्वा स्वामिना ऽव्याहृतासती भुक्तिः सापौरुषीभूमे
र्द्विगुणाचद्विपौरुषीत्रिपौरुषीचत्रीगुणानतात्रीन्नेष्यपेक्ष्य आगमः ।इतिव्यासवचनव्याख्याने
एतद्वचनसमयस्य भोगविषयकमितिसमक्षविंशतिवर्षभोगविषयकवचनेनाविरुद्धमितिस्मार्त्त
भट्टाचार्यैरुक्तं इति इयंच त्रिपुरुषीभुक्ति असपिंडानांधमं नाशयतिनतुसपिण्डानामितिवि
शेषः कल्पनीयः अतोऽत्रसप्तमपुरुषपर्यन्तानां आगमनेपैतामहधनप्राप्तिर्भवतिस्पष्ट
माह ॥ ७॥ बृहस्पतिः ॥ ०॥ भुक्तिस्त्रिपुरुषीसिद्ध्येदितरेषांनसंशयः अनिवृत्तेसपिण्डत्वेसकु
ल्यानांनसिद्ध्यति अस्वामिना पियद्भुक्तं गृहक्षेत्रापणादिकं सुहृद्बन्धुसकुल्यानांनतद्भोगेनही
यते ।विवाह्यश्रोत्रियैर्भुक्तंराज्ञामात्यैस्तथैवच सुदीर्घेणापिकालेन तेषांसिद्ध्यतितन्नुन अत्र
सपिण्डत्वअशौचोपयुक्तंसप्तमपुरुषपर्यन्तंसंकुल्याः कुलोद्भवाः एतदुक्तं प्राक्पश्चान्नकथ्यते
अस्वामिनेत्यादिसुहृदोमित्राणिबंधवोदौहित्रभागिनेयादयः सकुल्याःवीनपुरुषपेक्षया
सप्तमपुरुषपर्यन्ताः एतान् विभक्तदायादानसकुल्यानाचक्षतेइतिबोधावचनात् विवाह्योजा
माता श्रोत्रियमाह ।देवलः ॥ एकांशाखांसकल्पांवाषड्भिरंगैरधीत्यवा षट्कर्मनिरतोविप्रः श्रो
त्रियोनामधर्म्मवित् एकांवेदशाखांअधितेकल्पसंज्ञकवेदांगसहितां एकांशाखांअधीतेव्या
करणकल्पादिरूपांगषट्कयुतां एकांशाखांवाअधीतिअथच षट्कर्म्मनिरतः देवान् पूजयति य
थाशक्ति किंचित् किंचित् ददातिअधीतेच एतत्रपपारलौकिकंजीवनोपायाश्चत्रयः याजनाध्या
पनातोलब्धदक्षिणायाग्रहणं भिक्षाचएतेषुनिरतः ॥ तथाचवेदाध्ययनवान् वेदोक्तान् प
वांनुरक्तश्चब्राह्मणः श्रोत्रियः अत्रचवेदाध्ययनमेवतंत्रं षट्कर्म्मनिरतिश्चतदुक्तिप्रतिपालनरू
पैव अतएव गोपीचंद्रः छंदसस्तदधीतेश्रोत्रश्चेनिसूत्रेणछन्दो अधितेइत्यर्थेछंदःशब्दाद्धिघप्र
त्ययेनश्रोत्रादेशेनचश्रोत्रियशब्दव्युत्पत्तिंकृतवान् नह्विप्रतिग्रहहीनस्याह्वशापरगुणविधि
ष्टः नश्रोत्रियपदेनबोध्यतेनच षट्कर्म्मनिरतइतिवृत्तिनियमार्थं नतुतदावश्यकत्वार्थं तथाचजा
यनाध्यापनप्रतिग्रहेतरवृत्त्यभाववानेवश्रोत्रियउच्यते इतिवाच्यंतथासतितादृशोंछशिलवृत्ते
रश्रोत्रियत्वापत्तेः अतएवचपठंति ।जन्मनाब्राह्मणोज्ञेयः संस्कारैर्द्विजउच्यते विद्ययायातिवि
प्रत्वंत्रिभिः श्रोत्रियलक्षणं इतित्रिभिः जन्मसंस्कारविद्यात्मकैः श्रोत्रियलक्षणं श्रोत्रियस्यचिह्न
नंभावेनट्अथवाश्रोत्रियस्यलक्षणंचिह्नंविप्रत्वंत्रिभिर्भवतीत्यर्थः इतितथाचवेदपाठसम्ब
धः संस्कृतोब्राह्मणः श्रोत्रियइतिलक्षणंषट्कर्म्मनियतत्वादिकंअपकृष्टवृत्तिनिवारकत्वेन
गुण इतिकतिपयवेदशाखैवेदशाध्यायिनामपियथेष्टवृत्तिहीनत्वेनापतितानां श्रोत्रियत्वमिष्टं ॥
अतएवापुत्रधनाधिकारेमनुः ।सर्वेषामप्यभावेतुब्राह्मणारिक्थभागिनः त्रैविद्याः शुचयोदां
तास्तथाधर्म्मोनहीयते ।इत्यनेनवेदत्रयाध्यायिनेशुचित्वरूपधर्म्मवतेअपुत्रधनंदेयमित्युक्त

श्लोकः २५

वानू ॥ देवलश्च ॥ अदायकन्तु ब्रह्मस्वं श्रोत्रियेभ्यः प्रदापयेत् इत्यनेन श्रोत्रियेभ्यो दानमुक्तवान् तथा
च मुनिद्वयैकवाक्यतया शास्त्रव्युत्पत्तिबलेन प्राचीनकारिकापाठबलेन च वेदत्रयान्यतमवेदपाठसंब
न्धी ब्राह्मणः श्रोत्रिय इति स्फुटं इत्याहुः केचित्तु वस्तुतस्तु यथा तथास्तु श्रोत्रियलक्षणं फलतो
वेदपाठादिसंबन्धात् यो मान्यः तेनैव भुक्तं चिरकालेनापि सिद्ध्यतीति एतच्च राजभिन्नस्वामि
काले राजस्वामिकत्वे विवेचनन्तु राजधर्मप्रकरणे इति युक्तमुत्पश्यामः इयं च सप्तमपुरुषेणापि
लभ्यत्वव्यवस्था दूरदेशनिवासे एतदधिभिप्रत्यैव सकुल्यस्य इत्युक्तं भूयो दायविभागः स्यादाचतुर्था
दिति स्थितिः इति देवलोक्तं तु एकदेशवासे बोध्यं तथा च वीजिनः एकपुत्रः स्वपितृगृहादि भिन्ने
ऽन्यत्र तिष्ठति स्वोपार्जितादिकं च भुंक्ते तत्पुत्रोपि तत्रैव तादृशरीत्या स्थित्वा मृतः अन्यः पुत्रस्तत्सं
तानाश्च वीजिनो गृहे स्थित्वा तदेव द्रव्यं भुंजते अनन्तरं भिन्नस्थानस्थस्य पौत्रस्य तु क्रमागतध
नस्यांशग्राह्यत्वे तदा प्राप्नोति यदि तु समृतः तत्पुत्रो याचेत तदा स न प्राप्नोतीति देवलवचनस्यार्थः
॥ ननु वीजिपुरुषापेक्षया सप्तमपुरुषस्य कथं धनाधिकारः ॥ इत्थं चेत् आसन्नतत्पूर्वपुरुषदाय
त्वादिति जानीहि तथा हि तेषां तद्धने ऽन्यविधार्जनस्य भोगस्य चाभावेपि उत्पत्त्यैवार्थं लभेतत्याचा
र्याद्द इति गौतमवचनात् उत्पत्तिरूपव्यापारद्वारैवार्जनं ननु अविभक्तविभक्तानां कुल्यानां वस
तां सह । भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः ॥ इति वचनस्य अविभक्तानां विभक्तानां वा
सह वसतां विभागावशिष्टं किंचिद्धनं वा तस्य विभागश्च धन्यपेक्षया चतुर्थपुरुषपर्यंतमेव भूयस्त्वं
तु विभक्तकल्प एव संगच्छते इत्यर्थः अथवा सह वसतां संसृष्टानां इत्यर्थः तथा च पितुर्विभक्तः
पुत्रः पितरि जीवत्येव पुत्रपौत्राभ्यां मृतं अनंतरं पिता मृतः तदानीं च पुत्रस्य प्रपौत्रो वर्त्तते स विभा
गावशिष्टधनांशं न प्राप्नुयादित्यर्थः एवं संसर्गानंतरमन्यत्र वासेपि यत्तु अविभक्तानां विभज्य
संसृष्टानां वा सहवासे क्रमिकमरणेपि भ्रातृतत्सुतपर्यन्तमेवाविभागस्तदुत्तरं तु धनिवृद्धप्र
पौत्रादेर्विभागो न विद्यते न तु तद्धनं कस्यस्यादिति चेत् भ्रात्रोर्मध्ये एकस्य मरणे यो जीवति तत्
संतानस्यैव इति यथाश्रुतार्थ उपस्थीयते तत्र युक्तिर्नावधार्यते पूर्वपूर्वपुरुषमरणात् भोगे
न उपेक्षाविरहाच्च प्रागत पुरुषपर्यंतं अपि धनप्राप्तौ बाधकाभावात् न च वाचनिकोऽयमर्थ इति
वाच्यं वचनस्य तादृशार्थकत्वं हि स्मार्त्तादीनैस्पष्टं लिखितं अन्यार्थश्च संभवति एवं तीर्थस्नाना
र्थं गतयोर्भ्रात्रोरेव चेद्देते पामसमक्षमेव मरणं तत्र पूर्वापरमरणविवेचनाभावाद विभक्तयो
र्द्वयोः प्रपौत्रयोरेवांशग्राहित्वानुपपत्तिः द्वयोरेव धनिचतुर्थातिक्रमित्वात् एवं धनित्वं किंध
नार्जकत्वं धनलाभित्वं वा आद्ये अतिवृद्धप्रपितामहार्जित धनस्य क्रमायातस्य सहोदरभ्रात्रो
रेव विभागो न स्यात् धनार्जकचतुर्थातिक्रमित्वात् न च धनार्जकावधि अविभागे एतद्वचनमिति
वाच्यं वचनेन तावत्पर्यन्ताबोधनात् न च बहुवचनात्तथावगमः इति वाच्यं तथापि धनार्जका
त्परं चतुर्भिः पुरुषैः विभक्तस्य धनस्य चतुर्थसंतानपुरुषचतुष्टयस्याविभागे सति क्रमिकमर १२५

श्लोकाः २५

णे तत्संतानस्य कस्यचित् विभागवारणाभावापत्तेः धनार्जकावधिअविभक्तत्वाभावात् अथद्विती
यः कल्पआदरणीयः धनस्वामिनां केषांचित् पुरुषत्रयाणां अविभागेचतुर्थे विभागोनभ
वतीतिफलितार्थः इतिचेत् आचतुर्थादित्यत्रचतुर्थपदार्थस्यसावधिकत्वेनात्रचावधिदुर्लभ
त्वेनान्वयबोधानुपपत्तिः तथाहि धनस्वाम्यपेक्षयाचतुर्थ इतिचेदभिमतंतदा अभिविभक्तानाम
पिसाधारणस्वामित्वात्क्रमिकमरणस्थलेशतपुरुषपर्यन्तमपिचतुर्थानिष्क्रामित्वाभावात् य
दिधनस्यासाधारणस्वाम्यपेक्षयाचतुर्थत्वं इत्युच्यतेतदाक्रमिकपंचपुरुषाभागस्थलेक्रमिकम
रणेपितद्धनस्यनिधित्वापत्तिः अपुत्रधनाधिकारिणाग्राह्यत्वंवाअथद्वयोर्मात्रोर्मध्ये यः पश्चात्
मृतस्तत्संतानस्यैवतद्धनमितिचेन्नतस्यापि भ्रातुष्पुत्रवतोऽसाधारणस्वामित्वाभावात् असा
धारणस्वाम्यपेक्षयाप्रधानापेक्षयात्वचतुर्थत्वंविवक्षितमितिवाच्यं तादृशकल्पनाबीजाभावा
त् इतिकेचित्तद्भावनीयं अन्येतुविदेशगतानांसप्तमपुरुषपर्यंतानां एवपुरुषत्रयेऽक्रमेण
मरणेपिअधिकारस्तत्र अविभक्ते मृतेपुत्रे तत्सुतंऋक्थभागिनं कुर्वीतजीवनंयेनलब्धंनैवपि
तामहात् लभेतांशंसपित्र्यन्तुपितृव्यात्तस्यवासुतात् लभेततत्सुतोवापिनिवृत्तिपरतोभवेत्।
।इतिकात्यायनवचनलिखनानन्तरं एतत्सहवासविषयमितिस्मार्त्तलिखनस्वरसादवग
म्यते इत्याहुः तन्नमनोरमंतथाहिधनिधनेपुत्रस्यमृतपितृकपौत्रस्यमृतपितृपितामहकप्र
पौत्रस्यचाधिकारोभवतिइतिसामान्यतः कल्प्यतेनतुविदेशगतानांभिन्नकल्पनञ्चतृतीयः
पंचमोपापिसप्तमोवापि योभवेत् इतिबृहस्पतिवचनात्तुविदेशगतानांसप्तमपुरुषपर्यंतमे
वाधिकारइतिवाच्यं तद्वचनस्यविदेशगतानांअभोगेनस्वत्वनाशाभावतात्पर्यकत्वेनैवोप
पत्तेः स्वदेशस्थानांतुतावत्कुल्याः सपिंड्याः स्युःपिंडभेदस्त्वनन्तरं समभिच्छिन्नपिंडेन
दायार्थस्यविभाजनं ॥इतिवचनादेवचतुर्थात्परेषां अभोगात् स्वत्वनाशः नचतद्वचनं च
तुर्थपुरुषपर्यंतंदायाधिकारबोधकमितिवाच्यं तदर्थस्यापित्यागेप्रमाणाभावात् नच
उदासीनानांभोगाभावात् स्वत्वनाशः विदेशगतानांतुसप्तमपुरुषपर्यंतंदायाधिकार
बोधकवचनेनार्थतः सिद्धः षष्टिवर्षाभोगेपिस्वत्वानाशइतिवाच्यंअनिवृत्तेसपिण्डत्वेस
कुल्यानांनास्ति ह[illegible]तीतिबृहस्पतिनाविशेषतः। सपिंडानामभोगेनस्वत्वनाशाभावबो
धनान्ननुसपिंडानांशतपुरुषाभोगेपिनस्वत्वहानिरितिवृत्ते इत्यादिबृहस्पतिवचनस्वर
सादवगम्यतेइतिचेन्न एडिश्वरादिभिरेतद्वचनं तथाव्याख्यातं देवलवचनव्याख्यानोत्तरं
तथेतिकृत्वाचएडिश्वरेण तावत्कुल्याःसपिंडास्युः इत्यादिवचनस्यदेवलीयत्वेप्रमिते
ऽविभक्तविभक्तानामित्यनेनपौनरुक्त्यापत्तिश्चस्वदेशस्थितसंतानभेदेनक्रमागतध
नेभिन्नभिन्नस्वत्वकारणकल्पनेगौरवंचनचतत्वापिअभोगस्यस्वत्वनाशकारणत्वेक
ल्पमानेस्वदेशस्थविदेशस्थभेदेनभिन्नभिन्नस्वत्वनाशकत्वकल्पनायांगौरवंसमान

मितिवाच्यं अभोगस्यसाक्षात् स्वत्वनाशकत्वात् किं तर्हि अभोगस्यस्वत्वनाशकत्वेद्वारमितिचे
त् उपेक्षैवस्वत्वनाशिका तन्निर्णायकश्चाभोगः अतएव स्वार्जिताश्वत्थवृक्षादौ चिरकालभोगे
पिनस्वत्वहानिरितिविभावनीयं तदयंसंक्षेपः॥ पितुःपितामहस्यप्रपितामहस्यच धनेतन्मरणोत्त
रं पुत्रपौत्रप्रपौत्राणामधिकारः स्वदेशस्थितेनपुरुषत्रयेणभागाग्रहणेतत्संतानानांस्वत्वहा
निः विदेशस्थेनतुपुरुषसप्तकेनाग्रहणे इतिनतुविभक्तं यदिसपिंडद्रव्यं अपरःसपिंडोभुंक्ते स्वा
मिनांपुरुषत्रयंचनाधिकरोतितदा किंस्यादितिचेदत्रकेचित्॥ सुहृद्बंधुसकुल्यानांनतद्भोगेन
हीयते इतिवृहस्पतिनासामान्यतोविभक्ताविभक्ताधनेसकुल्यानांभोगेन स्वत्वहान्यभावकथ
नात् स्वत्वंनहीयतेएवपरंतु अविभक्तस्यपुरुषत्रयापेक्षाणांस्वत्वहानिः॥ समभिछंतिपिंडेनदा
यार्थस्यविभाजनं इतिवचनेविभाजनमितिपदस्वरसात् विभक्तस्यतुसहस्रपुरुषपर्यंतभोगेपि
नस्वत्वहानिरितिविशेषइत्याहुः॥ अथयदिधनिधने पुत्रपौत्रप्रपौत्राणामधिकारः नतुतत्पुत्र
स्यतथाचधनिनिसत्येवयदिपुत्रपौत्रप्रपौत्रामृताः तत्पुत्रोवर्त्तते अनंतरंधनीमृतस्तदातद्धने
सत्यपिप्रपौत्रस्यपुत्रेधनिपत्न्याएवाधिकारः यदिचप्रपौत्रेविद्यमानएवधनीमृतः अनन्तरं
प्रपौत्रोमृतः तदातद्धनंप्रपौत्रस्यस्वत्वसंबंधात् तत्पुत्रस्यापिभवतीतिफलितार्थः॥ तथाचस
तिधनिनिविद्यमानएवततुपुत्रपौत्रयोर्मरणोत्तरं प्रपौत्रोविदेशंगतः तस्यमंगलवार्त्तानश्रू
यतेऽनन्तरंधनीमृतः ततोविदेशगमनस्यद्वादशवर्षोत्तरंप्रपौत्रस्यमरणमवधार्यतत्पुत्रः
तदौर्द्ध्वदेहिकक्रियांचक्रे तदाशांतरस्थोधनिदौहित्रःस्वमातामहमरणंमातामहप्रपौ
त्रस्यमरणावधारणंचश्रुत्वाआगत्यस्वमातामहधनमधिकर्त्तुमिच्छति प्रपौत्रपुत्रश्चइदं
ममपितुःक्रमागतंधनमितिकृत्वाऽधिकर्त्तुमिच्छति तत्रविवादेकाव्यवस्था तत्रहिधनिमर
णोत्तरंतद्धनेदौहित्रप्रपौत्रयोर्द्वयोरेवस्वत्वसंशयः यतःप्रपौत्राभावनिश्चयंविनादौहित्रस्व
त्वंननिश्चीयते तदानींप्रपौत्रजीवनंनिश्चयविनातत् स्वत्वंननिश्चीयते नचप्रपौत्रसत्वनिश्चयस्यैव
दौहित्रस्वत्वेप्रतिबंधकत्वादत्रचतदभावात् दौहित्रस्वत्वमेवनिश्चितव्यमितिवाच्यंप्रपौत्रसत्व
स्यस्वरूपसतएवप्रतिबंधकत्वेलाघवात् तन्निश्चयापेक्षायांप्रमाणाभावात् नचैतत् स्थलेअ
न्यथानध्यवसायएवप्रमाणं इतिवाच्यं तथासतिप्रपौत्राभावनिश्चयेनदौहित्राधिकारेवृत्तेऽनं
तरंदैवादागतस्यापिप्रपौत्रस्यानधिकारापत्तेः तदुत्तरंदौहित्रप्रपौत्रयोःस्वत्वनाशसत्वोत्पत्तिक
ल्पनेप्रमाणाभावोगौरवंचननु॥ संविभागक्रयप्राप्तंपित्र्यंलब्धंचराजतः स्थावरंसिद्धिमाप्नोति
भुक्त्यानिरूपेक्षया॥ प्राप्तमात्रंचयेनभुक्तंस्वीकृत्यापरिपस्थितं तस्यतत्तुसिद्धिमाप्नोतिहानिं
चोपेक्षयातथा॥ इतिस्मार्त्तधृतवचनात् प्रपौत्रस्यतद्धनभोगाभावेनसिद्ध्यभावात्।दौहि
त्रस्यैवाधिकारइतिचेत् यत्रधनिनोमरणानंतरदिनएवप्रपौत्रस्यमरणं तत्रापितत्पुत्रस्या
धिकाराभावापत्तेः अत्रोच्यते स्वीकृत्यापरिपस्थितं इत्युक्तेःस्वीकारएवसिद्धिसाधकःअ ९२

श्लोकः२०

तोभोगाभावेपि स्वीकार एवतद्धनं प्रपौत्रस्यभवतितदनंतरंचतत् पुत्रस्ययुक्तं चैतत् यथाऽपेक्षासिद्धस
स्वत्वस्यनाशिका असिद्धस्यप्रतिबंधिका तथा स्वीकारः असिद्धस्यस्वत्वस्यसाधकः अतएव प्रपिताम
हार्जिताश्वत्थवृक्षादावपि प्रपौत्र पुत्रस्यस्वत्वंभवति ॥ एवंचप्रपितामहमरणकालावधियत्र प्रपौत्रस्य
रोगाद्यभिभूतत्वेनज्ञानाभावात् तद्धनेस्वीकाराभावः अनंतरंचमरणंतत्र प्रपौत्रपुत्रस्यानधिकारइष्ट
एवतदानींप्रपौत्रस्यमृतत्वात् एवंतदानीमाधुनिकात्येतोन्मादेपिअनधिकारः इष्टएवइतियेतु ऽतस्य
स्यैवार्थस्वामित्वंलभेते त्याचार्याइतिवचनात्प्रपौत्रस्यजन्ममात्रादेवस्वत्वं वदंति तन्मतेतु अत्रप्रपौ
त्र पुत्रस्याधिकारोभवितुमर्हतीतिनवाच्यं तथासति धनि निर्जीवत्वेव प्रपौत्रस्यमरणेतत्पुत्रस्याधि
कारनिराकरणार्थंधनिविनाकृतभोगस्वीकारस्यनियामकतायाअवश्यंवाच्यत्वात् केचित् तन्नवि
देशस्थितस्तदानींजीवन्कथंचित् प्रपितामहमरणंश्रुत्वात द्रव्यंस्वीकृतवान्नवेतिसंशयस्यतथा
प्यनुत्सारणात् यच्चोक्तं स्वीकारंविनानस्वत्वसिद्धिरिति तदपितदपेक्षाभावनिर्णायकत्वेनैवस्वीका
रस्योक्तत्वात् अतएवपितृमरणोत्तरं अज्ञातस्य पैतृकद्रव्यस्यदशपंचदशवर्षेत्तरंज्ञात्वाग्रहणं सं
गच्छते अपरेतुसंदेहात् प्रपौत्र पुत्रस्य दौहित्रादेश्चसमांशतामाकलयन्त्यगत्येति प्रपौत्रपर्यन्त
स्याधिकारमाह ॥ मनुः ॥ त्रयाणामुदकंकार्यंत्रिषुपिंडःप्रवर्त्तते चतुर्थःसंप्रदातैषांपंचमोनोपपद्यते
त्रयाणांपितृपितामहप्रपितामहानामुदकंकार्यंतर्पणंविधिनेतिभावः त्रिषुपित्रादिषुपिंडः पार्वणो
इतिएषांपित्रादिनांसंप्रदातापिण्डोदकयोरितिशेष । अत्रचदायग्रहणप्रकरणेपिण्डदानविधाय
कवचनस्यलिखनात् दायग्रहणार्थंप्रपौत्रपर्यंतस्यउपकर्तृत्व प्रदर्शनऔरसपुत्रपौत्रयोः पुत्रेण
लोकान्जयतिपौत्रेणानंत्यमश्नुते अथपुत्रस्यपौत्रेणब्रध्नस्याप्नोतिविष्टपं इत्यनेन दायग्राहित्व
मुक्तंइतिकुल्लूकभट्टः ॥ एवंच औरसपौत्रदत्तपुत्रयोःसत्वेऔरसादिपुत्रासत्वे दत्तपुत्रस्य यथाग्राह्यत्व
माधिकारः पौत्रस्यत्तुत्स्वपितृवदधिकारः । यत्रच औरसापुत्रोदत्तकपुत्रस्य पुत्रश्चवर्त्तते तत्रदत्तक
पुत्रतुल्यमेव पौत्रोगृह्णीयात् लभेतांशमसपित्र्यन्निति कात्यायनवचनदेषांषड्बंधुदायाऽदायू
पूर्वन्येपितुरेव षट् इतिवचनेननिर्गुणदत्तकस्यपितामहधनग्राहित्वं नास्तीतिदियंइदानीं क्षेत्र
जादीनां अपुत्रपितामहादिधनेप्यधिकारंदर्शयितुमाहत्रयाणामित्यादीति तस्माद्युक्तम पु
त्रपितामहधनेगौणपुत्राणामधिकारइति औरसपौत्रस्यपौत्रेणानन्त्यमश्नुते । इत्यनेनैवापुत्र
पितामहधनभागित्वमुक्तमितिचकुल्लूकभट्टव्याख्यानात् तस्मात् यथापुत्रपदं प्रपौत्र पर्यंत
परं तथापितुरेवइत्यत्रपितृवदंच प्रपितामहपरमितितदाशयः ॥ अत्रदत्तकस्याल्पगुणत्वेतत्
पुत्रस्यबहुगुणत्वेकाव्यवस्थाइतिचेत् वस्तुतोभागग्राहकस्यगुणविवेचनैवकर्त्तव्या अंधपुत्रादि
वत्इदानीन्तुगुणागुणविवेकमंतरेणैवदत्तकपुत्रस्यतृतीयांशंददाति तत्पुत्रस्यापितथैवदा
नं युक्तंबौधायनः । प्रपितामहः पितामहः पितासहसोदर्याभ्रातरःसवर्णायाः पुत्रःपौत्रः एतान्
विभक्तदायादान् सपिंडानाचक्षते । विभक्तदायादान् सकुल्यानाचक्षतेसत्स्वंगजेषु तद्गामीह्यर्थो

श्लोकः २०

भवतिसपिण्डाभावेचाचार्यो ऽन्तेवासीऋत्विग्धाहरेतु तदभावेराजेति अत्राविभक्तदायादाद्व
इत्यस्यनानाविधार्थः यदादीयते इत्सौदायः पिण्डःअविभक्तोयोदायस्तमश्नन्तिअविभक्तदा
यादाःअविभक्तशब्दयोगेनयुगपत्पिण्डभोजनंप्रत्याय्यते येयेनसहयुगपत्पिंडभोक्तास
तस्यदायादइतिस्थितं एवंचप्रपौत्रःस्वपुत्रक्रियमाणेस्वसपिंडनेपितृपितामहप्रपितामहैः
।सहयुगपत्पिण्डम[illegible]श्नातिइतिप्रपौत्रःसपिण्डः पुत्रपौत्रौतुसुतरांसिद्धौ।एवंपित्रादयो
पित्रयः।जीमूतवाहनस्तुपुत्रपौत्रप्रपौत्रैस्तानृपिण्डदानात्पुत्रपौत्रप्रपौत्राणांसपिण्डत्व
मित्यस्याहतथाचअविभक्तंदायंपिंडंआसम्यक्ददतीति अविभक्तदायादाःअविभक्तशब्दयो
गेनपार्वणपिंडोलभ्यतेइति।एवमविभक्तेभ्यपिंडंआसम्यक् ददतेअविभक्तदायादाःसो
दर्याःभ्रातरः तथाचसोदर्याभ्रातरोपियेभ्यः पिंडंआसम्यक् ददतेअविभक्तदायादाःसो
दर्याःभ्रातरः तथाचसोदर्याभ्रातरोपियेभ्यः पिंडंददतेअयमपितेभ्यइतिअविभक्तत्वंचतत्
पिंडसंप्रदानत्वंयोयस्यपिंडसंप्रदानेभ्यः पिण्डंददातिसतस्यदायादः इतिफलितार्थः।
।एवंयेयस्यअविभक्तदायंयेनदत्तंपार्वणपिण्डअन्नैश्नन्तितेपितत्सपिंडाः एवंचपि
तापितामहःप्रपितामहश्चसपिण्डाभवंति।नन्वेवंवैमात्रेयभातृपितृव्यवत्पुत्रपौत्रादे
रपिसपिंडतास्यादितिचेत् काक्षतिःवचनेनसोदर्याभ्रातरइतिदिक्प्रदर्शनं।नन्वेवंदौहि
त्रादेरपिसपिण्डतास्यादितिचेद्दायग्रहणोपयुक्तसपिंडतासत्वेक्षतिविरहात् यद्वाअवि
भक्तदायादाइत्यस्यैकविधोऽर्थस्तथाहिअविभक्तंदायमदंतिसपिंडनेचपुत्रादिभिस्त्रिभिः
सहाविभक्तंपिंडंपित्रादयस्त्रयोदन्तिदायनिष्ठमविभक्तत्वंचस्वभोग्यदायभोक्तृभोग्यत्वंते
नप्रपितामह संतानांतस्यचंग्रहः एततुकल्पकश्चसोदर्याभ्रातरइतिवोधापनवाक्यंत
त्रोपलक्षणंपरं एतच्चमुख्यकल्पेस्वरूपयोग्यत्वमवलंब्यउक्तंतेनप्रपितामहस्यपतितत्वेतत्
पितृसंतानस्यासंग्रहः एवंचदौहित्रादिव्यावृत्तिःसंभवतिदुहितुःसपिण्डत्वाभावे पिनक्षतिः
दत्तायाइवअदत्तायाअपिवचनवलादेवपित्र्यधनलाभसंभवादितिध्येयंसवर्णायाः इतिप्रा
धान्यमात्रार्थंविभक्तदायादानिति एतद्वैद्वैपरीत्यमेवयेनादत्तमेवया[illegible]र्वणपिण्डयोऽश्नाति
यत्पिण्डसंप्रदाना पिंडंनददातियेनसहपिंडंनभुक्तेयस्मैपिंडंनददातिसतस्यविभक्तदाया
दःसकुल्यःविभक्तंनद्वन्तभिन्नंदायंअत्तिविभक्तः यस्यासहभावेनपिंडमत्तिविभक्तंपार्वणेय
त्संप्रदानकभिन्नंपिण्डंददातियत्पिण्डसंप्रदानभिन्नायपिण्डंददातिअत्रचविभागपदे
नधनविभागवत्पिण्डसंप्रदानादिविभागःगौण्यावोध्यइत्यवधेयं।सत्स्वंगजेषुक्तानांस
पिण्डानांमध्येअंगजेषुसत्सुसुतदगामीअर्थोदायस्वरूपंधनंभवतिअत्रचवहुवचनदर्श १
नात्तुशब्देनवहुत्वविशिष्टांगजाएवपरामृश्यंते तेनपुत्रपौत्रप्रपौत्राणांयुगपदधिकारः
जीवत्पितृकपौत्रादेस्तुकात्यायनैकवाक्यतात्वारणमितितुनयुक्तं तथाप्यतिदौहित्रायापि ५२७

पुत्रेण युगपदधिकारापत्तेः तस्मादनेनवचनेन पुत्रपौत्रप्रपौत्राणांअधिकारोबोध्यते यौग
पद्यंतु कात्यायनवचनादेव अथवा दौहित्रादिदेयमातामहादिपिंडस्तु पित्रादिसंप्रदानक
दानानुषंगिकत्वात् गौणः इतिन दौहित्रस्य पुत्रतुल्यताऽतोनयौगपद्यं दायग्रहणेअंगजानां
अभावेसंपिण्डानांदायाधिकारइतिसपिंडाभावे सकुल्यइतिवचनात् न्यस्यते एतदग्रेविवे
चयिष्यते ।अथानंतरः सपिंडादयस्यतस्य धनंभवेदितिमनुवचनात् सपिंडानामव्यवहित
त्वमनन्तरत्वंनियामकंतथाचयोयदपेक्षयाधनिनोऽव्यवहितः सएवतस्मिन् सत्यपिदाय
ग्राहीअथवायोधनिनोजीवताऽधिकारिणाऽव्यवहितः सधनिधनंगृह्णीयादित्यर्थः एवं
चमृतपितृकपौत्रस्यजीवतापुत्रेणाव्यवहितान्नतदानीमधिकारोस्तितिचेन्नसपिंडाधिकार
एव एतद्वचनंपौत्रश्चांगत्वेनैवाधिकारीअंगजश्चायंतस्यांपितामहानांतनवोऽनुपूयन्तेइति
वचनात् यद्यपित्रयाणामुदकंकार्य्यमित्यादिवचनेन पुत्रादीनांत्रयाणांसपिंडत्वमुक्ताअनं
तरः [illegible] सपिंडाद्यइत्यादिनातेषामेवानंतर्य्यक्रमउक्तइतिलक्ष्यते नतुबौधायनोक्तस
पिंडापेक्षया एतद्वचनं तस्यभिन्नमुनिकथितत्वात् प्रकरणनियमासंभवादिति तथापिकात्याय
नबौधायनवचनैकवाक्यत्वायइदंव्यवस्थेयं। यथासपिंडत्वात् स्वोक्तसपिंडात् पुत्रपौत्रप्रपौत्र
रूपात् मध्येयोऽनंतरः जीवताऽव्यवहितः सधनंगृह्णीयात् मृतपितृकपौत्रस्तुनजीवतापि
त्वेनव्यवहितः भिन्नपंक्तियातित्वादितिकेचिदाहुः कुल्लूकभट्टस्तुअस्यवचनस्यऔरसा
दिसपिंडमात्रविषयत्वेवैयर्थ्यमेवस्यात्। ततश्चानुक्तपत्न्यादिदायप्राप्त्यर्थमिदंसपिंडम
ध्यात् सन्निकृष्टतरोयः सपिंडपुमानस्त्रीवातस्यमृतधनंभवतीत्याह अत्रसपिंडः बौधा
यनोक्तः पत्न्याश्चधर्मकार्य्येस्वसहकारित्वात् सपिंडत्वंज्ञेयं॥ ० ॥इतिविवादभंगार्णवे
दायभागदीपिकुहानुरागयनरागरत्नेसप्तमं॥ ०॥ अथसिद्धंपुत्रपौत्रप्रपौत्राणां पित्रा
पितामहेनवाजीवताव्यवधानेपिनिधनेऽधिकारः तत्रचतेषामभावेकोदायभागीइत्या
कांक्षायांयाज्ञवल्क्यादीनांवचनान्युपन्यस्यंते याज्ञवल्क्यः ॥ पत्नीदुहितरश्चैवपितरौभ्रा
तरस्तथा तत्सुतोगोत्रजोबंधुः शिष्यः सब्रह्मचारिणः। एषामभावेपूर्वस्यधनभागोत्तरोत्तरः
।स्वर्यातस्यह्यपुत्रस्य सर्ववर्णेष्वयंविधिः। अपुत्रस्य धनग्रहणयोग्यपुत्रपौत्रप्रपौत्रर
हितस्य जीमूतवाहनास्मात्तरियोप्येवमेवप्रायः। तादृशस्यमृतस्य धनेप्रथमंपत्नीअ
धिकारिणीतिभावः तदाह॥ बृहस्पतिरपि॥ आम्नायेस्मृतितंत्रेचलोकाचारेचसूरिभिः
शरीरार्द्धंस्मृताजायापुण्यापुण्यफलेसमा। यस्यनोपरताभार्य्यादेहार्द्धंतस्यजीवति।जीव
त्यर्द्धशरीरेस्वं कथमन्यःसमाप्नुयात्॥ सकुल्यैर्विद्यमानैस्तुपितृमातृसनाभिभिः। असुत
स्यप्रमीतस्यपत्नीतद्भागहारिणी। पूर्वंप्रणीताग्निहोत्रंमृतेभर्त्तरितद्धनं। विंदेत् पतिव्रता
नारीधर्मएषसनातनः।जंगमंस्थावरंहेमकुप्यंधान्यंरसाम्बरं।आदायदापयत्श्राद्धं

मासषाण्मासिकादिकं। पितृव्यगुरुदौहित्रान् भर्तुः स्वस्त्रीयमातुलान्। पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः। आम्नाये वेदे एवं स्मृतौ तंत्रे शास्त्रे योभर्त्तासास्मृतां गना इत्यादितोद्वयोरैक्यं बोध्यते। लोकाचारे लोककव्यवहारेपि तथा बहुशो भार्य्या येसमर्पिते भर्त्रे दानसिद्धिः। भार्य्यातो ग्रहणे भर्त्ततो ग्रहणसिद्धिरित्यादृयो व्यवहारः। पुण्यापुण्यफले समाइति अग्निहोत्रादौ विवाहाग्निसाध्यकर्म्मणि च इति निबन्धृणामाशयः। पितृमातृसनाभिभिरिति दुहित्रादेरुपलक्षणं। असुतस्येति प्रपौत्रांतहीनस्येत्यर्थः। ननु यदि शरीरार्द्धं जाया तदा पुत्रादिषु सत्स्वपि सैव तद्वचनं गृह्णीयादिति चेन्न। तस्यां पिता महानांतनवोऽनुसृयंते पुत्रोपचारेणात्मानं संमन्त्रयेदिति शंखलिखिताभ्यां पुत्रादीनामपि पित्रादिस्वरूपत्वावगमात्। मासषाण्मासिकादिकमिति कुर्य्यादिति शेषः। अत्र पार्वणस्य स्त्रीणां कर्त्तृत्वनिषेधोत्। अकरणं तथा च दायभागप्रकरणे श्राद्धस्य पितृव्यपूजादेश्च कथनात्। तत्कर्त्तृ एवाधिकार इति ध्येयं॥ चंडेश्वरस्तु केचित् स्त्रियाः पार्वणमप्याहुः तन्निषेधाय श्राद्धानि परिगणयति मासषाण्मासिकादिकमिति अत्र मासशब्देन द्वादशमासिकान्युच्यन्ते षाण्मासिकशब्देन द्वे ऊनषाण्मासिके आदिशब्दात् सपिंडन[illegible]प्रत्यब्दकर्त्तव्यक्षयाहश्राद्धानि गृह्यंते अतो नान्यत् कुर्य्यात्। अन्यथा वचनान्तरैवेषां श्राद्धानां सिद्धत्वात् वचनमिदमनर्थकं स्यादित्याह सपिंडनस्य पार्वणत्वेपि एतत्सपिंडीकरणमेकोद्दिष्टं स्त्रियाऽपीति विशेषवचनात् क्रियाकर्त्तव्य इति स्मार्त्तादीनामभिमतं॥ वृद्धानाथातिथीन् स्त्रियइति वृद्धः पिाङतः वृद्धवृद्धौ पण्डितेपीत्यमरकोषात् स्त्रियोभर्तृस्नुषाप्रभृतयः। भर्तृभागिन्या अनाथत्वे अनाथपदेनैव संग्रहः सनाथत्वे तेनैव पोषणं तथा च सति सम्भवे षतिधनव्ययेन एतत्सर्वकर्म्मकरणं अन्यथा तु वाक्येनैव न तु स्वजीवनबाधनं कृत्वा भर्त्तीयतव्यादिपोषणमवश्यं कर्त्तव्यं न वा तदर्थं शास्त्रानुमतं। कर्म कुर्य्यात् वृद्धौ श्वश्रुश्वशुरौ तु अतिव्यामोहेनापि पोषणीयो वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः। अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत्॥ इति मनुवचने मातापित्रादिपोषणार्थं भर्त्तुरकार्य्यकरणस्याप्यनुमतेः॥ अत्र केचित् एतद्देशीयव्यवहारस्त्वधिकोयमभिभवितुं प्राज्ञोपि नालं केचिन्महावंशप्रसूता ब्राह्मणाः संतितेभ्यः कन्यां संप्रददतां वंशेन सह मानवृद्धिर्भवति अदाने च मानहानिः ते च बहुभ्यः कन्यां स्वीकुर्वन्ति न तु ताः तत्संततीर्वापुष्णन्ति एतादृशव्यवहारे प्रसिद्धे यदि भर्त्ता महावंशप्रसूताय कन्यां दत्वा मृतः सा च कन्या सधवापि भर्त्तृ न पोष्यते यतस्तत् पूर्वपुरुषमाहात्म्येनैव तत् पत्नीग्रासाच्छादनादिकं सति संभवे उत्तरकालीनभरणार्थं भूम्यादिकं च तत् श्वशुरो ददातीति बहुव्यवहारसिद्धत्वात् नियम एव अतस्तस्या दुहितुः पोषणं सति संभवे मात्रा कर्त्तव्यमन्यथानाथवत्स्यपि अनाथा इव दुहिता कुत्र भुंजित एवं श्वशुरदुहितुरपि अयमेव ३५

व्यवहार उचितः श्वशुरस्य तादृशकर्म्मणा तद्धर्म्मान्निवृद्धेः दुहितृदौहित्रपोषणं स
तिसंभवे आवश्यकं तस्या अपि तादृशत्वात् माहावंशप्रसूतानां महावंशप्रसूताय कन्या
दानस्यावश्यकत्वाद्वितीश्रीमन्महाराजवल्लालसेनोयं कल्पितमानमूलकोयं महाज
नपरिगृहीतः पंथाः। ग्रास्त्रे ऽदृष्टोपि व्यवहारज्ञापनार्थं लिखितो विवेचनीयस्तु श्रीम
द्भिस्तत्ता अपि स्त्रियइत्यनेन ग्राह्या अथवा एतादृशीवहुविवाहरितिर्निवर्त्तनीयाइ
त्याहुः तथाच भर्त्तृजीवनयथायस्य पोषणादिकं यद्यत् तत्तत्कर्म्म करोति मृतभर्त्तृका
पि स्वशक्त्यनुसारेण तथैव तस्य पोषणं तच्च कर्म्म कुर्वीत यच्च भर्त्ता ग्रामस्य ब्राह्मणा पा
लनादिकाम्यं कर्म्म कृतवान् तत्करणे ऽस्या आवश्यकत्वं नास्ति एतत् अनाथपदस्वरसे
नलभ्यते एवमन्यस्याधिकारेपि अन्येतु पूजयेत् कव्यपूर्त्ताभ्यां इत्यनेन पूजामात्रं अभि
हितं तेन कदाचित् भोजनवस्त्रदानादिकं च लभ्यते नतु पोषणमित्याहुः पुंज्यते वैतत् नह्या
धुनिकव्यवहारानुसारेणमुनयोग्रंथं स्वयंति जीमूतवाहनोपि भर्त्तुरौर्द्धदेहिकक्रियाद्यर्थ
मर्थानुरूपं भर्त्तृपितृव्यादिभ्योदद्यादित्युक्तवान् कव्यशब्दस्वरसेनैव तथोक्तिः हव्यकव्ये दै
वपित्र्ये ऽन्ये इत्यमरकोषात् पितृव्यपदं भर्त्तृसपिंडपरं दौहित्रपदं भर्त्तृदुहितृसंतानपरं स्व
स्त्रीयपदं भर्त्तृश्विसृसंतानपरं मातुलपदं च भर्त्तृमातृकुलपरं तदेवमादिभ्योदद्यात् नपुन
रेतेषु सत्स्वेव पितृकुलेभ्यः प्रदद्यात् पितृव्यादिवचनानर्थक्यात् तदनुमत्या तु स्वपितृमा
तृकुलेभ्यो पि स्वात्मानुरूपं दद्यात्तदाहुः॥ नारदः॥ मृते भर्त्तर्य्यपुत्राया पतिपक्षः प्रभुः स्त्रि
याः। विनियोगार्थरक्षायां भरणे च स ईश्वरः। परिक्षीणे पतिकुले निर्म्मनुष्ये निराश्रये। तत्स
पिंडेषु चासत्सु पितृपक्षः प्रभुः स्त्रियाः॥ विनियोगे दानादौ पतिपुत्राभावे भर्त्तृकुलपरतं
त्रता तस्याः इतिचोक्तवान् अत्र कव्यपूर्त्ताभ्यां भर्त्तृदौहित्रादिपितृव्याद्यो यथायोग्यं पूज
नं कर्त्तव्यं एवं च भर्त्तृकुलपूजां विना स्वपितृकुलपूजां नकुर्य्यादिति परिसंख्यार्थं पितृव्य
गुरुदौहित्रानिति वचनोपन्यासः अपरेतु नारदवचने विनियोगे दाने भर्त्तृकुलं प्रभुयस्मैदा
तुं कथयति तस्मै दद्यात् यत् दातुं कथयति तत् दद्यादित्यर्थः संप्रदानं चात्र भर्त्तृदानसंप्र
दानमेव भर्त्तृपारतंत्र्यात् कव्यपूर्त्ताभ्यामिति वृहस्पति वचनेतु मरणे कव्येन श्राद्धेन जीवने
पूर्त्तेन पालनेन अन्नादिना पृ पालनपूरणयोरिति धात्वनुसारादित्याहुः केचित्तु कव्ये पै
त्र कर्म्मणि पूर्त्ते दैवकर्म्मणि च भर्त्तृपितृव्यादेरेव पूजा इत्याहुः उदयकरस्तु व्रते स्थिताया
ति व्रत्यव्रते स्थिता तल्लक्षणं॥ आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा। मृते म्रियेत या प
त्यौ साध्वी ज्ञेया पतिव्रता॥ इति हारीतोक्तं पत्यौ पीडिते पीडिता तत्तापसदृशमनस्तापान्वि
ता हृष्टे हृष्टा पतिहर्षजहर्षयुक्ता प्रोषिते तद्विरहानलतापाकृशात्तु अलंकारवेशाद्युपेक्षया
मलिना च मृते म्रियेत अनुमरणं कुर्य्यात् या नारी एवंभूता साध्वी साधुशीला परपुरुषा

लापादिकामनापरान्मुखीसापतिव्रताज्ञेया तथाचतस्याअनुमरणेमासिकादेःस्वयं
दानासमर्थ्यात् दापयेदित्युक्तंएवंच णिच्प्रत्ययःसार्थकोभवति इत्याह श्राद्धदानप्रेर
णंचतस्याभवतियस्यादेयद्रव्येस्वामित्वमस्तीतिमुनिनाजीवनपर्य्यंतंस्वामित्वमपिस्वी
क्रियतेकृत्स्नमंशमितिदायमन्यान्यपिवचनानिव्यवस्थेयानि इतितस्याशयः। तच्चऐश्व
र्यादिभिरनादृतंपतिव्रतत्वेतरसकलगुणयुतानामपिनिर्दोषाणामनधिकारापत्तेः॥अपु
त्राशयनंभर्त्तुःपालयंतीगुरौस्थिता।भुंजीतामरणात्क्षांतादायादाऊर्द्ध्वमाप्नुयुः॥इतिवच
नस्यप्रायोऽसंगतिरपिदोषोऽत्रबोध्यः तस्मात्व्रतेविधवानियमेइतिरत्नाकरोक्तंयुक्तं
अत्रचयदिपत्न्याएवतद्धनस्वामित्वंजातंतदातद्भोगोपितस्याअर्थायतःसिद्ध्यतिएवंचभुंजी
तेतिव्यर्थमेवरागतःप्राप्तत्वेनविधेरसंभवात् नवाअवश्यंभुंजीतेतिनियमःसंभवतिअदृष्ट
कल्पनापत्तेःदैवाद्भंजनायाद्दुरदृष्टापत्तेश्चतस्मात्क्रियायामत्रपरिसंख्यातथाचपतिधनक
र्म्मकभोजनातिरिक्तक्रियाकरणाभाववतीभवत्वित्यन्वयः एवंचपालनादिकमपिनिषिद्धंभ
वतीतिनाशंकनीयं नियमस्यसदृशव्यावर्त्तकत्वात् परिसंख्याया अपिनियमविशेषत्वात्
परिसंख्याभिन्नोयोनियमविधिःसपारिभाषिकएवततश्चस्वसंक्रान्तपतिधनस्यदानादिकं
नकुर्य्यादितिव्यवस्था अतएवपत्नीचतद्धनंभुंजीतैवनतस्यदानाधानविक्रयान्कर्त्तुमर्ह
तीति जीमूतवाहनः अत्रार्हतीतिलिखनस्वरसात्यदिकरोतितदासिद्ध्यतीत्यवगम्यतेएवं
चअदेयदानाद्दात्र्यादण्डोभवतिग्रहीत्यदत्तंयोमोहाद्यश्चायंप्रयच्छति॥दंडनीयावुभावेतौधर्म
ज्ञेनमहीभृता॥ इतिनारदवचनात् स्मार्त्तभट्टाचार्य्याअपिपत्न्यास्वसंक्रांतपतिधनस्यपति
स्वर्गार्थंदानंकर्त्तव्यमित्यनुमन्यन्ते तेनचअन्यत्राकर्त्तव्यत्वंज्ञायते पितामहभट्टाचार्य्यचर
णाअप्येवं भवदेवोपिएवमेवप्रायः अत्रविवादचिंतामणिः। यथापतिदत्तेस्थावरेवचनात्
दानादौस्त्रीणामनधिकारःतथापत्युःस्थावरेपीत्याह पतिर्दत्तेपत्न्यास्त्रियैदत्तेस्त्रीधनेतदा
था नारदः भर्त्राप्रीतेनयद्दत्तंस्त्रियैतस्मिन्मृतेपितत् सायथाकाममश्नीयात् दद्याद्वास्था
वरादृते।अत्रभर्तृदत्तजंगमेपरंस्त्रियादानादौस्वातन्त्र्यंनतुस्थावरेपीति विवादचिंतामणिः
तथाचानधिकारकथनात् अस्वातंत्र्यकथनाच्चदानस्यासिद्धिरेवसीयतेअवधिकारिकृतत्वा
त् अस्वतंत्र्यकृतत्वात्चअतएवमृतभर्तृर्य्यपुत्रायाःपतिपक्षःप्रभुःस्त्रियाः।विनियोगात्म
रक्षायांभरणेचसईश्वरः॥इतिनारदवचनेन ईश्वरपदानुसंधानात् विनियोगेदानेस्त्रियाः।
पतिपक्षपारतंत्र्यमेवोक्तंनैतदभिमतंनव्यानां यतोविशेषवचनाभावेस्वामिकृतस्यदानस्य
सिद्धिरप्रत्यूहा।यच्चस्त्रीणामपतिपुत्राणांपतिपक्षपारतंत्र्यमुक्तं नतेनतस्यादानासिद्धिरवसीयते
पतिपक्षवशगत्वाभावेप्रत्यवायएवतत्रातत्पर्य्यात्। नापहारंस्त्रियःकर्युःपतिवित्तात्कथंचन १२८
॥इतिमहाभारतवचनेन अपहारकर्त्तव्यत्वाभावबोधनाच्चैकवाक्यत्वाच्च अतएवपतिस्वर्गार्थ ३६

र्थंदीयतेतयाइति स्थावरंद्विपदंचैवयद्यपिस्वयमर्ज्जितंअसंभूयसुतान्सर्वान्नदा
नंनचविक्रयः इतिवचनेयथापुत्रानुमतिंविनास्थावरदानस्याकर्त्तव्यत्वंतैनबोध्यतेन
तुदानानिष्पत्तिः यथात्रापिकल्पयितुंयुज्यते युक्तेर्गौरवात् यत्तुस्त्रीणांस्वपतिदाय
स्तुउपभोगफलःस्मृतः इतिमहाभारतवचनेनभुंजीतामरणात्क्षांता इतिकात्यायन
वचनेनचभोगमात्रफलकत्वकथनेनपरस्वत्वोत्पादनादिरूपफलव्यावर्त्तनात् भोग
मात्रोपदेशाच्च तत्रद्गुणवतेदेयंपतिप्रीणनकाम्यया॥ इत्यादिवनोपदिष्टपत्युपकारा
र्थदानेतरभोगेतरयथेष्टविनियोगासिद्धिरेवपर्य्यवसीयते। नचैवंग्रासाच्छादनमात्रभा
गित्वंपत्न्याःभ्रात्रादीनांचस्वामित्वमित्येवकथंनोच्यतेइतिवाच्यंतथासतितदानीमेवभ्रा
त्रादीनांदानविक्रयाद्यधिकारापत्तेः नचदत्ताप्रदानिकेऽदत्तगणेपत्नीसंक्रान्तधनस्यापा
ठात् दानासिद्धिर्नभवतीतिवाच्यंअदेयगणेपिपाठाभावेनदेयत्वस्याप्यापत्तेः अत्रत्यवच
नैश्चकिमस्यादेवत्वंनामदत्तत्वंव्यज्यतेइत्यत्रविनिगमकाभावः इतितन्न भुंजीतेतिपरिसंख्या
विधिनाभोजनेतरांक्रियांनकुर्वीतेतिपर्य्यवसितेनभोजनेतरदानादिक्रियाकर्त्तव्यत्वाभा
वबोधनात्॥ नहिपरिसंख्यास्थलेइतरस्यकरणासिद्धिःप्रतीयते तथासतिपंचनखान
भुंजीतइत्यादौशशकादिपंचनखेतरपंचनखभोजनक्रियायाअसिद्धिःप्रतीयेतनचतद्दृष्टं
अज्ञानात्प्रवृत्तस्यनरवानरादिमांसगलाधःकरणस्यदृष्टत्वात् तेनक्षुन्निवृत्तितृप्तिरू
पफलद्वयस्यदर्शनाच्च पत्नीवाध्ययादुहित्रादत्तस्यस्वसंक्रान्तपितृधनस्यदानसिद्धे
रप्रत्युहत्वेतद्दाधिकायाश्चपतिशरीरार्द्धत्वेनशास्त्रोक्तायाःजीवतिपत्यौतद्धनव्ययका
रिण्यादानासिद्धिरनुभवमपिनालम्बते। नचदुहितृत्वतोनिकृष्टत्वंपत्न्याभवताप्यभिमतमे
वतथाहिस्वसंक्रांतपितृधनदानंदुहितृकर्तृकंभवान्ननिषेधतिनिषेधतिचपत्नीक
र्तृकंस्वसंक्रान्तपतिधनदानमितिवाच्यंदुहितुर्हीनानुमतावपिअनेनपत्न्यानिकृष्टत्वा
नभिधानात् तथाहिमृतपतिकापत्नीयथेष्टभोजनशयनादिव्यवहारान्निवर्त्त्यसंयते
तैवव्रतेतिष्ठेत् पतिधनस्वरूपस्यआत्मनःपतिमात्रप्रयोजनत्वेनोपन्यासात् तथापत्यु
र्धनांतरस्यापिपत्युपकारकत्वंविनाविनियोगाभावात्तत्पालनरूपव्रतेतिष्ठेत् इतिहृद
मपितस्याव्रतमेवयत्पतिधनंदेवधनवत् व्यवहारार्थंनार्पयतीतितस्मात्दैवात्पत्न्या
कृतंदानादिकंसिद्ध्यत्येवपरंतुदायादैर्ज्ञापितोराजातांयथाविहितंदंडयेत् नतुग्रहीतारंत
त्रशास्त्राभावादितिनव्यमतसिद्धाव्यवस्था॥ पत्न्यादंडेप्रमाणेच॥ गृहीत्वात्यदत्तंयोमोहा
द्यश्चादेयंप्रयच्छति॥ दंडनीयावुभावेतौधर्म्मज्ञेनमहीभृता॥ इतिनारदवचनं ननुयदिप
त्न्यादानंनकर्त्तव्यंतदाधनदानगर्हणापेक्षतेदंडार्थंधनराज्ञेदेयंनवाइतिचेत् दंडस्यशु

द्धिहेतुत्वेनावश्यंदेयत्वा।निषेधश्चवैधेतरत्रएवंप्रायश्चित्तप्रतायशक्तौधेनुदानादिक
मपिकर्त्तव्यंएवंस्वर्गार्थंदानादिकमपिकर्त्तव्यंयथाव्यासः मृतभर्त्तृरिसाध्वीस्त्रीब्रह्म
चर्य्यव्रतेस्थिता॥स्नात्वाप्रतिदिनंदद्यात्स्वभर्त्रेसलिलांजलीन् कुर्य्याच्चानुदिनंभक्त्यादे
वतानांचपूजनं॥ विष्णोराराधनंचैवकुर्य्यान्नित्यमुपोषिता॥ दानानिविप्रमुख्येभ्योदद्या
त्पुण्यविवृद्धये।उपवासांश्चविविधान्कुर्य्याच्छास्त्रोदितान्शुभे।लोकांतरस्थंभर्त्ता
रमात्मानंचवरानने।तारयत्युभयंनारीनित्यधर्म्मपरायणा॥सलिलान्जलीन् तर्पणवि
धिना।विष्णोराराधनंचादश्यांउपोषिता।एकादश्यांनित्यमितिअनेनअलंघनीयत्वं प्रति
पादितं।मदनपारिजातदायभागतत्वधृतास्मृतिः।यद्यदिष्टतमंलोकेयच्चात्पत्युःस
मीहितं॥ तत्तद्गुणवतेदेयं पतिप्रीणनकाम्यया॥ एतदतिरिक्तदानादिकं नकर्त्तव्यं
।यथामहाभारतेस्त्रीणांस्वपतिदायस्तुउपभोगफलंस्मृतः।नापहारंस्त्रियःकुर्य्युःप
तिवित्तात्कथंचन॥अत्रजीमूतवाहनः।उपभोगोपिनसूक्ष्मवस्त्रपरिधानादिना
किन्तुशरीरधारणेनपत्युपकारकत्वात् देहधारणोचितभोगाभ्यनुज्ञानं एवंचप
त्युरौर्द्ध्वदेहिकक्रियार्थं दानादिकमप्यनुमतंअतएव॥नापहारंस्त्रियःकुर्य्युरित्याह।
अपहारश्चधनस्वाम्यनुपयोगेभवतिअतएववर्त्तनाशक्तावाधानमनुमतं तथाप्यश
क्तौविक्रयणमपिन्यायस्या विशेषादित्याह॥दायादाऊर्द्ध्वमाप्नुयुः॥ इतितस्याऊर्द्ध्व
दायादाआप्नुयुरित्यर्थः।ननुदायादाः सम्बंधप्रयुक्तधनग्राहित्वेन शास्त्रानुमताः तत्रे
चधनंकस्येत्याकांक्षायां सान्निध्यादुपरिस्थितिलाघवेनपत्याएवोपस्थितेःपत्नीस्त्री
धनग्राहित्वेनशास्त्रानुमताःसस्त्रीयादयएवलभ्यंतेइतिचन्न तथासतितेषामधिका
वस्यस्वतःसिद्धत्वेनदायादाइतिवाक्यस्यवैयर्थ्यापत्तेः।नचतद्वचनंपारिभाषिकस्त्रीध
नविषयकमतः संक्रान्तधनं नालम्बनेइतिसंक्रान्तधनवलम्बनार्थं एतद्वाक्यंसा
र्थकमितिवाच्यं धनंतासामित्यादिनापारिभाषिकस्त्रीधनस्य उत्सर्गतोऽनुपस्थानात्
तस्मात्तस्यांतदानीअविद्यमानत्वेन संभावितायांयस्याधिकारः तस्यांजाताधिकारायां
मृतायामपितस्यैव इतिस्मार्त्तजीमूतवाहनादिसंमताव्यवस्था आदरणीया अत्ररत्ना
करचिन्तामणिकारौतु पत्नीस्वसंक्रांतंपत्युःस्थावरमेवदातुंनार्हतिजंगमंतुअर्हत्येवभर्त्तृ
दायंमृतेपत्यौविन्यसेत् स्त्रीयथेष्टतः॥ इतिकात्यायनवचनं॥स्वसंक्रांतेभर्तृजंगमध
नविषयकंव्याख्यायवदतः तच्चिंत्यं तद्वचनस्यभर्तृदत्तस्त्रीधनपरतयाजीमूतवाहनेन
व्याख्यानात् मृतेपत्यौइतिदर्शनात्तद्व्याख्यानस्यायुक्तत्वाच्चअन्यथाभर्तृमरणं विनाभर्तृ
धनस्यपत्नीसंक्रमणासंभवात् मृतेपत्याविन्यस्यवैयर्थ्यापत्तेः पितामहश्वशुराश्च एतद् ३८

चनंभर्त्रादत्तंतदप्रतिसिद्धपत्नीधृतालंकारादिपरंतदपिस्त्रीधनमेव। पत्योजीवतीयःक
श्चिदलंकारोधृतोभवेत्। नतंभजेरन्दायादाभजमानाःपतंतिते॥ इतिमनुविष्णुवचनात्
अत्रपत्यदत्तोऽपितदनुज्ञयापरिहितोऽलंकारःतावतैवभार्यायास्त्रीभवतीतिमेधातिथिः
॥अत्रैवविवादचिंतामणिरप्यस्वरसोऽस्ति॥ ततश्चतादृशमलंकारादिकंमृतेपत्यौयथेष्टं
विनियुंजितजीवतितुपत्यौकिंकुर्यादित्याकांक्षायांएतत्कात्यायनवचनस्यैवोत्तराई्धविद्य
मानेतुसंरक्षेदितितथाचपत्यौविद्यमानेतदलंकारादिकंनदेयमिच्छतोभर्त्रादत्तत्वेनइतर
विधस्त्रीधनवत् अत्रस्वातंत्र्याभावइतिकल्पनीयंइतिव्याचक्षते। क्षेपयेतत्कुलेऽन्यथा
इतिएकारसहितक्षकारयुक्तंपाठंवदंतिचयदिविनियुञ्जीततदातत्कुलेएवनान्यत्रेतिव्या
कुर्वतेच अनेनापिभर्तृमरणलब्धस्यजंगमस्यनयथेष्टविनियोज्यत्वमायाति ननुमुनिव
चनस्यउपपत्तिंकुर्वतांग्रंथकाराणांएकस्यनव्यस्यविरोधभयात् अपरस्यप्राचीनस्यमत
खंडनंनयुक्तिसहंनचतेषांमैथिलत्वेनदेशान्तरीयाणांमतस्यएतद्देशीयग्रंथकारमतेन
खंडनंयुक्तमितिवाच्यंएतद्देशीयैरपिकादाचित्प्रमाणत्वेनतेषामुपन्यासात् एवंचाधु
निकानांसमशीलानामेवदेशभेदव्यवस्थायुक्ताइतिचनाथश्चव्याकृतोविवादरत्नाक
रप्रभृतिषु यथाभर्तृधनंद्विविधंभर्तृमरणेनस्वसंक्रांतंजीवत्येवभर्तरित्तत्सम्बंधेनदंप
त्योर्मध्यगंधनमितिवचनात् स्त्रीस्वत्वास्पदीभूतंचस्वसंक्रांतमपिद्विविधंजंगमंस्थावरं
चस्वसंक्रांतेभर्तृजंगमधनेभर्तृदायमित्यादिनायथेष्टविनियोज्यत्वं जीवतीविवाहेनभर्तृ
संम्बंधात्प्राप्तंधनंतुसंरक्षेत् पालयेत् भर्तृमरणोपक्रम्यतदानीपत्न्याकुत्रस्यातव्यमित्य
त्रउत्तरंवदन् मृतभर्तृस्थावरस्यप्रकारमाहक्षपयेदितितत्कुलेपतिकुले अन्यथापतिकु
लस्याभावेगुरौपित्रादौस्थिताभुंजीतेतिन चेदंवचनं सौदायिकप्रकरणीयत्वात्सौदा
यिकस्त्रीधनपरमितिहलायुधपारिजातसम्मतंयुक्तमितिवाच्यंतथासतिस्वसंक्रांतम
तपतिधनस्यकर्तव्यत्वाकांक्षायाअपूरणात्तदाकांक्षाबलेनतत्कल्पनौचित्यात् प्रक
रणापेक्षयाआकांक्षायाबलवत्त्वस्यग्रंथकारैरङ्गीकृतत्वादितिचेन्न भर्तृदायमित्यादिप्र
थमश्लोकस्यसौदायिकपरतयाव्याख्याय अपुत्राशयनंभर्तुरित्यादिद्वितीयश्लोकस्य
स्वसंक्रांतपतिधनपरतयापितामहभट्टाचार्यवत् व्याख्यानेप्रकरणस्यसंगतेः आकां
क्षानिवृत्तेश्च अपरेतु।कात्यायनः॥ सौदायिकेसदास्त्रीणांस्वातंत्र्यंपरिकीर्तितं॥ विक्रये
चैवदानेचयथेष्टंस्थावरेष्वपितथा॥ भर्तृदायंमृतेपत्यौविन्यस्येत् स्त्रीयथेष्टतःविद्यमा
नेतुसंरक्षेत्क्षपयेत्तत्कुलेन्यथा॥ अपुत्राशयनंभर्तुःपालयंतीगुरौस्थिता॥ भुंजीताम
रणात्क्षांतादायादाऊर्ध्वमाप्नुयुः॥ सौदायिकंपित्रादिनाश्वशुरादिनाचस्नेहात्दत्तंधनं

प्राप्यस्वातंत्र्यं अतोयथेष्टंदानविक्रयादिकं कुर्वीत भर्तृदत्तेतु विशेषः जीवति भर्तरितद्रक्षणं
मृतेनुयथेष्टाचारः रक्षणासामर्थ्येतत्कुलेक्षपयेत् एतद्विशेषकथनेनअन्यत्रसौदायिक
धनेस्वातंत्र्यसत्वेपिजीवतिपत्यौनदत्तधनेऽस्वातंत्र्यं अथवासौदायिकं त्रिविधंपित्रा
दिदत्तं भर्तृदत्तमपितदनुज्ञयापरिहितालंकारादिकं भर्तृदत्तस्थावरंचतत्राद्येपितृस्व
सुरादिदत्तस्थावरास्थावररूपेभर्तृदत्तजंगमेचाह॥ सौदायिकेसदास्त्रीणामित्यादिप्रथम
श्लोकं। द्वितीयभर्त्रनुमतिमात्रेणपरिहितालंकारादौआह॥ भर्तृदायमित्यादिद्वितीयश्लो
कं। तत्रमृतेपत्यौयथेष्टविनियोगोऽनुमतः। जीवतिकिंकर्त्तव्यमित्याकांक्षायांआह॥
विद्यमानेत्विति ननुरक्षितुं मदिनशक्नोतितदाकिंकुर्यादित्याकांक्षायामाह॥ क्षपयेदि
त्यादितत्कुलेपतिसंतानादौनतुपत्यावर्तेनादेत्वात् तस्यग्रहणशंकासत्वात् तथाच
रक्षणासमर्थतयाएतद्रव्यंदातुमिच्छत्यपिनदद्यादितिभावः॥ अथ॥ भर्त्राप्रीतेनयद्द
त्तंस्त्रियैतस्मिन्मृतेपितत्॥ सायथाकाममश्नीयात् दद्याद्वास्थावराद्दते॥ इत्येननभ
र्तृदत्तस्थावरस्यदानं निषिद्धंनारदेन ततश्चतत्स्थावरं स्त्रियाकिंकर्त्तव्यमित्यत्राह॥ अ
पुत्रेत्यादितृतीयश्लोकं तत्रचअपुत्राइत्यनेनभोगप्रसक्तिरायाता पुत्रवत्यास्तुपुत्रेणैवपो
षणात् नभोगसंगतिः॥ भ्रातृणामप्रजः प्रेयात्कश्चिच्चेत्प्रव्रजेत्तवा॥ विभजेरन्धनंत
स्यशेषास्तेस्त्रीधनंविना॥ भरणंचास्यकुर्वीरन्स्त्रीणामाजीवितक्षयात्॥ रक्षंतिशा
य्याभर्तुश्चेदाच्छिन्द्युरितरासुच॥ इतिनारदवचनात् व्यभिचारीणांस्त्रीधनस्याच्छेद
नीयत्वादाह॥ शयनंभर्तुः पालयन्तीतितस्यातिदुष्करत्वादाह॥ गुरौस्थितेतिगुरौश्वसु
रादौतदभावेपित्रादौवास्थितात्तद्धनंभुंजीतक्षान्ताअनतिव्ययिनीतिनिवधारः॥
तथाचप्राणधारणार्थंभुंजीतिवनतुसूक्ष्मवस्त्रपरिधानादिकंकुर्यादिभावः॥ आ
भरणात्तुभोगपरिसंख्ययादाननिवृत्तिरायाता अथपत्न्यामरणोत्तरंतद्धनंकुत्र
तिष्ठेदतआह॥ दायादाइतिस्त्रीधनाधिकारिणइत्यर्थः अनुवादोयंआकांक्षापू
रणाय अथवाभर्तृदत्तस्थावरेस्त्रियाः स्वत्वेपिवाचनिकोदाननिषेधोभर्तृदाया
द्व्यतिरिक्तेगमनं वारयति तथाचपत्न्याऊर्द्ध्वंतद्धनंभर्तृदायादाएवप्राप्नुवंतिइतिअ
यंचपंथाः चंडेश्वरादिभिर्जीमूतवाहनादिभिश्चनलिखितः॥ किंतुसौदायिकस्त्रीध
नप्रकरणीयकात्यायनवचनस्वरसात् भर्तृदत्तस्थावरदाननिषेधात्तस्यस्त्रियाऊर्द्ध्वं
भर्तृदायादव्यतिरिक्तेगमनं नवेत्याकांक्षावलात् विधिसंभवेतुवादस्यान्याय्यत्वाच्चात्र
लिखितः अथयदिभर्त्रास्वेच्छयादत्तमपिस्थावरंस्त्रियादानायनसंपद्यतेतदातुसुतरां
अर्थतः सिद्धस्वामिभाविस्वसंक्रांतपतिस्थावरेपत्न्यादानानधिकारः इतिस्वसंक्रांतपति १३१
स्थावरस्यपत्न्याअदेयत्वमस्तुपरंपत्न्याऽदत्तंचिरंपालितंचस्वसंक्रांतपतिस्थावरंरक्षि ३०

श्लोकः २५

त्वा मृतायां पत्न्यां तद्धनं कुत्र तिष्ठतीति चेत् स्त्री धनाधिकारिणां विवक्षित विवेकेन पारिभा
षिक स्त्री धनाधिकारस्यैव शास्त्रेणा बोधनात् अत्रानधिकारत्वे सिद्धे भर्तुरुत्तराधिकारि
णः प्रक्रमप्राप्तस्य तत्राधिकारः कल्प्यते तत्र च यस्यामविद्यमानायां यस्याधिकारः संभा
वितः तस्यां मृतायां तस्यैवाधिकारः ॥ अयं च प्रकारो दुहित्रधिकारो जीमूतवाहनेनादृतः अ
त्रेदमवधेयं स्त्रिया शिल्पादिना प्राप्त धनस्य कैश्चित् पतिस्वत्वांगीकरणे पितृधने पत्न्याः
प्राधान्यमिति तत् स्त्री धनाधिकारिभिरेव ग्राह्यं ॥ ये तु तत्र पतिस्वत्वं नांगी कुर्वीत तन्मते पित
था ननु स्त्री धनाधिकारिणां पारिभाषिक स्त्री धनमात्र ग्राहित्वेन कथनात् कथमेतद्धनग्रा
हित्वमिति चेत् पतिप्रधानकधने पतिदायादानामिव पत्नीप्रधानकधनेपि पत्नीदायादाना
मेवाधिकारः शास्त्राभावेपि यौक्तिकोन्यायः इति धलायुध पारिजात मत सवलम्ब्याहुः ॥ इदं च
मतं स्वसंक्रांत पतिस्थावरस्य दान विशेषे [illegible] तस्य पतिदायादगमने च सर्वानेव ग्रंथकारा
नुपजीवति स्वसंक्रांत पतिजंगमे यथेष्टदान विक्रये विवादरत्नाकर विवादचिंतामणी ॥ भर्त
दत्तस्थावरस्य पत्न्या ऊर्द्ध्वं पतिदायादगमने मुनिवचन संदर्भमुपजीवति ॥ अत्र च पितामह मतं
विवादरत्नाकर विवादचिंतामणिमतं जयतीति बोध्यं ॥ एवं रत्नाकरादिभिः पत्नीसंक्रांत प
तिजंगमधनं ॥ पत्न्या ऊर्द्ध्वं पत्नीदायादानेव गच्छति ॥ अपुत्राशयनं भर्तुरित्यादि वचनस्य स्था
वरमात्र विषयकत्वादित्यवश्यांगीकरणीयमिति पत्न्या अपुत्र धनाधिकारे सांगोपांगे सिद्धे
तद्धरुद्धमुनिवचनानि व्याख्यानार्थं लिख्यन्ते यथा शंखलिखितपैठीनसयः ॥ अपुत्रस्य स्वर्यात
स्य भ्रातृगामि द्रव्यं तदभावे पितरौ लभेतां पत्नी वा ज्येष्ठा गोत्रशिष्य सब्रह्मचारिणः अत्र आ
द्यो भ्रातुस्ततः ॥ पित्रोः पत्न्यास्तत्रैव विकल्पः पित्रोरभावे वाऽधिकारो बोधितः तथा देवलः त
तो दायमपुत्रस्य विभजेरन् सहोदराः तुल्या दुहितरो वापि ध्रियमाणः पितापि वा ॥ सवर्णा भ्रा
तरो माता भार्या चेति यथाक्रमं ॥ अत्र सवर्णाभ्रातरो वैमात्रेयाः अनेन चान्यक्रम उक्तः स
होदरानंतरं दुहितृनुसंधानात् पितृभाव एव वैमात्रेय भ्रात्रनुसंधानात् तथा नारदः ॥ भ्रातृणा
मप्रजः प्रेयात् कश्चिच्चेत् प्रव्रजेत वा ॥ विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना ॥ भरणं चास्य
कुर्वीरन् स्त्रीणामाजीवितक्षयात् ॥ रक्षंति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु च ॥ तथा स एव ॥
अन्यत्र ब्राह्मणात् किंतु राजा धर्मपरायणः ॥ तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः
॥ अनेन राज्ञो ग्रहणाभावे कदाचित् ॥ पत्न्या अधिकारं संभावयति तथा वशिष्ठेनापि अथ
भ्रातॄणां दायभागो याश्चानपत्याः स्त्रियस्तासां चापुत्रलाभादित्यनेन पुत्रलाभसंभावना
रहितत्वेऽपुत्रधनस्य तस्यामपि भार्यायां भ्रातृगामित्वमभिहितं अत्र आपुत्रलाभादिति
पत्न्याहितगर्भविषयमिति मिश्राः ॥ अपरे तु क्षेत्रज पुत्र संभावनयापि अंशः स्थापनीय इत्यभि
प्रेत्य युगांतरीयाद्व्यं व्यवस्था इदानीं च भ्रातृस्वत्वे पत्न्या भागानधिकारित्वमेव प्रयोजनं अने

नोक्तं इत्याहुः अत्र नामामुविभिः पत्नीसत्वे भ्रातुर्भ्रातृसत्वे च [illegible] अधिकार उक्तः [illegible]
[illegible] अतो विरोधः ॥ न च यैः पत्नीसत्वे भ्रातुरधिकार उक्तः तैः पत्न्या जीवनदानमुक्तमेवा
तः पत्न्यधिकारबोधकानि वचनानि पत्न्या जीवनतात्पर्याणि वाच्यानि परस्परैकवाक्यत्वात्
इति वाच्यं कृत्स्नमंशं लभते चेत्यनेन सकलपतिधनाधिकारस्यैवोक्तत्वात् अत्र बालरूपः ॥
विभक्ताः सह जीवन्तो विभजेरन् पुनर्यदि ॥ समस्तत्र विभागः स्यात् ज्येष्ठं तत्र न विद्यते ॥ तेषां
ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः । म्रियेतान्यतरो वापि तस्य भागो न लुप्यते ॥ सोदर्या विभ
जेरंस्तं समेत्य सहिताः समं ॥ भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥ इति मनुवचनात् वि
भागानंतरं यन्नवधनं तन्मम धनं इति नियमेन पुनरेकपाकेन वसतां पुनर्भागकरणे ज्येष्ठांशो
न देयः अथ कश्चित् प्रव्रज्यादिना मरणेन वा यदि निरंशो जातः तस्य भागो न लुप्यते किंतु त
स्याप्येकोऽशः करणीयः स्वांशः असंसृष्टैरपि सहोदरैः संसृष्टैश्च वैमात्रेयैरपि विभज्य ग्र
हीतव्यः भगिनीनां सहोदराणाम प्राप्तविवाहोचितुरीयांशानां तुरीयांशो देयः विवाहाय ए
तच्च भगिनी तुरीयांशकथनं एकैकपुत्रदुहितृसवितृणां मातृणाममुसारेण पूर्वभागस्थले
बोध्यमित्यर्थकात् संसृष्टभ्रातृणां संसृष्टानां च संसृष्टीत्यनेन प्राप्ताधिकाररूपाणां सत्याम
पि पत्न्यां अपुत्रधनेऽधिकारः असंसृष्टिनस्तु अपुत्रस्य धने पत्न्या अधिकार इत्याह तन्न जीमू
तवाहनाभिमतं ॥ विभक्ता भ्रातरो ये च संप्रीत्यैकत्र संस्थिताः पुनर्विभागकरणे तेषु ज्यैष्ठ्यं न
विद्यते ॥ यदि कश्चित् प्रमीयेत प्रव्रज्येत कथंचन ॥ न लुप्यते तस्य भागः सोदरस्य विधीयते ॥
या तस्य भगिनी सा तु ततोऽशं लब्धुमर्हति ॥ अनपत्यस्य धर्मोयमभार्यापितृकस्य च ॥ इति
प्रायो मनुवचनसमानार्थकबृहस्पतिवचनेऽभार्यापितृकस्येति कथनेन भार्यासत्वे
संसृष्टिनोपि भ्रातुरनधिकारित्वबोधनात् जीमूतवाहनेनान्येषामपि बहूनां दोषाणामुप
न्यासाच्च तेऽत्र ग्रंथगौरवभयान्न लिखिताः ॥ एकेनैव दोषेणास्वार्थस्य सिद्धत्वात् कुल्लूकभ
ट्टोपि एतत् संसृष्टिगोचरमनुवचने एतच्च पुत्रपत्नीपितृमात्रभावे द्रष्टव्यमित्युक्तवानिति
विभावनीयं ॥ वाचस्पतिमिश्रस्तु पत्नीसत्वभ्रात्रधिकारबोधकवचनानि अविभक्तभ्रातृधन
विषयकाणि भ्रातृसत्वे पत्न्यधिकारबोधकानि उक्तानि भ्रातृविभक्तपतिधनविषयकाणि
यतोऽविभक्ते पत्यौ मृते तद्धनस्य सर्वभ्रातृस्वामिकत्वेन इदं पतिधनमिति निर्देशाभावात् प
त्न्यधिकारो न संभवत्येव न च पत्नी देवरादितो विभज्य गृह्णीयादिति वाच्यं पित्रोरभावे भ्रातॄ
णां विभागः संप्रदर्शित इत्यादिना लभेतांशं स पित्र्यं तु पितृव्यात्तत्सुतात् लभेत तत्सुतो
वापि निवृत्तिः परतो भवेत् ॥ इत्यादिना च भ्रातृतत्पुत्रपौत्रादीनामेव भागग्राहित्वस्य शास्त्रेणो
क्तत्वात् पत्न्याश्च भागग्राहित्वे शास्त्राभावात् न च पत्न्यधिकारबोधकवचनान्येव अन्यथानु
पपत्त्या पत्न्या विभागबोधकानीति वाच्यं एषां वचनानां विभक्तधनाधिकारपरत्वेनाप्युपपत्ते 20

रंन्यथानुपपत्त्यसंभवात् अतएवअथस्मात् एणांदायभागोयाश्चनपत्न्यास्तासामापुत्रलाभा
दितिवशिष्टेनपुत्रलाभपर्य्यन्तमेवानपत्यस्मात्भार्य्यायाविभागग्रहणमुक्तं वस्तुतःसना
गः पुत्रस्यैवअनुत्पन्नेतुपुत्रेसभागोभ्रातृभिरेवविभज्यया स्याद्दुत्यभिप्रायः अन्यथाआपु
त्रलाभादित्यस्यवैयर्थ्यापत्तेरित्याहुः तदपिनरुचिरंप्रतिभाति॥ पत्न्येवदद्यात् तत्पिंडंकृत्
स्नमंशंलभेतच॥इतिवृद्धमनुवचने अंशयदृस्वरसेनपत्न्याविभागावगतेः नहिपूर्वविभक्तध
नग्रहणेवक्तव्येऽंशशब्दप्रयोगःक्रियतेअंशस्यसमुदायधनसापेक्षत्वात् एवद्ग्रहणकालेचस
मुदायधनत्वाभावात्तच्च॥कृत्स्नमंशंलभेतइतिपाठोजीमूतवाहनादिसम्मतः॥कृत्स्नमर्थंल
भेतइतिपाठमिश्रादिसम्मतः॥अतस्तत्पाठानुसारेणपत्न्याविभागावगतिर्न्नभवतीतिवाच्यं॥
सकुल्येविद्यमानेस्तु पितृमातृसनाभिभिः। असुतस्यप्रमीतस्यपत्नीतद्भागहारिणी॥इतिवृ
हस्पतिवचनेन पत्न्याविभागावगतेः समाभयःसोदराइतिजीमूतवाहनः॥समानानाभिर्गर्भ
स्थितिस्थानंयेषामितिवहुव्रीहिरितिभावः॥अत्र॥सहैवदशभिःपुत्रैर्भारंवहतिगर्द्दभी॥इति
वर्त्तमानकालार्थसहशब्दयोगात् तृतीया सहशब्दस्यात्रोहनीयः तदर्थश्चसनाभिषुविद्यमानेषुइ
ति असुतस्यप्रमीतस्यपत्नीतद्भागहारिणी॥प्रमीतपतिभागहारिणीत्यर्थः॥अतएवपत्नीदुहि
तरश्चेत्यादिवचनेभ्रातरोवैमात्रेयाविभजेरन्इतिविवक्षणीयं॥तथाचसहोदराणांपत्न्याःपूर्वं
अधिकारः वैमात्रेयाणांतुतत् पश्चात्इत्यपिसमाधानंहेयं वृहस्पतिवचने सहोदरेपिसतिपत्न्या
अधिकारबोधनात् युज्यतेचैतत् विभक्तधनानुरोधात् पत्नीस्वत्वं प्रतिपुत्रास्तत्वसहितपतिस्व
त्वनाशत्वेनसामान्यतःकारणत्वेअविभक्ते संसृष्टेपिधनेपत्नीस्वत्वात्प्रत्तौबाधकाभावात् विभ
क्तधननिवेशस्तुतत्रानुचितोगौरवात् शास्त्राभावाच्च एतद्वचनानांउपपत्तिस्तुजीमूतवाहनादि
रीत्यापिभवतीतिध्येयं चंडेश्वरस्तुवृद्धमनुवचनेव्रतेस्थितेतिदर्शनात् तस्यचशम्भवतीविशेष
णत्वेस्वरूपवादस्यान्यायत्वात् व्रतेस्थितायाएवपत्न्याःदुहितृभ्रात्रादिभ्यःमुख्यत्वं अव्र
तायाश्चाव्यभिचारिण्यादेवरादिभरणीयतामात्र॥विधवायौवनस्थाच्चनारीभवतिकर्कशा।
आयुषःक्षपणार्थंतुदातव्यंस्त्रीधनंसदा॥इतिहारीतवचनात्। व्यभिचारिण्यस्तुनिर्वास्या
आच्छिन्द्युरितवास्तुच॥इतिनारदवचनस्वरसात् दृश्यतेचदत्तकपुत्रादीनांगुणयोगेनैवदा
याधिकारः। ननुमरणानंतरमेवव्रतादिगुणायोगाभावात् कथंदायाधिकारित्वमितिचेत्।
विधवानियमधांमुख्येनैव धनाधिकारित्वं अनंतरंचदैवात् मतिभ्रमेपूर्वाधिकारितानश्य
त्येव इतिहारीतवचने यौवनस्थाइत्यनेनव्यभिचारसंभावनैवद्योत्यतेनतुयौवनवयोमात्रं
दृष्टं युवत्याअपिकस्याश्चित्प्रसिद्धशुशीलायाअधिकारस्यसर्वसिद्धत्वात् कर्कशाइत्यनेन
विधवानियमवर्जनंद्योतितंविधवानियमश्च॥तांवूलाभ्यंजनेचैवकांश्यपात्रेच्चभोजनं॥य
तिश्चब्रह्मचारीच्चविधवाचविवर्जयेत्॥इत्यादि॥पर्य्यंकशायिनीनारीविधवापातयेत्पतिं॥इत्या

दि॥ एकादशीव्रतादिश्च अत्रच अपुत्रस्य भ्रातृगामिद्रव्यं तदभावे मातापित्रोलभेतां॥ पत्नीवा
ऽज्येष्ठा सगोत्रशिष्य सब्रह्मचारिणः॥ इतिपैठीनसिवचने अज्येष्ठा अप्रसक्तगुणवतीभा
र्य्यामातापित्रभावेपतिधनाधिकारिणीइत्यर्थः एतच्चपितृद्रव्यानुपष्टंभेनस्वयमर्जितमा
तापित्रपेक्षयाप्रथमंभ्रातुरधिकारः और्द्ध्वदैहिकक्रियायांप्रथमाधिकारात् अत्रच्च्या
तरः सहोदरवैमात्रेयाश्च उपकारतारतम्यात् क्रमेणाधिकारिणः सहोदराणान्तुज्येष्ठक
निष्ठयोरुपकारतारतम्येपिपार्वणपिंडेउपकारतारतम्याभावात् नक्रमेणाधिकारः
किंतुयुगपदेव अत्रेदंबीजं अपुत्रस्य धनाधिकाराकांक्षायांभ्रातृणापित्रोश्चोपस्थितौपि
त्रोः पार्वणपिंडगोक्तृत्वेनजननकतृत्वेनचउपकारात् भ्रात्रोश्चस्वकर्तव्यपार्वणश्राद्धक
रणेन और्द्ध्वदैहिककरणेनचउपकात्द्वयोः समानत्वेपारलौकिकक्रियायागौरवमंगीकृ
त्यपुत्रादिवत् पितृपूर्वंभ्रातृणामधिकारः तत्रचवैमात्रेयभ्रातृणांमातृपार्वणानधि
कारात् सहोदराणांपश्चादधिकारः सहोदराणामपिकनिष्ठस्यत्वेज्येष्ठस्यऔर्द्ध्वदैहिक
क्रियानधिकारेपिदायग्रहणेत्वयोग्यत्वानंगीकारात् युगपदधिकारः अन्यथापुत्रादि
कोरपितथान्यायः प्रवर्तते ज्येष्ठस्यपितुरौर्द्ध्वदैहिकाधिकरित्वात् एवंवैमात्रेयपित्रोर्द्व्यं
॥ मातापित्रोः क्रमस्तु अग्रेवक्ष्यमाणोद्रष्टव्यः पित्राद्युपष्टम्भेनार्जितेतु धनोपार्जनोपकार
स्याधिकृस्यसत्वादानन्तर्य्यच्चि भ्रातृतः पूर्वमपिपित्रोरेवाधिकारः याज्ञवल्क्ययुक्तः॥
तदभावेऽज्येष्ठापत्नी अज्येष्ठाइतिविशेषणात् सकलवैधव्यविहितनियमवत्यायाज्ञव
ल्क्यादिवचनात् भ्रातृतः पूर्वमेवाधिका[redacted]रः अपुत्रस्येति एकशेषात् पुत्रपुत्र्युभयही
नपरंतथाचापुत्रस्येतिपुत्रगुणवत् पत्नीदुहितृपर्य्यन्तरहितस्यत्यर्थः एवंदौहित्रस्यपा
र्वणपिंडदानेनभ्रात्रपेक्षयावलवत्वात्तभ्रात्रपेक्षयापूर्वंऊर्द्ध्वदैहिकक्रियाधिकारात् यथा
पितृधनेतस्याः स्वाम्यंसतत्स्वपित्र्यंधुवु॥ तथैवतत्सुतोपीष्टेमातृमातामहेधने इतिवृह
स्पतिवचनाच्चदौहित्रानंतरमेवभ्रातृरधिकारः॥ तथाचापुत्रस्यस्वोपार्जितधने आदौगुण
वत्याः पत्न्याअधिकारः ततोदुहितुः ततोदौहित्रस्य ततःसहोदरभ्रातुः ततोवैमात्रेयभ्रातुः॥
ततःसहोदरभ्रातुष्पुत्रस्यततोवैमात्रेयभ्रातृपुत्रस्य ततोमातुः ततोपितुः ततोल्पगुणायाः
पत्न्यानिर्गुणायास्तुभरणमात्रंअधिकारिणादेयं॥ अल्पगुणपत्न्यभावेगोत्रजादेरितिक्रमः
अत्रदुहितादिक्रमः दुहित्रधिकारेद्रष्टव्यः॥ भ्रातृपुत्रस्यक्रमक्षहरत्वे। प्रमाणंभ्रातृपुत्रा
धिकारेद्रष्टव्यं एवंचस्वोपार्जिते [redacted] धनाधिकारक्रमस्यपि
द्रव्येनपित्राद्युपष्टम्भार्जितेऽयमेवक्रमोग्राह्यः धनगत विशेषप्रयुक्तपितृभ्रातृव्युत्क्रम
स्तत्रनादेयएवकिंतु याज्ञवल्क्याद्युक्त एवक्रमस्तत्रग्राह्यः पित्राद्युपष्टम्भार्जितेधनेऽल्प १३२
गुणायाः पत्न्याउपकारकत्वाभावात् तत्रक्रमभंगोनकर्त्तव्यएवं एवंचयत्रयत्रवचनेपत्न्या ४०

वर्त्तनोचितद्रव्यदानमात्रमभिहितं तत्र निर्गुणैव पत्नी ज्ञेया एवं अल्पगुणायाश्च भ्रात्रादिभि
र्भरणमावश्यकं ॥ धनिपोष्यत्वात् यत्तु भ्रातृभार्य्याणांतु स्नुषाणांच न्याय प्रवृत्तानांअ(न)थ
त्यानां ॥ पिंडमात्रं गुरुर्दद्यात् जीर्णानिवासांस्यविकृतानि ॥ इति शंखवचनं तत्पुत्रस्य भ्रातु
श्च धनग्राहिणि पितरि भ्रातरि चेज्ज्ञेयं देवलवचने च यथाक्रममिति यथाप्रसिद्धक्रममि
त्यर्थः क्रमप्रसिद्धश्च विष्ण्वादिवचने द्रष्टव्या इति व्याचष्टे ॥ केचित्तु अत्र शंखवचनेन अ
वीरास्नुषाभ्रातृभार्य्ययोः ग्रासाच्छादनं श्वशुरदेवरादिभिस्तत्पतिधनाग्राहिभिरपि देयं व्य
वहारोपि प्रायस्तथैव कैश्चिदादियते एवंच योयस्यधनंगृह्णीयात् सतस्यपत्न्यादिभ्यः स्नु
षायै भ्रातृभार्य्यायै चान्नं दद्यात् यदितु तद्दातुं न शक्नोति तदा तयोर्जीवनपर्य्याप्तं तद्धनं न गृह्णी
यात् किंतु अनयोर्ग्रासाच्छादनदानं नातिनित्यं ॥ वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः
॥ अप्यकार्य्यशतं कृत्वा भर्तव्या मनुरब्रवीत् ॥ इति मनुवचनेऽगणनात् किंतु सति संभवे कर्त्तव्य
मेव यथा पत्न्यधिकारे वृहस्पतिना ॥ पितृव्यगुरुदौहित्रान् भर्तुः स्वस्त्रीयमातुलान् ॥ पूजये
त्कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः इति मनुवचनेन अपुत्रधनाधिकारिक्रमसूलीभूता
याः पत्न्या वृद्धानाथादिपूजनोपदेशादन्यस्यापि तथा कल्पयितुं युक्तत्वादिति च एडेश्वरमतपरि
शेषं वदन्ति ॥ एतच्च एडेश्वरमतं शास्त्रानुसारी किंतु जीमूतवाहनमतसंवादीति मंतव्यं अत्र
जीमूतवाहनः ॥ पत्नी दुहितरश्चैवेति क्रम याज्ञवल्क्यवचनात् अनपत्यस्य धनं पत्न्यभिगामि
स्यादिक्रमपरविष्णुवचनात् ॥ भ्रात्रादीनां पूर्वं पत्न्या एवापुत्रधनाधिकारः ॥ तत्स्त्रीणां जीवनं
दद्यात् इत्यादौ स्त्रीपदं पत्नीभिन्नस्त्रीपरं ॥ तस्याश्च कदाचिदपि अपुत्रधनकृत्स्नाधिकारि
त्वं नास्ति ॥ न स्त्री मूर्ख विधर्म्मिषु इत्यनेन निषेधात् पत्न्यादिवत् विशेषशास्त्राभावाच्च पत्नी
दुहित्रादीनां विशेषशास्त्रेण न स्त्री मूर्ख विधर्म्मिषु इति सामान्यशास्त्रस्य नाधाद पुत्रधना
धिकारित्व अतएव ब्राह्मणान्य धने सर्वाभावे अधिकारी राजा पि धनभार्य्याभरणं कुर्य्यादि
दि ॥ तत्स्त्रीणां जीवनं दद्यादित्यनेन नारदेनाभिमतं ॥ पत्नी च ज्येष्ठापत्नीत्यभिधानात् ज्येष्ठा
ज्येष्ठत्वं चात्र न वयःकृतं न वा गुणकृतं किंतु यदि स्वाश्च पराश्चैव विंदेरन् योषितो द्विजाः ॥ ता
सां वर्णक्रमेणैव ज्येष्ठ्यं पूजा च वेश्म च ॥ इति मनुवचनात् वर्णकृतं तथा च कलीतरयुगे त्रिव
र्णविवाहः कदाचित् चातुर्वर्ण्य विवाहश्चासीत् तत्र तिसृणां च तसृणां वा भार्य्याणां मध्ये स
वर्णायाश्च ज्येष्ठत्वं इति वर्णक्रमः ॥ नन्वेवं ब्राह्मणस्य ब्राह्मणीविवाहाभावे क्षत्रियापि तद
भावे वैश्यापि ज्येष्ठा भवितुमर्हतीति इत्यत आह ॥ भर्तुः शरीरशुश्रूषां धर्म्मकार्य्यं च नैत्यकं ॥ स्वा
चैव कुर्य्यात् सर्वेषां नानाजातिः कथंचन यस्तु तत्कारयेन्मोहात् स्वजात्या स्थितयान्यया ॥
तथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः ॥ तथा च सवर्णाया अभावे अन्यवर्णायापि धर्म्मका
र्य्यं कर्त्तव्यं इतीष्टमेव अन्यवर्णाया यत् कर्त्तव्यं तदपि अनंतरवर्णाया एवेत्याह ॥ विष्णुः सव

र्णाभावेत्वनन्तरयैवापदिनत्वेवद्विजः शूद्रया धर्मकार्य्यंकुर्य्यादित्यनुवर्त्ततेतेनब्राह्मणस्य
ब्राह्मणीपत्नीतदभावेक्षत्रियाप्यापदिनतुपरिणीतअपिवैश्याशूद्रे इतिजीमूतवाहन
निगर्व्वः तत्रयद्यपिब्राह्मणस्यवैश्याशूद्रयोरपिभार्य्ययोरपिभार्य्ययोर्धर्मकार्य्यसहका
रित्वंमास्तुउत्तमोत्तमवर्णासपत्न्यभावेज्येष्ठत्वंकेनवारणीयं वर्णक्रमस्यसत्वादितिकैश्चित्
प्रलपितमवतरति तथापिनतेनप्रकृतक्षतिः तथाहिब्राह्मणस्ययत्रवैयत्थाशूद्राभात्र
विवाहस्तत्रास्तुवैश्यायाः पत्नीत्वेनधनाधिकारित्वंकिंतुनतत्रशूद्रायाःचातुर्वर्ण्यविवाह
स्तलेचक्षत्रियादेरपिअपत्नीत्वेनजीवनमात्रग्राहित्वं नचतथापिधनैर्भार्य्याणांराज्ञाच
भरणीयत्वमनुपपन्नं पत्न्याएवतत्रधनाधिकारादितिवाच्यं पत्न्यामरणेतयाउपेक्षायां
चदुहित्रादिभिर्दैवरादिभिः राज्ञाचभरणीयत्वसंभवादितिअलमिदंचातुर्वर्ण्यविवाहविवे
चनेन इदानींतन्निषेधात् परंतुमुनिवचनानांपरस्परविरोधपरिहारायजीमूतवाहनेन
तदुपन्यासःकृतांतथाचविवाहितायाःपत्न्याएवविभक्तेऽविभक्तेसंसृष्टेऽसंसृष्टेचपतिध
नेसत्त्वपिदुहित्रादिसुअधिकारः देवलवचनेचभार्य्यापदंपत्नीपरंविशेषपरत्वात् यथा
क्रममितियथा याज्ञवल्क्यादिक्रममित्यर्थः पैठानसिवचनेचव्यवहितयोजनाकार्य्याय
थाऽपुत्रस्यधनं ज्येष्ठापत्नीलभेतपितरौवातदभावेभ्रातृगामीति अत्रशास्त्रसंवादोपिते
नदर्शितः वर्त्तनोचितद्रव्यग्रहणबोधकवचनेकुत्रापिपत्नीपदंनास्तीति हलायुधकल्पत
रुकारमतमवलम्ब्यसमाधत्तेस्मात्तभट्टाचार्य्यादयोपिएवमेवानुगच्छंति अत्रचण्डेश्वरम
तानुसरणेभ्रात्रधिकारविषयेशिष्टाचारविरोधः अनंतरःसपिंडाद्यद्दत्वादिमनुवचनविरो
धश्च जीमूतवाहनमतानुसरणेसवर्णाभार्य्याद्वयवतोमरणेतद्धनेज्येष्ठाएवाधिकारिणी
यतः प्रथमाधर्मपत्नीतुद्वितीयारतिवर्द्धिनी। इतिदक्षवचनेनसवर्णासुबहुषुभार्य्यासु
विद्यमानासुज्येष्ठयैवसहधर्मकार्य्यंकुर्य्यादितिविष्णुवचनेनचएकवाक्यतयाज्येष्ठापत्नी
तिवचनेनचपत्नीपदंधर्मपत्नीपरमितिइतराणुभरणीयैवइतिमदनपालस्तुसामान्यतः
सर्ववर्णानांस्त्रीणांचतुर्वर्णपुत्रवत् विभागमाहस्त्रियाऊर्द्धंदुहितृदौहित्राभावसपत्नीदु
हित्रधिकारंचाक्षवतस्त्वस्त्रियाऊर्द्धंतद्धनंस्त्रियाउत्तराधिकारिणएवभवतीत्यत्रैवतत्स्व
रसःअवगम्यते तथाचस्मार्त्तजीमूतवाहनमिश्रचण्डेश्वरमतेभर्तुरुत्तराधिकारिणामधि
कारःएकप्रकरणीयवचनस्यान्यार्थकत्वमादृत्यमदनपालस्यमतेतद्वचनस्यप्रकरणार्थ
कतावलम्बनात् भार्य्येत्तिराधिकारिणामधिकारइतिसंक्षेपः अतश्चण्डेश्वरमतेनात्रवि
षये जीमूतवाहनमतंव्यावर्त्तयितुंनशक्यते गुणदोषाभ्यांसमानत्वात् किंतुव्यभिचारिणी
मांकिंचिदपिनदेयंएवंव्रतेस्थितेतिविशेषणात्प्रथमान्याभ्योऽव्यभिचारिणीभ्योवर्त्तनोचित ७३४
मात्रमेवदेयं॥कोऽर्थस्तेनचपुत्रेणयोनविद्वान्नधार्म्मिकः॥शास्त्रशौर्य्यार्थरहितस्तपोज्ञा ४१

पत्रांकः२५

नविवर्ज्जितः॥आचारहीनः पुत्रस्तु मंत्रोच्चारसमस्तुसः॥इत्यनेन निर्गुणपुत्रस्यापि भागानधि
कारित्वकथनेन सुतरां पत्न्या निर्गुणत्वे तथा व्यवस्थापयितुं युक्तत्वात् किंचिद्गतसत्वेतु व्रतस्थि
तत्वावधाद् अधिकारिणी भवत्येव इति विभावनीयं॥ अपरेतु॥ विधवा यौवनस्था च नारी भवति
कर्कशा॥ इत्यादिनो फलतो गुणाभाववत्या ग्रासाच्छादन कथनात् इदं मनुवचनेन व्रते स्थिता
या एवाधिकारित्वकथनात् बृहस्पतिवचने पत्न्या अंशग्राहित्वकथनानंतरं श्राद्धादिति तत्र
कर्म्मकरणविधानात् पत्न्या गुणाभावे पत्युपकाराभावाद्गुणवत्या अधिकारित्वं निर्गुणाया अन
धिकारित्वं तु सवर्णासवर्णाभेदेन व्यवस्था क्वचिदपि वर्त्तनोचितद्रव्यदानवचनेऽसवर्णानुप
देशात् असवर्णापुत्रस्य सवर्णापुत्रेण विभागरीत्या अत्रापि असवर्णाया भागग्रहणस्य युक्त
त्वाच्च किंतु वर्णानुसारेण विषमविभागः सपत्नीनां परस्परविभागश्च केनापि मुनिना न लिखितः
अथापुत्रस्य भ्रातृगामि द्रव्यं इति पैठीनसिवचनस्य का गतिः चेत् उग्रतरीत्य वलंवने शिष्टाचा
रविरोधात् मनुवचनविरोधाच्च व्यवहितयोजनायां याज्ञवल्क्यादिवनेपि तथासंभवेनानध्य
वसायापत्तेः इति चेत् सत्यं भर्तृकाय त्र गुरुनियोगेन क्षेत्रजद्वयं जनयित्वा परित्यज्य च शुक्र
लमाश्रिता तत्रैकस्य क्षेत्रजस्यापुत्रस्य मरणे पैठीनसिवचनं वाद्रव्यं तत्र च पितरौ जननीजन
कौ वाद्रव्यौ अज्येष्ठा पत्नी च सर्वत्र भ्रात्रादि वाध्या इति॥ यद्वा भ्रातृद्रव्योपघातेनार्जित धनवि
षयं भ्रातृगामि द्रव्यमिती आहुः॥ ननु जीमूतवाहनमते॥ दंपत्यो र्मध्यगं धनमिति वचनात्
जीवत्येव पत्यौ तद्धने जायाया अधिकारात् पतिमरणोत्तरं तन्नाशकाभावाच्च तद्धने कथं देव
रादेरधिकारः इति चेन्न पतिस्वत्वनाशेनैव तन्नाशकल्पनात् अत एव पत्या दत्तेपि पत्नी स्वत्वनि
वृत्तिः अथ पेवदन्ति पितुरूर्द्धं विभजतां माताप्यंशं हरेदिति वचने पुत्राणां विभागकरणे मात्रे
यत् भागदानमुक्तं तत्र मूलपितृपत्नीत्वेन पितृधनस्वामित्वं अत एव जीवत्पितृकविभागे
भ्रातृविभागे च अपुत्रायै सपुत्रायै च पितृपत्न्यै विभागदानं तेव दंति अत एव॥ भवदेवः॥ प
तिधने तस्मिन् जीवत्यपि दंपत्योर्मध्यगं धनं॥ इत्यादि दत्तवचनैः पत्न्या अप्यधिकार आसी
त्तस्मिन् मृते॥ समांशहारिणी माता पित्र्याणां स्यात् मृते पतौ॥ इति दत्तवचनात्॥ पुत्रतुल्यां
शभागिनी इति पत्न्यधिकारे आह॥ तथा च तेषां मते धनिभार्य्या॥ पुत्रादिवद्देवरादपि अंशं
लभतामिति चेत् उत्तर्न्नोचितद्रव्यदानेनैवतादृशस्य गौणस्वत्वस्य फलसिद्धिः पुत्राणां तु म
हागुरुत्वान्न तत्समांशदानमिस्य वधेयं पत्नीसंक्रांतं पतिधनं तु पत्न्या ऊर्द्धं पतिदायादगा
मीति बहुग्रंथकारमतं बृहस्पतिः ततः सपिंडा वांधवा वा येतस्याः परिपंथिनः॥ हिंस्युर्धनानि ता
न् राजा चौरदंडेन शासयेत्॥ पत्न्या असंस्कृतकन्यासंस्कारादिश्च कर्त्तव्यः इति अपुत्रधनाधि
कारे पित्न्याधिकारः तदभावे दुहितुरधिकारः॥ पत्नी दुहितरश्चेत्यादि याज्ञवल्क्यवचनात् अ
नपत्यस्य धनं पत्न्याभिगामि तदभावे दुहितृगामीति विष्णुसूत्राच्च अत्र मनुः यथैवात्मा तथा

(श्लोकः २)

पुत्रपुत्रेणदुहितासमा॥ तस्यामात्मनितिष्ठन्त्यांकथमन्योहरेद्धनं॥ बृहस्पतिअंग्यादंगात्
संभवतिपुत्रवत्दुहितानृणां॥ तस्यापितृधनंत्वन्यःकथंगृह्णीतमानवः यादृशीसापितृ
ऋक्थग्राहिणीतामाह॥ सएवयादृशीसदृशेनोढासाध्वीशुश्रूषणेरता॥ कृताकृतावापुत्र
स्यपितुर्धनहरीतुसा॥ अपुत्रस्यमृतस्यकन्याकुमारीगृह्णीयात्तदभावेचोढाचेतिपराशरस्व
नात्तथैवाचक्रमः इतिबालरूपः नचैतत्सर्वंपुत्रिकाविषयंअकृतेतिवचनंकृताभिसंधानात्
ऽकृतेत्येतत्परमितिवाच्यं तस्याःपुत्रसत्वेपिपुत्रसमधनग्रहणस्यमनुनाभिहितत्वादितिमि
श्राः तथाचअपुत्रस्येतिकथनसुरसादेवपुत्रिकाभिन्नायाअपिदुहितुरधिकारइतिभावः
ननुअपुत्रस्येतिकथनंआरसपुत्रशून्यस्यसमुदायधनग्रहणार्थंमनुनाचदुहितृदौहि
त्राधिकारबोधकवचनानांपुत्रिकावचनमध्येएवनिर्वचनादितिचेत्मनुनापृथक्दुहि
त्रधिकारबोधकवचनस्यानुपदेशात् एतद्वचनानामेवसामान्यदुहित्रधिकारतात्पर्यं
कल्पनीयं॥ नचसामान्यदुहित्रधिकारोनशास्त्रसिद्धइतिवाच्यं॥ स्वर्यातस्यह्यपुत्रस्य
सर्ववर्णेष्वयंविधिः॥ इतियाज्ञवल्क्यवचनेनअपुत्रस्यगौणमाधारणऔरसपुत्रिका
पुत्रादिशून्यस्यधनेदुहित्रधिकारकथनात् विष्णुवचनस्यापितथातात्पर्यात् नहिपु
त्रिकापुत्रस्यपुत्रत्ववाहिनांमतेपिपुत्रिकायाःसामान्यदुहितृतःकश्चिद्विशेषोऽस्तिन
वाउत्रस्येतिमुख्यपुत्रशून्यपरं तथासतिक्षेत्रजपुत्रादेःसत्वेपिपत्न्यादीनांक्रमेणाधि
कारापत्तेः नचेदमभिमतंमुनीनांग्रंथकाराणाम्वाइतिसंक्षेपः॥ कुमार्य्यभावेऊढायादु
हितुरधिकारः पूर्वोक्तपराशरवचनादितिजीमूतवाहनादीनांवहूनांनिवधृणांमतं चंडे
श्वरादीनामपिनात्रविप्रतिपत्तिरतस्तदुपादेयं अत्रऊढायांविशेषः यथासंभावितपुत्रा
पुत्रवत्योरेवाधिकारः नतुवंध्याविधवयोरपिपुत्राभावेतुदुहितातुल्यसंतानदर्शनात्॥ पु
त्रश्चदुहिताचोभेपितुःसंतानकारिके॥ इतिनारदवचनेनसन्तानद्वारेणैवउपकारबोधना
त्॥ त्रयाणामुदकंकार्य्यंत्रिषुपिंडःप्रवर्त्तते॥ चतुर्थःसंप्रदातैषांपंचमोनोपपद्यते॥ अनंत
रःसपिंडाद्यस्तस्यतस्यधनंभवेत्॥ इतिदायभागप्रकरणीयमनुवचनेनउपकारस्यैवदायग्र
हणाधिकारप्रयोजकत्वबोधनात्॥ अत्रसंतानःपिंडदोभिमतःअपिंडदस्यानुपकारकत्वे
नासन्तानादन्यसन्तानाच्चाविशेषात् दौहित्रश्चततपिंडदातानतुततपुत्रःनापिदौहित्री
ततपर्य्यन्तेनपिंडविच्छेदादिति जीमूतवाहनः दीक्षितोप्येवंतथाचपौत्रवत्यामृतपुत्रा
यादुहितृमत्याश्चदुहितुर्वंध्यायापिनाधिकारइतिभावः॥ कन्याभ्यश्चपितृद्रव्याद्देयंवैवाहि
कंवसु॥ अपुत्रकस्यकन्यास्वाधर्म्मजापुत्रवद्धरेत्॥ इतिदेवलवचनात्सवर्णायाएवपरिणी
तापुत्र्याःकुमार्य्याःअधिकारः नत्वपरिणीतापुत्र्याःनवाभिन्नवर्णायानवाक्षेत्रजातादिरूपा
याःक्षेत्रजादिपुत्राणामेवशास्त्रोक्तत्वेनधर्म्मत्वात्तादृशीनांदुहितृणांचशास्त्रानुक्तत्वेनधर्म्य ४२

लाभावात् एवंचकुमारीवाध्यायांऊढायामपिअयंविशेषोवोद्धव्यः॥ अत्रकेचित् दुहित्रधि
कारित्वात्भट्टाचार्य्यस्य उपकारवोधकउत्राभावेतुदुहितातुल्यसंतानदुहितादितिनारदवच
नस्यानुच्छेत्वस्वरसात् वंध्याविधवयोरपिदुहित्रोः पुत्रवतीसंभावितपुत्रानंतरमधिकारः
इतितत् स्वरसोलक्ष्यते नचवंध्याविधवयोरुपकाराभावेनकथमधिकारइतिवाच्यं तथासतीस्त्री
धनाधिकारेतदभावेवंध्याविधवयोरधिकारस्तयोरपितत् प्रजात्वादितिजीमूतवाहनलिख
नस्यसात्त्विलिखनस्यच विरोधापत्तेः। नचस्त्रीधनाधिकारे॥अप्रजायांहरेद्भर्त्ताइतिवचनस्व
रसेनवंध्याविधवयोः प्रजात्वेनाधिकारइतिवाच्यंअत्राधिदुहितरितिऊढाइत्यादिश्रवणात्
अनयोरपिऊढात्वात् दुहितत्वात्चअधिकारस्यसंभवात् नचस्त्रीधनेवंध्याविधवयोरधिका
रइतियथालिखितवंतः अत्रतुतथानइतिवंध्याविधवयोरधिकारेतस्यनस्वरसइतिवाच्यं।
जीमूतवाहनवत् वंध्याविधवयोर्नाधिकारइत्यस्याप्यलिखनात् स्वाशयत्वेपिपूर्वनिवंधृवि
रुद्धवाक्यस्यालिखनसंभवाच्च अथपुंधनाधिकारेपार्वणपिंडद्वाराउपकारएवाधिकारमूलं
त्रयाणामुदकंकार्य्यमित्यादिवचनानंतरं॥अनंतरःसपिंडाद्य इतिमनुवचनस्वरसात् स्त्रीध
नाधिकारेतुयथाकथंचिदुपकारएवमूलमितिवाच्यं तादृशकल्पनायांमानाभावात् शिष्या
दीनांअतादृशानांपुंधनाधिकाराच्च नचपुंधनाधिकारेपार्वणपिंडद्वारउपकाराभावएवअ
तादृशानामधिकारइतिवाच्यं तथासतिदुहित्रधिकारस्यान्याय्यत्वापत्तेः नचदुहितापुत्रद्वारा
तादृशीतिवाच्यंतथासतिभगिनीपितृस्वस्रादेरप्यधिकारापत्तेः नचविशेषतोविहितेतरस्त्री
णांनस्त्रीमूर्खविधर्म्मिष्वित्यनेननिषेधः इतिवाच्यं स्त्रीधनेपार्वणपिंडद्वाराभावएववंध्यादी
नामधिकारस्यकथंनेनतादृशनियमानुलंघनात् स्त्रीधनेतादृशनियमास्वीकाराच्च यथाप्र
पौत्रात् पूर्वंदौहित्राधिकारः पौत्रात् पूर्वंदुहित्रधिकारइतिचेदिष्टमेववंधुपर्य्यंताभावेवंध्या
विधवयोरधिकारित्वंयदि॥अप्रजायांहरेद्भर्त्ताइतिवत् अदुहितृकस्यहरेत्शिष्यइतिरूपंव
चनंलभ्यते॥यदातुदुहितुरधिकारित्वंतदनंतरंपार्वणपिंडदातृसत्वेनवंध्याविधवयोरनधि
कारः तदावंधुपर्य्यंताभावेचवचनतत् स्वरसयोरभावान्नाधिकारइतिजीमूतवाहनमतंसाधीयः
।अत्रपुत्रिकामधिकृत्यवहुधाविचारोजीमूतवाहनेनोक्तः॥ सचइदानींपुत्रिकानिषेधात्
ग्रंथप्रपंचभयान्नलिखितः संक्षेपस्तुपुत्रिकायाः स्वपुत्रहीनायामरणेतद्धनंतद्भगिन्या
दिभिर्ग्राह्यंमृतपुत्रायास्तुमरणेतद्धनंभर्त्रादिनाग्राह्यमितिअथदुहितृगामियद्धनंततदुहि
तुरूर्द्धगमनेकेनलभ्यंइतिचेदत्रजीमूतवाहनः। यदाचकन्याजाताधिकारापश्चात्परि
णीतासतीम्रियतेतदातद्धनंकन्यायाअनुत्पन्नाधिकारायाअभावेयासाम्रूढादीनांप्रति
पादितंउत्पन्नाधिकारायाअप्यभावेतासामेवतद्धनंनतुतद्भर्त्रादीनांतस्यस्त्रीधनविषयत्वा
त्॥भुंजीतामरणात्क्षांतेतिवचनेनजाताधिकारायाः पत्न्याअभावेऽनुत्पन्नाधिकारपत्न्य

भावोक्तानां पूर्वधनस्वामिदायग्राहिणां दुहित्रादी नामधिकारस्य दर्शितत्वात् पत्नीतोज घन्यदु
दौहित्र हित्रृयोरधिकारे दंडापूपन्यायासिद्धोऽयमर्थः यद्वा पत्नीत्युपलक्षणं स्त्रीमात्राधिकारेऽयमर्थो
वोद्धव्यः इतितात्पर्य्यमित्याह पत्नीतोज घन्येतिनन्वेवं सति दौहित्रादिशिष्यादीनामपिमरणो
त्तरं तद्धनं मूलधनिदायग्राहिणो ग्रहं तु नचैवतदनुभवसिद्धं नवा वहुतरग्रंथकारांतर सम्मतं न
वा युक्तिसिद्धं वलवत् शास्त्राभावात् दौहित्रपुत्रस्य सन्निविन्नागमांतःपातिपित्र्यधने ग्रहणस्या
वारणीयत्वाच्च अत आह॥ यद्वा इति तथा च पत्न्यादिसंक्रांतधनस्यैव अगतिकस्य गतिकरणमेवा
न्वेषणीयं तच्च पूर्वकल्पे दोषभयात् यद्वेति परकल्पे समाहितमिति भावः॥ अत्राक्षिपंति दुहितृ
नराधिकारिणां दुहितृभगिनीपुत्रादीनां स्त्रीधनमात्राधिकारित्वे प्रमाणाभावः॥ जनन्यां संस्थि
तायां तु समं सर्वे सहोदराः॥ भजेरन् मातृकं ऋक्थं भगिन्यश्च सनाभयः॥ इति मनुवचनेन॥ मातुः
स्वसा मातुलानी पितृव्यस्त्री पितुः स्वसा॥ श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः॥ यदासा
मौरसो न स्यात् सुतो दौहित्र एव वा॥ तत्सुतो वा धनं तासां स्वस्त्रीयाद्यास्समाप्नुयुः॥ इति वृहस्पति द्याः
वचनेन च मात्रादिधनमात्रे दुहित्रादीनामधिकारस्य वोधितत्वात् पत्नीसंक्रांतधनस्य च वहुग्रं
थकारसम्मतार्थकः॥ अपुत्राशयनं भर्त्तुरित्यादि कात्यायनीयवचनेन संकोचे पि अन्यत्र सं
कोचकाभावादिति। एवं दुहितृभगिनीपुत्रादीनां स्त्रीधनमात्रग्राहित्वे मात्रामातृस्वस्रादिना
वा शिल्पवाणिज्यादिनाऽर्जितधने वृद्धकस्याधिकार इत्यनध्यवसायः अयं तु स्त्रिया शिल्पाद्य
र्जितधने स्त्रिया एव स्वत्वं स्वीकरोति॥ भार्य्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः॥ यत्ते समधि
गच्छंति यस्यैते तस्य तद्धनं॥ इति मनुवचनस्य अस्वातंत्र्यमात्रतात्पर्यकत्व वर्णनात्॥ प्राप्तं शि
ल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः भर्त्तुः स्वाम्यं भवेत्तत्र शेषस्तु स्त्रीधनं स्मृतं॥ इति कात्यायनव
चनेपि भर्त्तुः स्वाम्यं स्वातंत्र्यं अनापद्यपि त्वद्ग्रहीतव्यमित्यर्थकरणात्। तत्र पत्युरेव स्वामि
त्वाभ्युपगमेपि विधवया शिल्पादिनार्जितेऽनध्यवसायस्यावारणात् न हि तस्याः पतिपक्षादिस्वा
मित्वमभ्युपेयं तेशास्त्राभावात् अथ भर्त्तुः साम्यमित्यादिदर्शनात् भर्तमत्या एव शिल्पाद्यर्जितध
नं न स्त्रीधनं अन्यच्च स्त्रीधनमेव॥ स्त्रीधनं षड्विधं स्मृतं इति कथनं तु अयोग्यव्यवच्छेदाय न तु अ
धिकसंख्याव्यवच्छेदाय इति ग्रंथकारैरभिहितं इति चेत्तथापि जीमूतवाहनमतेऽसंगतिरेव
भर्तमत्या शिल्पादिभिरर्जितस्य दुःसंग्रहत्वात् तत्संग्रहे तत्र भर्त्तुरस्वातंत्र्यापत्तेः॥ ननु
भर्त्तुरस्वातंत्र्ययोग्यं स्त्रीधनं शिल्पाद्यर्जितभिन्नं दुहित्रादिभिर्ग्राह्यं च स्त्रीधनं तत्साधा
रणमेव विषयभेदे शब्दार्थभेदस्य वहुशोऽङ्गीकारात् इति चेत् किं तर्हि स्त्रीधनपदार्थः स्वसं
क्रान्ताभिन्नस्वसम्बंधिधनमिति चेत् स्वसंक्रान्ताभिन्नेति विशेषणस्य किं फलं कुतो वा लाभः
इति एवं पत्नीत्युपलक्षणं इति यदुक्तं तदनर्थः॥ अपुत्राशयनं भर्त्तुः पालयन्ती गुरौ स्थिता १३६
॥ भुंजितामरणात् क्षांता दायादा ऊर्द्ध्वमाप्नुयुः॥ इति वचने पत्नीपदाभावात् पत्नीपदस्य ज ४३

र्द्ध्वमाप्नुयुः॥इतिवचनेपत्नीपदाभावात्पत्नीपदस्यऊह्यत्वेप्रमाणाभावाच्चभर्त्तुरित्याक्षे
पेणैवतल्लाभात् नचभर्त्तुरित्यनेनआक्षेपात्धनिपत्नीत्वंनायाति॥भर्त्तुःशय्यांपालयंती
पुत्रधनंभुंजीतेत्यादौतथात्वादर्शनात् पूर्ववचनस्यभर्तृदायमित्यनेनत्वाक्षेपोनसंभवति।
अनेनभर्तृदायमित्यस्यभर्तृदत्तधनमित्यर्थकरणेनअनुवृत्त्यसंभवात् अगत्यैवपत्नी
पदमूह्यमितिवाच्यं।ऊह्यत्वस्यावश्यकत्वेपिस्त्रीइत्यादेरेवऊह्यत्वात् भुंजीतेतिक्रियया
कर्म्मणआकांक्षितत्वेनभर्तृदायमित्यस्यानुवृत्त्यस्वसंक्रांतभर्तृधनमित्यस्यऊहस्य
वावश्यकत्वाच्च एवंस्त्रीदायंभुंजीतेत्यपिनविधिः भगिन्यादेरपिभ्रातृधनप्राप्त्यापत्तेः किंतु
भोगमात्रपरिसंख्यातथास्वसंक्रांतंधनंभुंजीतैवनतुदद्यात्विक्रीणीयाद्वाइतिमन्वंतरवच
नोपजीव्योत्रपरिसंख्याविधिः अत्रचपत्नीपदस्यस्त्रीमात्रपरतायांप्रमाणाभाव॥यद्वि
संक्रांतधनंसंक्रांतिश्रेणीमूलीभूतायाःपत्न्याभोगमात्रेदर्शनेनान्यासामपितथात्वंयुक्तमि
त्येवयुक्तिप्रमाणमित्युच्यते तथादौहित्रशिष्यादेरपिदानविक्रयानधिकारस्यइष्टत्वेनपरक
ल्पवैयर्थ्यापत्तेः धनंसंक्रांतिमूलीभूताचनपत्नीकिंतुपुत्रएवनहिसंक्रान्तक्रमागतधनयोर्वि
शेषःशास्त्रेलिखितः क्वचित्केनचित्तुनिबंधकारेणसंकेतार्थंसंक्रांतधनशब्दःप्रयुज्यते॥इति
परंतुपुत्रपौत्रादिसंक्रांतेधनेस्वपुत्रादिपारतन्त्र्यार्थमेवक्रमागतशब्दप्रयोगः॥तस्मात्संबन्ध
प्रयुक्तलाभकत्वात्पुत्रादौपत्न्यादौचसंक्रांतंधनंदायशब्दवाच्यं एवंचपत्नीभुंजीतेतिवि
धिकल्पने॥दायादाऊर्द्ध्वमाप्नुयुरित्यादावपिआक्षेपकोवलात् पत्न्याऊर्द्ध्वमित्येवलभ्यतेनतुस्त्रि
याइतिअत्रस्त्रीशब्दःस्त्रीलिंगमनुष्यवचनः पत्नीशब्दःपरिणीतस्त्रीवचनइति।अत्रएवाक्षे
पेषुवादानुवादाभ्यांग्रंथबाहुल्यंस्यात्अतस्तावुपेक्षितौकिंतुमुनिवचनग्रंथकारांतरसंवा
दयोश्चसाक्षात्अभावेपिजीमूतवाहनलिखितःपंथाइतिवहुभिरादियते॥तत्रचदुहितृसं
क्रांतधनंदुहितुरूर्द्ध्वंपितृदायादगामीत्येतदेव जीमूतवाहनेनलिखितं॥नतुस्वसंक्रान्तं
धनंदुहितानदद्यात् इतिस्पष्टंलिखितंकिंतुसामान्यतःस्त्रीस्वसंक्रान्तधनंभुंजीतैवेतिक
ल्पनंविनासामान्यतः॥स्त्रियाऊर्द्ध्वंदायादाआप्नुयुः॥इत्येतदर्थलाभोनभवतीतियदु
च्यतेतदातत्रस्वरसोस्तिअन्यथातुनेतिविभावनीयं॥येतुभार्य्याशिल्पधनेपतिस्वत्वमि
च्छन्ति॥तन्मतेपिसत्यपिपुत्रादौभर्त्तृपरमेतद्धनंसाभार्य्याप्राप्नुयात् तदुत्तरंचतस्याउत्तरा
धिकारिणः अन्यथातुल्ययुक्त्याअदत्तदुहितर्य्यपिपितृस्वत्वसत्वात् अदत्तदुहितृशिल्प
धनेपितृस्वत्वंयुज्यते॥नतुकेनचिदपिमुनिनालिखितमितिअवधातव्यं॥दुहितॄणांच
हुत्वेतुविभागःक्रियतेइतिदुहित्रधिकारः॥तदभावेदौहित्रोधिकारीति जीमूतवाहनेना
न्नेभवदेवोपिपत्नीदुहितरश्चेतियाज्ञवल्क्यवचनेवहुवचनश्रुतेः॥उभयविधयोर्दुहि
त्रोःदौहित्रस्यचसंग्रहतात्पर्य्यकल्पनात् अन्यथावहुवचनानर्थक्यंस्यादिति जीमूत

वाहनादिसम्मतायुक्तिस्तन्मतेसंगच्छते॥तेनद्विविधयोरेवदुहित्रोरधिकारित्वकथनात्
अत्रचदुहितृपदंलक्षणयादुहितृदौहित्रोभयपरं॥स्वर्यातिस्यह्यपुत्रस्यसर्ववर्णेष्वयंविधिः
॥इतियाज्ञवल्क्यवचने पुत्रपदंपुत्रपौत्रप्रपौत्रपरमिव॥तुल्यादुहितरोवापि इतिदेवलवच
नेप्येवमेवार्थः॥विष्णुसूत्रेतदभावेदुहितृगामीत्यनंतरंतदभावेदौहित्रगामीतिपाठस्तुन
जीमूतवाहनसम्मतःतेनदौहित्राधिकारे तत्खंडस्यानुल्लेखात् सचपाठोभवदेवसम्मतः
॥अत्रपुत्रपौत्रसंसारेदौहित्राधनमाप्नुयुःस्वर्येषांहिस्वधाकारे पौत्रदौहित्रःसमाः॥०॥
इतिगोविन्दराजधृतविष्णुवचनंतुदौहित्राधिकारेप्रमाणंसर्वमतएवसंगच्छते॥चंडेश्वरे
णापिदुहितृदौहित्रानंतरं बृहस्पतिः॥तदभावेभ्रातरस्तुभ्रातृपुत्राःसनाभयःसकुल्या
बांधवाःशिष्याःश्रोत्रियाश्चधनार्हकाः॥इतिलिखनेनभ्रातॄणांपूर्वंदौहित्राधिकारोभ्यं
जितः तत्रउपकारविशेषात्युक्तिवलाच्चपित्रोरपिपूर्वंतदधिकारोऽनुःयते॥उपकारश्चदौ
हित्रस्यधनिपिंडदातृत्वं। एकाशताधिकावाला भविष्यतिकनीयसी॥येनदौहित्रतालोका
दृशोऽन्योयंपतिर्मम॥इत्यादिनापरलोकोपकारश्चपित्रोर्हिधनिदेयपिंडभात्क्तत्वंउपादानं
चदायग्रहणेहिपिंडभोगापेक्षयापिंडदानस्यउपादानापेक्षयानिस्तारस्यआधिक्यंअनु
भूयते॥सतिपित्रादौपुत्रादेर्दायहारित्वंदर्शनात् तदभावेतयोर्दुहितृदौहित्रयोः पूर्वव
चनोक्तयोरभावेभ्रातरोऽधिकारिणःइत्यर्थः॥ एवञ्चपित्रोरभावेइत्ययेवक्ष्यते॥पूर्ववच
नेयथा॥सदृशीसदृशेनोढासाध्वीशुश्रुषणेरता॥कृताकृतावापुत्रस्यपितुर्धनहरीतुसा
॥इतिवृहस्पतिवचनंकृताकृतदुहित्रधिकारेबृहस्पतिरित्यभिधायभोजदेवेनधृतं यथा
पितृधनेतस्याःस्वाम्यंसत्स्वपिबंधुषु॥तथैवतत्सुतोपीष्टेमातृमातामहेधने॥इतिवचनं
चअत्रेदमवधेयं॥पितोत्सृजेतपुत्रिकामनपत्योऽग्निंप्रजापतिंचेष्ट्वाऽस्मदर्थमपत्यमि
तिसम्वाद्याभिसन्धिमात्रात्पुत्रिकेत्येकेषांइतिगोतमेनाभिसन्धिमात्रस्यापिपुत्रिकाहे
तुत्वेनकथनात् अकृतेतिअकृतपुत्रिकोपयुक्तवाक्याअभिसंहितेत्यर्थोपिशक्यते
कर्त्तुं तंनिष्फलंप्रायःवहुग्रंथकारविरुद्धंचेतिनोपादेयं परंतुएतत् बृहस्पतिवचनं के
वलंदौहित्राधिकारसंपादकंनभवति अहासंहितापुत्रिकापुत्रपरतयासंगतिसम्भवात्।
तस्मान्मुख्यपिंडदातॄणांपुत्रपौत्रप्रपौत्राणांअभावेपार्वणेगौणपिंडदातादौहित्रोऽधिकारी
भवतीतियुक्तिसम्वलितमेवतत्संपादकंभवति॥अथैवंपुत्रपौत्रदौहित्रयोरपिपित्रोः पूर्वम
धिकारःप्रसजेत्पुत्रकेतुल्यत्वात् बृहस्पतिवचनस्याकिंचित्करत्वाच्चेतिचेन्नैतत्केवलोप
कारमात्रेणदायाधिकारकथनात् दौहित्रस्याधिकारेपूर्वोक्तगोविन्दराजधृतविष्णुवचन
स्यमूलत्वात् एकाशताधिकेत्यादिनाउपकारकथनाच्च नचविष्णुवचनंपुत्रिकापुत्रपरमि ७३
तिवाच्यं॥अपुत्रपौत्रेत्वस्यानन्वयापत्तेः नहिपुत्रिकापुत्रस्यपौत्रत्वस्वीकारेपिओरसात्व ४४

श्लोकः २५

जपश्चादधिकारः संभवति औरसेन सहतन्मातुर्युगपदेनांशकल्पनात्॥पुत्रिकायां कृतायां
तु यदि पुत्रोनुजायते॥समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियाः इति एवं याज्ञव
ल्क्यादिवचनेलक्षणयापि पुत्रपौत्रदौहित्रयोः संग्रहोनभवति॥अतएवकेनचिदपि प्राची
ननिबंधकारेण तयोर्दायग्राहित्वं न लिखितं यत्तु दौहित्रोप्यखिलं रिक्थमपुत्रस्य पितुर्हरेत्
॥स एव दद्यात् द्वौ पिंडौ पित्रे मातामहाय च॥पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्मतः॥त
योर्हि मातापितरौ संभूतौ तस्य देहतः॥तथा॥अकृता वा कृता वापि यं विंदेत्सदृशात्सुतं॥पौ
त्री मातामहस्तेन दद्यात् पिंडं हरेद्धनं इति मनुवचनानि दौहित्राधिकारे प्रमाणत्वेनोपन्यस्ता
नि जीमूतवाहनेन तानि तु पुत्रिकापुत्रविषयकान्येव तत्प्रकरणोपसंहारोपक्रममध्येषु पु
त्रिकाकीर्तनात् किंतु मनुना दौहित्रस्याधिकारस्य पृथगनधिकारात् नूलना [illegible] भंगा
यसामान्यदौहित्राधिकारे केपि थं चिदेतेषामेव वचनानां तात्पर्य्यं कल्पनीयं गतोऽस्तमर्कइति
वाक्यस्य संध्याकर्म्मणीव दौहित्रस्य ऊर्द्ध्वगमने तत्संक्रान्तधनं मातामहदायादाः प्राप्नुवंतीत्यत्र
न पंडितानां निर्भरः किंतु दौहित्रपुत्रादिरेव प्राप्नोतीत्यत्रैव एवं दौहित्राणां बहुत्वे विभागः कर्तव्यः
तत्र एकस्याः द्वौ पुत्रौ अपरस्याश्च त्रयः पुत्राः तत्र पंच भागा एव समानाः कर्तव्याः॥न तु भाग
द्वयं कृत्वा एकैकं भागं पुनर्विभजेयुः॥तादृशरीतेः पौत्रविभाग एव वाचनिकत्वात् युक्तिश्चापि
न तुल्या तथाहि मृतपितृकः पौत्रः पितृव्याद्भागं गृह्णाति मृतमातृकदौहित्रस्तु न मातृष्वसु
रिति॥एवमपुत्रिकस्य कन्यास्वधर्मजपुत्रवद्धरेदिति देवलवचनेनैवमथा॥ परिणीतायां
सवर्णायां स्वयमुत्पादिताया एव दुहितुः पितृधनेऽधिकारं [illegible]ं॥तथा तादृश्या दुहितुः
पुत्रएव दौहित्रो मातामहधनेऽधिकारइत्यपि बोध्यं॥अत्रापुत्रिकस्येति दर्शनात् पुत्रिकायाऽ
भावेऽन्यदुहितुरधिकारः।तेन च पुत्रिकान्यस्या अपि दुहितुः पुत्रोऽधिकारीत्यपि बोध्यं॥केचि
त्तु पत्नी दुहितरश्चेत्यादि परिगणितानां राजपर्य्यन्तानां राज्ञः अभावस्य प्रायोऽसंभवेन तत्पूर्व
पर्य्यन्तानामभावे दौहित्राधिकारइति वदंति॥तन्न दौहित्रानंतरं तदभावे भ्रातरस्तु इति बृह
स्पतिवचनात् उपकारभूयस्त्वाच्च मदनपालोपि दुहित्रनंतरं दौहित्राधिकारं प्राह अत्र केवलो
पकारेण दायाधिकारः॥बृहस्पत्यादिवचनानि पुत्रिकापुत्रविषयकाणि विष्णुवचनमपि सर्वे
ष्वेवौरसस्यैव पुत्रा दायहराः स्मृताः॥इत्यादिवचनात् सर्वधनाधिकारस्या पुत्रिकापुत्रविषय
कमिति मिश्राभिप्रायः॥गोविंदराजस्तु दुहितुः पूर्वमेव दौहित्राधिकारइति वदति॥तदपि न
दुहितृद्वारा एतत्संतानत्वेन तदपेक्षया दौहित्रस्य गौणत्वात् यथा पितृधनेइति बृहस्पतिना
दौहित्राधिकारस्य दृष्टान्तत्वेन तत्पूर्वसिद्धत्वाच्च अत्र गृहीतमातामहदायस्य दौहित्रस्यो
परमेतत्पुत्रसत्त्वेनेमधिकारोपि पितृधनत्वात् बाधकशास्त्राभावाच्चेति विभावनीयं॥इति
दौहित्राधिकारः॥तदभावे माताऽधिकारिणी॥पत्नी दुहितरश्चैव पितरौ इति याज्ञवल्क्यवचनात्

इति रत्नाकरचिन्तामणी॥ नच पितरावित्येकशेषेण मातापित्रोर्निर्देशात् युगपदेवोभयो
रधिकारोस्तु इति वाच्यं॥ तदभावे दुहितृगामि तदभावे मातृगामि तदभावे पितृगामीति विष्णु
वचनेन क्रमेणाधिकारप्रतिपादनात् अत एव बृहस्पतिः॥ भार्य्यासुतविहीनस्य तनयस्य मृतस्य
च॥ माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया॥ इत्यनेन पितृनैरपेक्ष्येण मातुर्दायग्राहित्वमभिहित
वान् अत्र तदनुज्ञया मात्रनुज्ञया पाञ्जात मस्तु एतदुपलक्षणं पितुरपि तथा च पित्रोरनुज्ञया इत्यर्थः
इत्याहुः॥ तत्र किंतु पित्रनुज्ञया अधिकारिण्या मातुरनुज्ञयैव फलसिद्धेरिति तन्न यतोऽत्र अहंन
गृह्णामीत्यादिकैवानुज्ञा अभिप्रेता भवान् गृह्णात्वित्यनुज्ञया कथने प्रयोजनाभाव इति मनुरपि॥ अ
नपत्यस्य पुत्रस्य माता दायमवाप्नुयात्॥ इत्युक्तवान् मातुरभावे च पितुरधिकारः॥ याज्ञवल्कीय
तद्वचनात्॥ तदभावे मातृगामि तदभावे पितृगामि इति विष्णुवचनात्॥ पिता हरेदपुत्रस्य रिक्थं
भ्रातर एव वा॥ इति मनुवचनाच्च इति रत्नाकरचिन्तामण्योराशयः जीमूतवाहनादयस्तु॥ तद
भावे दुहितृगामि तदभावे पितृगामि तदभावे मातृगामीति। विष्णुवचने पाठः तथा च दौहित्रा
भावे पिताऽधिकारी तदभावे मातेति यच्च॥ अनपत्यस्य पुत्रस्येत्यादि मनुवचनं यच्च॥ भार्य्या
सुतविहीनस्य इत्यादि बृहस्पतिवचनं तत् पित्रभावे बोद्धव्यं अत्र युक्तिः दौहित्रस्य मृतपिंडतद्दे
यपिण्डद्वयदानात्॥ पितृत उत्कर्षः पिता तु मृतदत्तं पिंडं भुंक्ते मृतदेयं पिंडद्वयं ददातीति च॥
अतो दानापेक्षया भोजनस्य निकृष्टत्वेन एकस्मिन् पिण्डे पितुरपकर्षः मातुश्च मृतदत्तैकपिं
डमात्रभोक्तृत्वेन ततोप्यपकर्षः बीजस्यैव च योन्याश्च बीजमुत्कृष्टमुच्यते॥ इति मनुवचन
मपि॥ मातृतः पितुरुत्कर्षे बीजं॥ अत्र भ्रात्रादितउत्कर्षस्तु मातुस्तत्प्रकरणेऽनुसन्धेयः
इत्याहुः तदत्र विष्णुवचनपाठभेदनिबंधनो व्यवस्थाभेदः इत्यनुष्ठानेऽनध्यवसायः एकस्या
पि पाठस्य खंडयितुमशक्यत्वात् उभयोरेव पाठयोर्ग्रंथकारेण धृतत्वादिति नच अस्माभिर्लि
खिता युक्तिर्जीमूतवाहनग्रंथे चान्या लिखिता युक्तिश्च पितुरुत्कर्षसाधनीति वाच्यं मातुरुत्क
र्षेपि बहुतरयुक्तिसंभवात् यथा पितुर्माता सहस्रेण गौरवेणातिरिच्यते॥ गर्भधारणपोषा
भ्यां तेन माता गरीयसी॥ इति प्रामाणिकवचनोक्तगौरवं अथ यदि पित्रपेक्षया सहस्रगुणित
गौरवं मातरि तदा कथं॥ द्वौ गुरू पुरुषस्येह पिता माता च धर्म्मतः॥ बांधवा गुरुतरा एतावन्मा
ता गुरुतरा ततः॥ तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात्॥ अभावे बीजिनो माता तदभावे
तु पूर्वजः॥ इति माधवाचार्य्यधृतं पुराणवचनं संगच्छते॥ इति चेत् तेनैव समाहितं यथा ए
वच्च निषेकादि समस्तसंस्कारपूर्वकवेददातृविषयं॥ अन्यथा मातैव गरीयसीति अत एव॥
उपाध्यायान्दशाचार्य्य आचार्य्याणां शतं पिता॥ सहस्रं तु पितुर्माता गौरवेणातिरिच्यते॥ इति
मनुवचनमपि संगच्छते इत्यर्थः वेदैकदेशस्य वेदांगस्य वाध्यापक उपाध्यायः उपनयनं कृत्वा १२८
संकल्पसरहस्यवेदाध्यापक आचार्य्यः इति मन्वनुसारान्माधवाचार्य्यः॥ व्यासः॥ मासा ४५

श्लोकः २७

नृदशोदरस्थं याधृत्वा शूलैः समाकुलाः॥ वेदनाविविधैर्दुःखैः प्रसूयेत विमूर्च्छिता प्राणैरपि
प्रियान् पुत्रान् मन्यते सुतवत्सला॥ कस्तस्या निष्कृतिं कर्तुं शक्तो वर्षशतैरपि॥ इति अन्यपौरा
णिकप्रसंगेन ग्रंथबाहुल्यस्यादिति नोच्यते॥ अत्र समाधा॥ गौरवं हि न धनग्राहित्वे तंत्रं तथा
सति पित्रोः सतोः कोपि धनं न प्राप्नुयात्॥ किंतु स्वव्यापारेण उपकारः पिंडसम्बन्धसन्निक
र्षश्च तत्र उपकारेण पितुरेवोत्कर्ष इति मातृसत्वेपि पितुरधिकारः॥ विष्णुवचनेपि जीमूतवा
हनसम्मत एव पाठः कल्पनीयः॥ सद्युक्तिकत्वात्॥ स्मृत्योर्विवादे न्यायस्तु बलवान् व्यवहारत
इति। याज्ञवल्क्यात् अपरे तु जीवति पितरि पुत्रधनं यदि मातरि संक्रमे तदा पित्र पितुरेवधि
कारः॥ अध्यग्न्यध्यावाहनिकादिभिन्नत्वेन तस्य स्त्रीधनत्वाभावात् पतिसत्वे दत्तातिरि
क्ते स्त्रीधनत्वास्वीकाराच्च इत्याहुः॥ अत्र दौहित्राभावे पिताधिकारी तदभावे मातेति जीमूत
वाहनादिमतमिदानीं व्यवह्रियमाणमेव बहुभिरादियते॥ गृहीतपुत्रधनाया मातुरुपरमे
मातृस्त्रीधनाधिकारिणो न गृह्णीयुः पितृपुत्रस्यैवाधिकारिण इति जीमूतवाहनः मात्रा
च जीवंत्या तद्धनं न देयमिति जीमूतवाहनस्वरसः इति पंडितैरुच्यते मिश्रोपि मातुस्तत्संक्रान्तध
नेदानाद्यनर्हत्वमाह॥ इति वदंति मातुरभावे भ्रातरः। पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा
॥ इति याज्ञवल्क्यवचनात् तदभावे मातृगामि तदभावे भ्रातृगामीति विष्णुवचनात् तदभावे
भ्रातरस्तु भ्रातृपुत्राः सनाभयः॥ इति बृहस्पतिवचनात्॥ पिता हरेदपुत्रस्य धनं भ्रातर एव वा
इति मनुवचनात् प्रेतानां धनं ज्येष्ठस्य इति सर्वभ्रात्रुपलक्षणार्थं ज्येष्ठपदघटित॥ गौतम
वचनात्॥ ततो दायमपुत्रस्य विभजेरन् सहोदराः॥ तुल्या दुहितरो वापि ध्रियमाणः पितापि वा
॥ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमं॥ इति देवलवचनात् विभक्तसहितद्रव्यं पुत्राभावे पि
ता हरेत्॥ भ्राता वा जननी वापि माता वा तत्पितुः क्रमात्॥ इति कात्यायनवचनाच्च अत्र देवलका
त्यायनवचनस्मारितः क्रमो याज्ञवल्क्याद्यनुसारेण एव इति जीमूतवाहनादिमतं चंडेश्वरस्या
प्यत्रैव स्वरसो वेदितव्यः मिश्रास्तु कात्यायनवचनव्याख्याने॥ पित्रर्जितं पिता भ्रात्राद्यर्जितं
भ्रात्रादिरिति व्यवस्थितो विकल्प इत्याहुः॥ तन्मते क्रमादित्यस्य का गतिरिति विवेचनीयं॥ चंडे
श्वरस्तु अपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ लभेतां॥ पत्नी वा ऽज्येष्ठा सगोत्र शिष्य सब्रह्म
चारिणः इति वचनात् श्रेष्ठ पत्नीदुहितृदौहित्राभावे स्वोपार्जितमपुत्रधनं आदौ भ्राता प्राप्नु
यात् तदभावे पितरौ तदभावे ऽश्रेष्ठपत्न्यादिरित्युक्तवान् जीमूतवाहनादयस्तु सर्वप्रकारे
ष्वपत्नीदुहितृदौहित्राभावे क्रमेण पिता माता भ्रातरश्च प्राप्नुयुरित्याहुः॥ याज्ञवल्क्यवचने भ्रा
तर इति बहुवचनेन निर्देशात् बहुविधानामेव भ्रातृणामधिकारः सूचितः तेषां भ्रातृत्वरू
पेण एकत्वसंभवेपि बहुविधत्वज्ञापनं क्रमेणाधिकारसूचनार्थं स च क्रमो यथा अपुत्रभ्रा
तृधनं आदौ संसृष्टी सोदरभ्राता प्राप्नुयात् तदभावे ऽसंसृष्टि सोदरसंसृष्टि वैमात्रेयो तुल्या

धिकारित्वोतदभावेऽसंसृष्टिवैमात्रेयइतिस्मार्तजीमूतवाहनौ अत्र प्रमाणानिउपन्यस्यंते
यथाजीमूतवाहनः तत्रापिप्रथमंसोदरस्यैव तदुक्तंसोदरस्यतुसोदरइत्याहुः याज्ञवल्क्यः
संसृष्टिनस्तुसंसृष्टीसोदरस्यतुसोदरः दद्याच्चापहरेदंशं जातस्यचमृतस्यच इतितथाच
भ्रातरस्तथेत्यनेनयाज्ञवल्क्येनसामान्यतौवैमात्रेयसहोदरसंसृष्ट्यसंसृष्टिनांभ्रातृणां
अधिकारमुक्त्वा विशेषप्रतिपत्यर्थंसंसृष्टिनस्तुइतिवचनमुपन्यस्तंतत्रचएकस्यैवसोदर
त्वसंसृष्टित्वरूपधर्मद्वयसत्वेसएवसर्वबाधकइतिभावः॥संसृष्टिनोभ्रात्रादेर्मृतस्यांश
मपहारेत् अपरःसंसृष्टीभ्रातादिरपहरेत्गृह्णीयात् सोदरस्यतुसंसृष्टिनःसोदरएवगृ
ह्णीयात् नसापत्नइतिदीपकलिकायामपिअयमेवाशयोज्ञातव्यः कात्यायनः संसृष्टानान्तु
संसृष्टाःपृथक्स्थानांपृथक्स्थिताःअभावेऽंशहराज्ञेयाःनिर्बीजान्योन्यभागिनःसंसृष्टानां
मृतानांअसंसृष्टानांशहराः पृथक्स्थानांमृतानांपृथक्स्थिताअंशहराज्ञेयाः अभावे
भार्यादिभावेनिर्बीजान्योन्यभागिनइतिद्वन्त्वसमासः इतिचंडेश्वरः अत्रनिर्बीजान्योन्य
भागिनइतिहेतुः तथाचयतस्तेनिरपत्यायदिभवंतितदापरस्परभागग्रहणयोग्याभवन्ती
त्यर्थइत्यपिवदन्तीकेचित्॥अत्रसामान्यतःसंसृष्टानान्तुसंसृष्टाइतिकथनेनअसंसृष्टि
सोदरसत्वेपिसंसृष्टिसोदरस्यैवाधिकारइतिलक्ष्यते। वाचस्पतिमिश्रोपिसोदर्याअसंसृ
ष्टिनोनलभन्तेइतिभावः॥इत्याहतथाचसंसृष्टासंसृष्टसोदरसत्वेसंसृष्टसोदरस्यैवाधिका
रोवहुनिबंधकारसम्मतः॥यदित्वसोदरोवैमात्रेयश्चसंसृष्टिनौतत्रकागतिरितिचेत् अत्रचंडे
श्वरःसोदरस्यतुसोदरःसोदरासोदरसंसर्गेसोदरएवगृह्णीयादित्यर्थइत्याह अतएववृह
न्मनुः एकोदरेजीवतितुसापत्नोनलभेद्धनं॥इतियुक्तंचैतत्एकस्यसोदरत्वसंसृष्टत्वरूप
धर्मद्वयसत्वेतस्यैवसर्वबाधकत्वमितिनिष्कृष्टं संसृष्टसोदरस्यैवमृतधनाधिकारित्वंत
दभावेऽसंसृष्टसोदरसंसृष्टवैमात्रेययोस्तुल्योधिकारः असंसृष्टिसोदरसोदरसंसृष्टिसद्भावे
चद्वयोरेवेति जीमूतवाहनोक्तिः अनेनचासंसृष्टस्यापिधनग्रहणेसोदरत्वमपिहेतुरुक्तः
ततोभयोरेवधनग्रहणेहेतुसत्वादुभयोरपिधनग्राहकत्वमुक्तमितिचण्डेश्वरोक्तेश्च॥अ
न्योदर्यःसंसृष्टीसन्अन्योदर्यधनंहरेत्॥नत्वसंसृष्टीसन्सोदरस्तुअसंसृष्टीसन्नपिआ
दद्याद्धनमितिविच्छिद्यान्वयइतिमिश्रोक्तेः अन्योदर्यस्तुसंसृष्टीनान्योदर्योधनंहरेत्॥
असंसृष्टापिचादद्यात्संसृष्टोनान्यमातृजः इतियाज्ञवल्क्यवचनाच्चएतद्वचनस्यअन्यो
दर्योवैमात्रेयः॥संसृष्टीसन्धनंहरेत् नत्वसंसृष्टीअन्योदर्यस्यधनंहरेत्। एतेनवैमात्रेय
स्यसंसृष्टत्वएवधनग्राहित्वमुक्तं संसृष्टःएकशुक्रशोणितसंभवःसोदरइतियावत्॥असंसृ
ष्टीत्यनुवर्त्तते॥तथाचसंसृष्टापिसोदरोधनंगृह्णीयात् एतेनअसंसृष्टिनोऽपिसोदरस्यधनग्रा १३५
हित्वमायातंतयोश्चक्रमाभावात् युगपदधिकारः तथाचताभ्यांविभक्तव्यंसोदराभावेस्यात्वाह ४६

नान्यमातृज इति असंसृष्टि अन्यमातृजो न गृह्णीयादित्यर्थः। तथा च संसृष्टासंसृष्टवैमात्रे
यसत्वे संसृष्टवैमात्रेयो न धनाधिकारीति भावः। पूर्वं संसृष्टसोदरेणापि संसृष्टवैमात्रेयस्य
तुल्याधिकारित्वं निराकृतमिदानीं संसृष्टवैमात्रेयेण असंसृष्टवैमात्रेयस्य तुल्याधिकारि
त्वं निराकृतमिति न पौनरुक्त्यं इति च एवं श्वरस्तम्मतोऽर्थः नान्यमातृज इत्यनुवाद इति मि
श्रः नान्योदर्य्यो धनं हरेदिति पाठे॥ अन्योदर्य्योऽसंसृष्टी धनं न हरेदिति योजना वोध्या। जी
मूतवाहनस्तु अन्योदर्य्यः संसृष्टी धनं गृह्णीयात् न असंसृष्टी अन्योदर्य्यः सोदरस्य तु सोदर
इति प्रागुक्त वचनात् सोदर इत्यनुवर्त्तते अथ च सोदरोऽसंसृष्ट्यपि गृह्णीयात् न तु संसृष्टोना
न्यमातृजः केवल इत्यर्थ इत्याह अन्ये तु संसृष्टस्यैव संसृष्टी सोदरस्य च सोदरः॥ दद्याच्चापह
रेदंशं जातस्य च मृतस्य च॥ अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो हरेद्धनं हरेत्। असंसृष्ट्यपि चा
दद्यात्संसृष्टो नान्यमातृजः इति याज्ञवल्क्यवचने यत्र संसृष्टासंसृष्टसोदरसद्भावस्तत्राह संसृ
ष्टस्येति यत्र सोदरा न संसृष्टाः तत्राह सोदरस्य तु इति यदि च तत्र वैमात्रेयः संसृष्टोऽस्ति तदा
किं स्यादित्यत्राह॥ अन्योदर्य्यस्तु संसृष्टीति तु पुनः अन्योदर्य्यः संसृष्टी एव धनं हरेत्॥ अत्र
उभयोरेव धनग्रहणप्रयोजकधर्मसत्वात् तुल्योऽधिकारः। अत्रासंसृष्टि वैमात्रेयस्यानाधि
कार इत्याह॥ नान्योदर्य्य इत्यादि ननु यत्र सोदरासोदरौ संसृष्टौ तत्र किं॥ संसृष्टस्य च संसृष्टीति
सामान्योक्तेर्द्वयोरेवाधिकारः स्यादिति शंकानिरासायाह। आदद्यात्संसृष्टो नान्यमातृज इत्या
हु॥ अत्र केचित् संसृष्टत्वं न धनग्रहणप्रयोजकं तथा सति भ्रातुष्पुत्रसंसृष्टपितृव्यधनस्य
विभक्तधनिपुत्रभ्रातुष्पुत्राभ्यां युगपद्ग्रहणप्रसंगात् किंतु धर्मान्तरप्रयुक्तधनग्रहणनिया
मकं एव यथा भ्रातृत्वात् सिद्धे धनग्राहित्वे संसृष्टत्वं भ्रात्रंतरं निवर्त्तयति॥ एवं च असंसृष्टसो
दरसत्वे तस्यैव सोदरत्वरूपधनग्रहणप्रयोजकरूपसत्वेन तस्यैवाधिकारः॥ न तु संसृष्टस्यापि वै
मात्रेयस्य एवं च संसृष्टस्य तु संसृष्टीति वचनं सोदरभ्रातृमात्रविषयकं। तत्र वैमात्रेयस्यानधि
कारमाह॥ अन्योदर्य्यस्त्वित्यादि संसृष्टी असंसृष्ट्यपि अन्योदर्य्यः नान्योदर्य्यधनं हरेत्सोदर्य्या
भावेत्याह॥ संसृष्टो नान्यमातृज इति संसृष्ट एवान्यमातृजो धनं हरेत् नान्यमातृजः केवल इत्यर्थ
इत्याहुः तन्न सर्वग्रन्थकारविरुद्धत्वाद्युक्तिविरुद्धत्वाच्च। तथा हि यथा सोदरत्वं भ्रातृधनाधि
कारहेतुस्तथा संसृष्टत्वमपि किं न स्यात्॥ पुत्रभार्य्यादिस्तु धनिनः परलोकोपकर्त्तृत्वात्तत्सं
म्बन्धेन सह संसृष्टत्वस्य न तुल्यता सोदरभ्रातृमात्रि पार्वणदातृत्वमुपकार इति चेत् संसृष्टेनो
पि धनसम्बन्धेन धर्मसंपादकत्वं इत्यवधेयं॥ असंसृष्टसोदरसंसृष्टासोदरयोरेकतराभावेऽ
अन्यतरस्याधिकारस्तत्र च संसृष्टासंसृष्टवैमात्रेयमात्रसत्वे संसृष्टस्यैवाधिकारः॥ नत्वसं
सृष्टस्य संसृष्टिनस्तु संसृष्टीति याज्ञवल्क्यवचनात् द्वयोरेव प्रत्येकमभावेऽसंसृष्टवैमात्रेयस्त
स्यापि एकपितृकत्वेन भ्रातृत्वात् अत्रायं भावः॥ सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते॥

श्लोकः २०

सर्व्वे ध्वंशहरा मातात् इति धर्म्मो व्यवस्थितः॥ इति वचनात् पार्व्वणश्राद्धे सोदरेण यत् पिंडादिकं
दीयते तत्र मातुरप्यधिकारित्वात्। धनिमात् पार्व्वणकर्त्तृत्वेन सोदरस्य वैमात्रापेक्षया उ
त्कर्षः एकगृहे स्थिताभ्यां भ्रातृभ्यां परस्पर पोषणात् परस्पर धनरक्षणात् अर्जनेपि कथं
चित् परस्परोपकारकत्वात् परस्परोपार्जित धनेन धर्म्मजननाच्च असंसृष्टापेक्षया परस्पर
स्यासतिवाहुल्यमिति॥ अथ कोनामासौ संसृष्टीतिचेत्॥ विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र
संस्थितः। पितृव्येणाथवा प्रीत्या स तु संसृष्ट उच्यते॥ इति वृहस्पत्युक्त इत्यवेहि स्यथा भ्रातरः
परस्परमनुमत्या विभक्ता अनंतरं कोपिकेन चित् अत्र सह तिष्ठति तत्र तौ भ्रातरौ संसृष्टिनौ अ
त्र सहस्थितिश्च न एकस्मिन् वास्तौ वेश्मनि वास्तितिः तस्याः प्रीतिं विनापि भ्रातृषम संव्यक
वास्तुवेश्माद्यभावे प्रायो वहुत्वसंभवात्॥ किंतु एकगार्हस्थ्याश्रयेण स्थितिः। तदाकरश्च य
त्तव धनं तन्मम धनं इत्यनेन धनमिश्रणं आवयोरेक एव धर्म्म इत्यनेन धर्म्मैकनियमः ए
वं पाकैकत्वं च॥ इतश्च प्रीत्या इति पदोपसन्धानात् लभ्यते॥ अन्यथा प्रीतिं विनाक्षणमपि ए
कस्थानस्थित्यसंभवेन प्रीत्येत्यस्य वैयर्थ्यापत्तेः इदानीं च प्रीतिपदेन एतादृशी विशेषप्री
तिरभिहिता॥ एकत्रेति एकगार्हस्थ्ये इत्यर्थः॥ तथा च विभागानंतरं परस्पर प्रीत्या एकगृहिरू
पतया स्थितौ संसृष्टिनावुच्येते॥ इति निष्कृष्टः एवमेवस्मात्त जीमूतवाहन वाचस्पति मिश्र
प्रभृतयः॥ अत्र पृथग्धनानां धनमिलनादिना एकगृहिरूपतया स्थितिरेव संसृष्टित्वं ला
घवात् न तु विभागानन्तरं धनमिलनादिनेति गौरवात् पृथग्धनत्वन्तु केषांचित् विभागात्
केषांचित् अर्थत एव इति एवंच भिन्नवंशजयोः विभिन्नदेशभवयोरपि संसृष्टित्वं प्रीविमूल
कं भवत्येवेति केचन वदन्ति॥ तन्न तादृशसंसृष्टिनो दृश्यमानत्वात् विभक्तोय इति वाक्यस्यै
यर्थ्याञ्च संभवति सार्थकत्वे स्वरूपकीर्त्तनप्रायिकत्वकथनादेवयुक्तत्वाञ्च अत एव गौरवं न
दोषायेति ध्येयं॥ विभागानन्तरं धनमिलनान्तरं एकगृहिरूपतया स्थितिः संसृष्टित्वं न चै
वं संभूय वणिजामपि वाणिज्य प्रसूत धन विभागानंतरं एकत्र स्थितौ संसृष्टित्वं स्यादिति वाच्यं
॥ विभक्त इत्यनेन दायभागस्योक्तत्वात् नन्वेवं सति मातुः स्वस्त्रेययोरपि संसृष्टत्वमस्तु तयो
रपि मातामहादि धन विभागानन्तरं एकगार्हस्थ्ये स्थितिसम्भवादिति वाच्यं॥ दायस्यात्यत्र
रूढ़ भागत धनरूपत्वादयमाशयः॥ पित्रा भ्रात्रा पितृव्येणेति दर्शनात् येषामुत्पत्तित एवा
विभागः त एव विवक्षिताः तेषांच दौ जीवत् पितृक विभाग प्रतियोगी पिताधृतः तस्योपल
क्षणत्वेन पितामह प्रपितामहयोरपि ग्रहणं वेदितव्यं ततो भ्रातृभाग प्रतियोगी भ्राता धृतः
ततो मृतपितृक पौत्र विभाग प्रतियोगी पितृव्यो धृतः तस्योपलक्षणत्वेन पितृव्यपुत्र पौ
त्रयोः पितृपितृव्यादेश्च ग्रहणं वेदितव्यं भ्रातृपत्न्यादेश्च पत्यादिपरतंत्रत्वान्न तथाभाव इति
एवंच एतेषामेव परस्परं संसृष्टित्वं भवति न त्वन्येषां पितृव्यपुत्रेण विभागानन्तरं संसृष्टित्व ४७

त्वव्यवहारोपि चंडेश्वरलिखितो वर्त्तते॥ अत्रेदमवधेयं यौ द्वौ भ्रातरौ विभज्य मृतौ एवं तत्पु
त्रयोः तत्पौत्रयोर्वा संसृष्टत्वं चानुभवसिद्धं यो विभक्तस्तस्य एकत्र स्थितत्वाभावादिति मिश्र
चण्डेश्वराभ्यामेव कलितः पन्थाः॥ जीमूतवाहनोपि येषामेव हि पितृभ्रातृपितृव्यादीनां पितृपिता
महार्जितद्रव्येणाविभक्तत्वमुत्पन्नितः संभवति त एव विभक्ताः सन्तः परस्परप्रीत्या पूर्वकृत
विभागध्वंसेन यत्तव धनं तन्मम यन्मम तत्तवेति एकगृहे एकगृहिरूपतया संस्थिताः संसृ
ज्यन्ते न पुनरन्येषं रूपाणां द्रव्यसंसर्गमात्रेण संभूय वणिजामपि संसर्गित्वमित्याह॥ अत्रापि
तृव्यादिनामित्यत्रादिपदेन पितृव्यपुत्रादेरपि ग्रहणमिति श्रीकृष्णतर्कालंकाराभिप्रायो ल
क्ष्यते। यतस्तेनोक्तं उत्पन्नित इति तेन मातृव्यावृत्तिः तस्या धनसंबन्धस्य परिणयनाधीन
त्वादिति अन्यथा परिगणितपित्रादिबहिर्भावादेव मातृव्यावृत्तिरिति लिखेदिति स्मार्त्तभट्टा
चार्य्यस्तु पितृपुत्रभ्रातृपितृव्यभ्रातृपुत्राणामेव संसर्गमाह। फलतो जीमूतवाहनोक्तस्य
पितृव्यादीनामित्यत्रादिपदेन पुत्रभ्रातृपुत्रयोरेव ग्रहणमिति व्यंजयन्ति जीमूतवाहनोपि
पुनः संसृष्टिभागप्रकरणे परिगणितव्यतिरिक्तेषु नादरणीयं अन्यथा परिगणनानर्थक्या
पत्तेरित्युक्तवान् प्रकाशकारोपि वचनोपदेशात् नियम एवेत्याह अत्र चण्डेश्वरादिमतं युक्ति
सिद्धं पितृव्यतत्पुत्रयोर्विभागप्रतियोगिनोः। किंचिद्विशेषस्याप्यभावात् स्मार्त्तप्रकाश
कारमतं च तथाश्रुतवचनार्थानुसारितया लोचनीयं एकमेव मतं व्यवस्थापनीयं ननु यत्र च
तुर्णां मध्ये द्वौ विभक्तौ द्वौ च न विभक्तौ धनानि च अंकपातादिना विभक्तानि यथा विंशतिसु
वर्णानां दश सुवर्णाः द्वयोर्भ्रात्रोः स्थिताः पंच पंच अनयोरिति एवं भूम्यादाव पितत्र अविभक्त
योर्द्वयोर्मध्ये कस्यचित् पुत्रादिशून्यस्य मरणे तदंशयोग्य धनं केन ग्रहीतव्यं न तावत् संसृ
ष्टिना सोदरेण अस्य संसृष्टित्वाभावात् तथा हि विभागानंतरं यत्तव धनं तन्मम धनं यन्मम
धनं तत्तवेत्यभिसंध्यानेन एकत्र स्थितिरेव संसृष्टित्वं अत्र च तयोर्न विभागो जातः न वा सर्वे
जीवंतः सोदरा गृह्णीयुः अनुभव विरोधात् विभागानन्तरं एकत्र स्थितत्वे संसृष्टिन एवाधिकारः
विभागात् पूर्वं एकत्वस्थितत्वे सर्वेषामेव इत्यत्र युक्तिदुर्भिक्षात् व्यवहारस्मृतौ हि केवलं व
चनं नालम्बनीयं॥ अथ भ्रातृणां एकेच्छया सर्वेषां विभागस्य शास्त्रसिद्धत्वात् तत्र केषांचि
त् विभागे केषांचिद् विभागस्य शास्त्रेणाबोधनात् तत्र त्वव्यवस्था विशेषस्यालिखनात्तदा स्थ
विभागो न कर्त्तव्य एवेति चेत् यदि शास्त्रमदृष्ट्वैव कैश्चित् शूद्रादिभिस्तथा कृतं तत्रापि व्यवस्था
आवश्यकी न च स विभागोऽसिद्धः सर्वेषां स्वेच्छाकृतत्वात् विशेषशास्त्राभावाच्च इति चेदत्रा
हुः॥ विभक्त इत्यनेन परस्परं विभागो नाक्तः किंतु ययोः संसृष्टत्वं भवेत् तदुभयानुयोगिको वा
तिभागः तथा चात्रापि द्वयोरेको विभागः अपरयोश्च द्वौ भागाविति तयोरपि विभागो विद्यत
एव तदनंतरं च द्वयोरेकगृहिरूपतया स्थितिर्वर्त्तते एव न च पुनरित्यस्या संगतिः॥ वारद्वयमेक

श्लोकः २८

त्रवासाभावादितिवाच्यं॥पुनरर्थस्यगौरवेणसंसर्गकृतभागविशेषाप्रयोजकत्वेनचलक्षण॥
घटकत्वादितिकेचित् अन्येतुसंसृष्टितोल्यात् अविभक्तस्यापिविभक्तसाधकत्वंयथास्त्राभावे
पियुक्त्याकल्पनीयमित्याहुः॥वस्तुतस्तुनादृशस्थलेसर्वेषामेवविभागकल्पनं अनातोमन
सापिनवत्स्येव॥अतएवज्येष्ठांशउत्तमगृह्यादिदानकल्पनंभवतीतिध्येयं॥फलतोनकश्चि
द्विशेषः इतिसंक्षेपः॥ननुसंसृष्टिनस्तुसंसृष्टीतिवचनात् पुत्रपत्न्यादिमतोपिसंसृष्टिनोम
रणेसंसृष्टीएवतद्धनंगृह्णीयुइतिचेत् नेत्याह॥बृहस्पतिः॥विभक्ताभ्रातरोयेचसंप्रीत्यैक
त्रसंस्थिताः॥पुनर्विभागकरणेतेषांज्यैष्ठ्यंनविद्यते॥यदाकश्चित् प्रमीयेतप्रव्रजेद्वाकथंच
न॥नलुप्यतेतस्यभागःसोदरस्यविधीयते॥यातस्यभगिनीसातुततोंऽशंलब्धुमर्हति॥अ
नपत्यस्यधर्मोयमभार्यापितृकस्यच॥इतिप्रव्रजेद्वाइतिवाकारःपततिइत्यादेःसमुच्चया
र्थः॥सोदरस्येतितथाचसोदरासोदरसंसृष्टित्वेसोदरस्यैवाधिकारइत्यत्रसंसृष्टवैमात्रेयसो
दरयोस्तुल्योधिकारइत्यत्रचइदमपिसाधकंभवतीतिअवधातव्यं॥यातस्येतिअंशंविवाहा
यएतत् पूर्वंप्रपंचितंइतिविभावनीयं॥अनपत्यस्यपुत्रपौत्रदुहितृदौहित्ररहितस्यअभार्या
पितृकस्ययथोक्तगुणशालिपत्नीमातापितृरहितस्यपित्रितिकृतैकशेषं तथाचभ्रातुरधि
कारेप्रस्तुतएवसंसृष्टित्वेनविशेषः ननुसंसृष्टिनःभ्रातुःपत्न्याद्यपेक्षयापिबलवत्त्वमिति
भावः॥विभक्ताःसहजीवन्तोविभजेरन्पुनर्यदि॥समस्तत्रविभागःस्यात्ज्यैष्ठ्यंतत्रनविद्यते॥
तेषांज्येष्ठःकनिष्ठोवाहीयेतांशप्रदानतः॥म्रियेतान्यतरोवापितस्यभागोनलुप्यते॥सोदर्या
विभजेरंस्तंसमेत्यसहिताःसमं॥भ्रातरोयेचसंसृष्टाभगिन्यश्चसनाभयः॥इतिमनुवचनमपि
पूर्वोक्तबृहस्पतिवचनैकवाक्यत्वात्पुत्रपत्न्यादिरहितसंसृष्टिविषयकं एवमेव कुल्लूक
भट्टः सोदर्याइतिआवृत्त्यासंसृष्टिसोदरपरंसोदरसामान्यवाचकंच तथाचसोदरासोदर
संसर्गेसोदरएवाधिकारीसोदरस्यासंसृष्टित्वेतुसंसृष्टिवैमात्रेयेणतुल्याधिकारीत्यर्थला
भः॥भ्रातरःवैमात्रेयाःसोदराणांपूर्वमुक्तत्वात् संसृष्टाइत्यनेनासंसृष्टानांव्यावृत्तिः भ
गिन्यश्चइतिविवाहोचितद्रव्यग्रहणपरं यत्तुसोदर्याभ्रातरःसमागम्यसहिताभगिन्यश्च
सोदर्यास्तमंशंसमंकृत्वाविभजेरन् इतिकुल्लूकभट्टेनोक्तंतस्याप्ययमेवाशयोवक्तव्यः
नतुसमानाधिकाराशयः॥भगिनीनांभ्रातृधनाधिकारस्यकुत्राप्यदृष्टत्वात्॥विवाहोपचि
तद्रव्यग्रहणपरत्वेनैववचनसामंजस्याच्चयच्चसोदर्याणांसापत्नानामपिमध्यात् संमि
श्रीकृतधनेनैकयोगक्षेमास्तेविभजेरन्सर्वेसोदर्याःसापत्न्यावाइतिकुल्लूकभट्टोक्तं तत्रा
शयएषएवावधारणीयः॥संसृष्टसोदराभावएवसंसृष्टवैमात्रेयाणामधिकारः॥इतिभ
गिन्यश्चसनाभयःसोदरास्ताश्चाप्रत्ताःपुनःपतिगोत्रमासादयन्तीतिप्रकाश इतिरत्नाकरः १४१
यमः॥अविभक्तंस्थावरंयत्सर्वेषामेवतद्भवेत्॥विभक्तंस्थावरंग्राह्यंनान्योदर्यैःकथंचन॥ ४८

तथाच सर्वेषां सोदरासोदराणामित्यर्थ इति जीमूतवाहनः विभक्तानां यदि किंचित् स्थावरं
वैमात्रेयसाधारणं अविभक्तमध्यगं भवति तत्र सोदरेण सह वैमात्रेयाणां तुल्यभागः विभ
क्तस्थावरजंगमयोस्तु सोदर्यस्यैवाधिकारः॥ एकोदरे जीवति तु सापत्नो न लभेद्धनं स्थावरे
प्येवमेव स्यात् तदभावे लभेतैव॥ इति बृहन्मनुवचनमपि लभेद्धनमित्यनेन एव प्रकृतार्थसिद्धौ
स्थावरे इति पुनर्विशेषोपादानात् एतदेव व्यंजयतीति ध्येयं॥ एषाव्यवस्था असंसृष्टत्वेपि
नेया इति वदन्ति। गुणवान् दत्तकोपि पुत्रः औरसः पुत्रमात्रागृहीतश्चेतत् सहोदरः तयागृही
तस्तु वैमात्रेयः दत्तकादौ ग्रहणस्य [illegible] जननतुल्यतास्वीकारादित्यवधातव्यं गृहीतभ्रा
तृधनं भ्रातृकपरमेतस्यैव पुत्रादिस्तद्धनमधिकरोति॥ नतु भ्रात्रंतरपुत्रः तद्धनस्य भ्रातृसंक्रान्तत्वे
नतत्पितृव्यस्वत्वानाश्रयत्वादिति भ्रात्रधिकारः॥ तदभावे भ्रातुष्पुत्रोऽधिकारी॥ पत्नी दुहित
रश्चैव पितरौ भ्रातरस्तथा॥ तत्सुत इति याज्ञवल्क्यवचनात् तदभावे भ्रातृगामि तदभावे भ्रातृपुत्रगा
मीति विष्णुवचनात् धनिपितृपितामहपिण्डद्वयदातृत्वाच्च न तु भ्रात्रा सह भ्रातुष्पुत्रस्य तुल्याधि
कारित्वं विष्णुना तदभावे भ्रातृपुत्रगामीत्यभिधानात्॥ तत्र तत्पदेन अव्यवहितोक्तभ्रातृपराम
र्शस्यैव युक्तत्वात् एषामभावे पूर्वस्य धनभागुत्तरोत्तर इति याज्ञवल्क्येन भ्रातृणामभावे तत्
सुतस्याधिकारबोधनात् धनिदेयपितृपितामहपिंडदातुर्भ्रातुष्पुत्रात् धनिदेयपिंडषट्कदा
तुस्तद्देयपिंडत्रयदातुर्वैभ्रातुरुपकाराधिक्याच्च एवमेव जीमूतवाहनः यत्तु जीवत्पितृकभ्रातुष्पु
त्रस्य पिंडदानाभावे न उपकारकत्वाभावान्नाधिकार इति तत्तुच्छं एवमपि मृतभ्रात्रनंतरपुत्रस्या
धिकारप्रसंगात् भ्रात्रंतराभावे जीवत्पतितभ्रातृपुत्राधिकारस्य भवनापि स्वाकर्तव्यत्वात् जीव
त्पितृकदौहित्रस्येव जीवत्पितृकभ्रातुष्पुत्रस्यापि स्वरूपयोग्यतामादायएव धनाधिकारसंभ
वानासत्वाच्च नापिपितृव्योपि धनिपितामहप्रपितामहपिंडद इति भ्रातुष्पुत्रेण तुल्याधीका
री भवत्विति वाच्यं॥ भ्रातुष्पुत्रस्य प्रधानीभूतपितृपिण्डदत्तेन उत्कर्षात् इति जीमूतवाहनः।
पितुर्हि प्राधान्यं विना तत् श्राद्धाधिकारं पि श्राद्धानधिकारात् आसन्नत्वाच्च अत्रापि विशेषोऽव
धातव्यः॥ यथा प्रथमं सहोदरपुत्रस्य स्वेन भर्त्रा सह श्राद्धं माता भुंक्ते स्वधामयं॥ पितामही च स्वे
नैव स्वेनैव प्रपितामही इति जीमूतवाहनस्मार्त्तादिधृतवचनेन पितृजनन्या अपि स्वभर्तृसहभा
वेन पौत्रदत्तपिंडभोगावगमेन धनिमातुरुपकारकत्वात् वैमात्रेयपुत्राणांच तदसंभवात् सोदरपु
त्राभावे वैमात्रेयपुत्रस्याधिकारः इति अथ कोपि भ्रातुष्पुत्रो यदि संसृष्टी अस्ति तदा स एव सर्वं गृह्णी
यात् किम्वा अन्यैरपि भ्रातुष्पुत्रैः सह विभज्य गृह्णीयात् न च संसृष्टिनस्तु संसृष्टी इत्यनेन सामान्यव
चनेन संसृष्टिनो भ्रातुष्पुत्रस्यैवाधिकार इति वाच्यं तद्वचनस्य भ्रात्रधिकारलिखनोपक्रमे लिखितत्वे
भ्रातुरधिकारमात्रे विशेषग्राहित्वात् अथैवं सति पितृव्येण सह भ्रातुष्पुत्रस्य संसृष्टत्वकथनं
व्यर्थमिति न वाच्यं॥ एकधर्म्मागमव्ययादिभिरेव अविभक्ततुल्यत्वेन सर्वेषामेवतत् सिद्धार्थमुक्त

त्वात् मनुबृहस्पतिभ्यामपिसंसृष्टिनोभ्रातुरेवाधिकारउक्तः नतुकेनचित्मुनिनासंसृ
ष्टिनःपितृव्यस्यभ्रातुष्पुत्रस्यवाऽधिकारःस्पष्टमुक्तः॥यत्तु॥संसृष्टानान्तुयोभागस्तेषामे
वसद्दृष्यते॥अतोन्यथानंशभाजोनिर्वीजेष्वितरानियात्॥इतिनारदवचनं तदपिबृहस्प
त्येकवाक्यत्वात् संसृष्टभ्रातृविषयमेव वक्तव्यं यथासंसृष्टिनांभ्रातॄणांयोभागःसभागः
तेषांसंसृष्टानामेवअतोऽन्यथाम्नतस्यासंसृष्टत्वेतेसंसृष्टत्वयोग्याइति॥पूरितार्थःअनं
शभाजःनपूर्णांशभाजइत्यर्थः तदंशंकोगृह्णीयादित्यत्राहइतरानितिइतरानपिभ्रातॄनि
त्यर्थः यद्वाअतोन्यथासंसृष्टानामभावेइतरानंशभाजःभ्रातॄनिपातगच्छेदित्यर्थः॥अंशो
धनंतद्भाजःपुत्राएवप्रसिद्धाः तदन्यान्भ्रातॄनित्यर्थः यद्वावैमात्रेयाश्चेत् संसृष्टास्तदाते
षांसंसृष्टवैमात्रेयभागभागित्वंअतोऽन्यथासंसृष्टत्वाभावेवैमात्रेयाअनंशभाजः यत्तुइत
रान्सोदरानेवगच्छेदित्यर्थः चंडेश्वरस्तु अथोन्यथासंसृष्टानामभावेइतरान् अनंशभाजः
संसृष्टसत्वेभागानधिकारिणइयात् गच्छेदित्यर्थः इत्याह प्रकाशकारस्तुअनेनबुद्धिस्थपरा
मर्शेन अपुत्रत्वात् अन्यथापुत्रवत्वेसंसृष्टाभ्रातरोऽनंशभाजः निर्वीजेषुसन्तानरहितेषुइत
रान्भ्रातरादीन्गच्छेदित्यर्थः भ्रात्रधिकारएवसंसृष्टित्वकथनंसिद्धंततश्चभ्रातुष्पुत्राधिका
रेसंसृष्टत्वनिबन्धनोविशेषोनास्तीतिचेत्नैतत्॥दीपकलिकाकारसम्मतं यतस्तेनसंसृष्टिन
स्तुसंसृष्टीत्यादि याज्ञवल्क्यवचनव्याख्यानेसंसृष्टिनोभ्रात्रादेर्मृतस्यांशमपरःसंसृष्टीभ्रा
त्रादिरपहरेदितिभ्रातृपदोत्तरमादिपदंदत्वाव्याख्यातं तथाच॥संसृष्टिनस्तुसंसृष्टीतिवाक्ये
नार्थवादेनविधिःकल्पनीयः॥सचस्वसमानसम्बन्धिषुअसंसृष्टिषुनतुसंसृष्टीएवधनं
गृह्णीयादित्याकारकः वचनान्तरेणसामान्यतःप्राप्तदायाधिकारित्वेविशेषप्रतिपादकः॥
एवंचकोपिजीवन्उतपुत्रान् विभज्यकेनचित् पुत्रेणसंसृष्टीसन् कतिपयदिवसोत्तरंमृतः
ततश्चतद्धनेसंसृष्टीएवपुत्रोऽधिकारीनत्वन्यः अतएवमिश्राः पितापुत्रयोरपिसंसर्गेविभक्त
पुत्रानंतरसत्वेचपितुर्भागं संसृष्टैवपुत्रः प्राप्नोतिनासंसृष्टी संसृष्टानांतुसंसृष्टीत्यविशेषे
णाविधानात्॥विभक्तोयःपुनःपित्रेत्यादिनापितापुत्रयोरपिसंसर्गकथनात् इत्याहुः यच्चोक्तंतैरे
वयुक्तंचैतत् संसर्गिपुत्रस्यतुसंसर्गेणतस्यजनितत्वादितितत्रेदमालोचनीयं॥स्वत्वस्यनिरूढ
तत्वा+पुत्रान्तराणांपितृधनेविभागेनस्वत्वस्यनिराकृतत्वात्+दितिकथंसंगच्छते विभाग
त् पूर्वमपिपितुर्विद्यमानत्वेनतद्धनेपुत्रस्यसत्वाभावात् पैतामहेतुपितापुत्रयोस्तुल्यंस्वा
मित्वमितियाज्ञवल्क्यवचनस्यचपुत्रेच्छयाविभागमात्रतात्पर्यात् तद्वचनस्ययथाश्रु
तार्थस्वीकारेपिपितुपार्जितधनेकदाचिदपिपुत्राणांअधिकारोनस्यात् अथैवंस्वत्वस्यनि
राकृतत्वादित्यस्यायमर्थः यथाउत्पन्नोवार्थस्वामित्वेनलभेतेत्याचार्य्याइतिगोतमसूत्रेणउ
त्पत्तिमात्रेणैवपुत्रस्यपितृधनेस्वत्वंस्वरूपसदासीत् तदानींचपितुर्विद्यमानत्वेन॥स्वतन्त्रः ४८

पितराद्वते इति कात्यायनवचनात् अस्वातंत्र्यात् विभागाद्यनधिकारः मृते च पितरि स्वातंत्र्यात
दधिकारः॥ एतदेवोक्तं देवलेन अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते॥ इति अस्वाम्यं स्वाम्ये
पि सति अस्वातंत्र्यं न हि देवदत्तधने यज्ञदत्तस्य स्वाम्यं शास्त्रे लिख्यते॥ न वा मासांतरविद्यमानायां
पित्र्यधने पुत्रस्य स्वाम्यमिति तथा च विभागेन तादृशस्वत्वस्यैव निराकरणमित्युक्तं इति वाचस्प
ति मिश्राभिप्राय इति चेत् तन्न तं जीमूतवाहनादिभिरनंगीकृतं अंगीकृते पि नात्र निस्तारः पुत्रा
न विभजेयुः केनाप्यसंसृष्टः पिता चेन्मृतस्तद्दातृधनस्य विभक्तैः पुत्रैरग्रहणापत्तेः ततस्तत्वे चेद्
तरेषां ग्रहणस्य युक्तत्वात् तदानीं तद्धने पुत्राणामिव कस्यापि स्वत्वाभावादिति यद्वा वैरेवोक्तं न
चानपत्यस्य धर्म्मोयमिति पर्युदासश्रवणात् तन्नैवमिति वाच्यं॥ तस्य विभागानंतरं जातविषय
त्वादिति तत्राप्यालोचनीयं॥ अनपत्यस्य धर्म्मोयमिति इदं पदेनमुनिवचनस्थिते सति संभवे
तद्वचनोक्तधर्म्मस्यैव धर्त्तुमुचितत्वात्॥ यदि कश्चित् प्रमीयेत प्रव्रजेद्वा कथंचन॥ न लुप्यते तस्य
भागः सोदरस्य विधीयते॥ यात स्य भगिनी सा तु ततोऽंशं लब्धुमर्हति॥ अव्यवहितपूर्ववचनोक्तः
संसृष्टिधने संसृष्टिसोदराधिकाररूपः संसृष्टिसोदराः सत्वेऽसंसृष्टिसोदराधिकाररूपश्च मनुसं
सर्गकृतविशेषरूपः तस्य संसृष्टिमन्तुसंसृष्टीति याज्ञवल्क्योक्तवत् बृहस्पतिनाप्युक्तत्वात् प्र
योजनं विना स्वोक्तं धर्म्मं परिहाय मुन्यंतरवचनोक्तधर्म्मस्य इदं पदेन धर्त्तुमनुचितत्वात्॥ सोदरस्य
विधीयते इति वाक्यस्य सामान्यतः संसृष्टिधने संसृष्टिनामेवाधिकार इत्यर्थः कल्पने प्रमाणाभा
वाच्च एवमनपत्यपदं संसर्गानन्तरजातपुत्रपरमित्यत्र प्रमाणाभावः अत्र ततश्च संसृष्टिनस्तु सं
सृष्टीत्येतद्वचनं तुल्यरूपसम्बंधिसमवाये संसर्गकृतविशेषप्रतिपत्त्यर्थं तेन सोदराणां सपत्न्या
नां भ्रातॄणां पितृव्यादीनां वा तुल्यानां सद्भावे संसर्गी गृह्णीयात् वाक्यादविशेषश्रुतेः पूर्ववचनेन
च सर्वेषामेव प्रकृतत्वात् सर्वेषु चापेक्षासंभवात् अतो भ्रातृविषयं वचनमिदमित्यादिना दरणी
यमिति जीमूतवाहनस्मार्त्तौ अत्र पितृव्यादीनां ह्यत्रादिपदग्रहणात् जीमूतवाहनस्याशयं नाना
वर्णयन्ति यथात्रादिपदेन पुत्रपरिग्रह इति तन्न सुंदरं॥ पुत्रस्यान्यापेक्षया प्रधानत्वेन आदावेव ध
र्त्तुमुचितत्वात् यथा वा आदिपदेन पितृव्यपुत्रादिपरिग्रह इति तन्न स्मार्त्तमतं वस्तुतस्तु मिश्रचंडे
श्वरैकवाक्यत्वादुभयमेव ग्राह्यं ननु यो विभज्य भ्रातरं विहाय पितृव्येण संसृष्टी आसीत् अनन्त
रं तन्मरणे तद्धने भ्रातृपितृव्ययोस्तुल्योधिकारः स्यात् तुल्यसंबंधित्वं तयोर्नास्तीति चेत् वैमात्रे
यसोदरयोरपि तथात्वाभावः प्रसजेत् मैवं अन्योदर्य्यस्तु इत्यादिवचनेन भ्रातॄणां भ्रातृत्वेनैव स
म्बंधित्वं कथितमित्यवधेयं प्रकृतमनुसरामः॥ एवं च संसृष्टभ्रातुस्तु पुत्रादेरधिकारसिद्धौ आदौ सं
सृष्टसहोदरभ्रातृपुत्रस्याधिकारः तदभावे संसृष्टिनो वैमात्रेयभ्रातृपुत्रस्य असंसृष्टिनस्य सोदर
भ्रातृपुत्रस्य तुल्योऽधिकारः एकतराभावेऽन्यतरस्याधिकारः द्वयोरेव प्रत्येकमभावेऽसंसृष्टिनो
वैमात्रेयभ्रातृपुत्रस्याधिकारः अविभक्तस्यावरे भ्रातृतुल्ययत्त्वात्सोदरासोदरपुत्रयोस्तुल्याधि

श्लोकः २०

कारः केनापि निबंधकारेण न लिखितः मुनिवचनात्रस्फुटं नास्तीत्यवधेयं ॥ अथ संसृष्टिनो
भ्रातृपुत्रस्य विशेषाधिकारो भवति न वा इति चेत् संसृष्टिभ्रातुः पुत्रस्य विशेषाधिकारे
शास्त्राभावः न हि संसृष्टिपुत्रस्यापि संसृष्टित्वमंगी॥क्रियते प्रमाणाभावात् अथ चेन्ना
यं संसृष्टी तदाऽस्य पितृव्येण सह विभागकरणे ज्येष्ठांशप्रशक्तिरपि तेषां विभागकरणे पु
नर्ज्यैष्ठ्यं न विद्यते इति तेषामित्यनेन संसृष्टानामेव विभागे ज्येष्ठत्वनिरासात् नचेष्टापत्तिः
युक्तिविरोधात् किंच मास्तु अयं संसृष्टि तथापि अविभक्त एव तथा च संसृष्टतुल्ययुक्त्याऽवि
भक्तस्यापि सत्स्वपि विभक्तेषु दायग्राहित्वं युक्तं यदि दूतिविभाज्यते तदा संसृष्टिपुत्रस्यापि
अविभागपर्यंतं सत्स्वपि विभक्तेषु तुल्यसंबंधिषु दायग्राहित्वं अतएव च तुर्भ्रातृकस्य
तत् धनं अविभक्तैं भ्रातृद्वयस्याविभागे च अविभक्तैंभ्रातुरेव भवति एवं च पुत्रा न विभज्य तिष्ठतः अनन्तरं जातः
पुत्रः पुत्रं जनयित्वा मृतस्ततः पितामहधनं स एव पौत्रो गृह्णीयात् ननु पूर्वविभक्तपुत्रस्तत्पु
त्रादिर्वा इति केचित् ॥ वस्तुतस्तु संसृष्टिन एव धनग्राहित्वकथनात् अविभक्तस्य न धनग्रा
हित्वं पूर्वोक्तिं च तुर्भ्रातृकस्य लेषु विभागानंतरं संसृष्टित्वमेव स्वीक्रियते समानांशान प्रक
ल्पयेदित्यादि वचने प्राप्तसमानांशार्थं सर्वेषामेव भागावश्यकत्वात् एवं ऊर्द्ध्वं विभागाज्जा
तस्तु पित्र्यमेव हरेद्धनमिति वचनात् विभक्तज पुत्र एवाशेष पित्र्यधनाधिकारी भवतु तत्पु
त्रोपि कथं स्यादित्यत्र शास्त्रं न दृश्यते ननु स कीदृशं भागं गृह्णीयात् यदि च अनेकपितृकाणां
तु पितृतो भागकल्पनेति वचनात् पितृयोग्यांशं गृह्णीयात् तदाशेषमेव पित्र्यधनं तत्पि
तृयोग्यमिति तदेव प्राप्नुयात् इति चेत् तत्पितुरतिशययुणाभावे यादृशोंऽशः आसीत् तादृ
शमेव इति जानीहि न च पूर्वविभक्तानां पुत्राः पूर्वकृतांशं पितामहगृहीतांशभागं च गृह्णन्ति
विभक्तजपुत्रश्च पितामहगृहीतांशभागमात्रमिति वैषम्यमिति वाच्यं अगत्या स्वीकरणीय
त्वात् न हि तदनुरोधात् विना शास्त्रं कल्पयितुं युज्यते इति वदन्ति परे इति भ्रातृपुत्राधिका
रः॥ तदभावे भ्रातुष्पौत्रस्य॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा॥ तत्सुतो गोत्रज इति याज्ञ
वल्क्यवचनात् गोत्रजपदेन सपिंडानामेव विवक्षणात् ॥ अनंतरः सपिंडाद्यस्तस्य तस्य धनं
भवेत् इति मनुवचनेन आसन्नसपिण्डस्यैव दायग्राहित्वकथनात् ॥ अथासन्निर्जन्मक्रमेण
पिंडसंबंधेन वा उभयथापि पितृव्यस्तदपेक्षाया आसन्नः धनिपितृपितृपुत्रत्वात् धनिदेय
पिंडद्वयदातृत्वाच्च पितामहस्तु सुतरां धनिपितृपितृत्वात् धनिदत्तपिंडभोक्तृत्वात् धनिदे
यप्रपितामहपिण्डदातृत्वाच्च अत्र जीमूतवाहनः अतएव भ्रातृनप्तापितृव्यस्य वाधकः मृत
धनिपितुः प्रधानस्यैव पिण्डदातृत्वात् भ्रातृप्रणप्तातु धनिनः पितृसंततिरपि पितृव्येण वाध्य
ते पंचमत्वेन पिण्डवहिर्भावादिति नन्वेवं पितामहप्रपौत्रेंऽण सह पितामहभ्राता तुल्याधिकारी 483
च स्यादिति चेदत्र ब्रूमः ॥ आनं[illegible]मत्र जन्म+ सति पितामहभ्राताधिकारी स्यात् पितामहपौत्रे+ ५०

नापिंडेनचतथाचधनिनोयोजन्मनापिंडेनचआसन्नः तस्यचजन्मनापिंडाभ्यांयोनरः स
धनंप्राप्नुयादित्यभिप्रेतं॥नचैतत्कुतोलभ्यतेधनिनआसत्तिरेवकिंनोपादीयतेइतिवाच्यं
केवलासत्तिमात्रंहिनधनग्रहणेतन्त्रंअपितुपिंडसम्बंधोपितेनचउपकारोवगम्यते॥एवंच
अनासन्नस्यउपकारादासन्नस्यउपकारोगरीयानितिधनिप्रत्यासन्नासत्वेएवग्रहीतुंयुक्तत्वा
दिति एवंचदौहित्रस्यपिण्डदानेनउपकारकत्वात्॥एकाशताधिकावालाभविष्यतिकनीय
सी॥येनदौहित्रजाल्लोकादशोच्छ्रोयंपतिर्मम॥इतिमहाभारते दौहित्रजन्मनैवमातामहोपका
रश्रवणाच्च॥पितृप्रपौत्राभावेपितुरुपकारकस्यपितृदौहित्रस्याप्यधिकारोजीमूतवाहनेनलि
खितःआसत्तिक्रमस्तुआसन्नत्वंएवातआदौतदुपकारकस्यअनंतरधनिनःसत्यनासन्न
स्यपितुः तदनंतरंतदुपकारकाणांतदासत्तिक्रमेणतदभावे अपेक्षकृतासन्नस्यपितामहादेः
तदभावेतदुपकारकस्यइतिअतएवऔर्द्धदेहिकक्रियाधिकारिणिभ्रातुष्पुत्रेसत्यपिभ्रातुरेवाधि
कारःपित्रासन्नत्वात् नचधनिनअसन्नोयथापितातथापुत्रोपीतितदुपकारकस्यतत् प्रपौत्रस्याप्य
धिकारोऽस्त्वितिवाच्यं।तस्यधनिकर्त्तव्योपकारणाभावात् अथैवंसतिभ्रातॄणांभ्रातुष्पुत्रस्यचपृथग्
तकीर्त्तनंव्यर्थंगोत्रजत्वेनैवतत्प्राप्तेः नचभ्रातॄणांभ्रातुष्पुत्राणांचनानाविधत्वेनविशेषप्रतिपत्त्यर्थमे
वपृथगुत्कीर्त्तनमितिवाच्यं तथासतिपितृव्यस्यापितथात्वेनतस्यापिपृथगुत्कीर्त्तनस्यौचि
त्यादितिचेन्न पित्रभावेभ्रातुरधिकारस्तदभावेभ्रातृपुत्रस्यइतिआसत्तिक्रमेणआसन्नोपकारक्र
मेणैवाधिकारः नतुपित्रभावेपितामहस्येतिआसत्तिक्रमेणनवाभ्रातुष्पुत्रेणसहपितृव्यस्यतुल्या
धिकारित्वमितिधनिनोजन्माद्यासत्तिक्रमेणाधिकारइतिज्ञापनार्थंस्वाकीयपुत्रादित्रयवत्पितृपु
त्रादित्रयस्यापियुगपदधिकारनिराकरणार्थत्वात्इत्यवेहि तथाचदौहित्रपर्य्यन्ताभावपितुस्तद
भावेमातुस्ततोभ्रातॄणांततोभ्रातुष्पुत्रस्यततोभ्रातुष्पौत्रस्यततःपितृदौहित्रस्य इतिजीमूतवाहनस्य
लिखितःपंथाःतद्ग्रंथटीकाकृतश्रीकृष्णतर्कालंकारस्तु॥पुत्रदौहित्रपौत्रदौहित्रयोरपित्रमातामह
वृद्धमातामहयोःपिंडदानेनोपकारकत्वात् तयोरप्यधिकारःइतियुक्त्यावदति ननुदौहित्रादे
र्गोत्रजत्वंकथमितिचेत् गोत्रशब्देनवंशस्यकथनात्दौहित्रस्यापिपरम्परयातज्जातत्वात् नचै
वंसतिभगिन्यादेरप्यधिकारस्तुस्वपुत्रद्वारेणपित्राद्युपकारकत्वादितिवाच्यं॥नस्त्रीभ्यस्त्वविधर्म्मिश्चि
त्वेनेनबौधायनेनस्त्रीणामदायत्वकथनेनचनिरस्तत्वात् पत्न्यादिनामधिकारस्तुविशेषवच
नादेवाविरुद्धइतिजीमूतवाहनः भ्रातुष्पौत्राधिकारेपिसोदरत्वादिकृतोविशेषोवेदितव्यो नतु
दौहित्राधिकारेइतिध्येयं पित्रदौहित्राद्यधिकारेपिभगिनीसोदरत्वादिकृतोविशेषोऽस्तीतिजी
मूतवाहनमतं इतिकेचित्नैतत्॥श्रीकृष्णतर्कालंकारसम्मतं।यतोमातामहपिंडेमातामही
भोगस्यशास्त्रंनदृश्यतेएवंच दौहित्रान्तपितृसन्तानाभावेपिमहोधनाधिकारीआसन्नत्वात्
तदभावेपितामही॥मातर्य्यपिचवृत्तायांपितुर्माताहरेद्धनं इतिमनुवचनात् पितामहीचस्वेनैव

स्तेनैव प्रपितामही॥ इत्यनेन पौत्रदत्तपिंडभोक्तृत्वात् क्रमप्राप्तत्वाच्च यथा पित्रभावे माता त
था पितामहाभावे पितामही इत्यस्याः पित्र्याप्यत्वात्तु तदभावे दौहित्रान्तात् संतानस्य तत्र
च पितामहपुत्रपौत्रप्रपौत्राणामधिकारे पितृसोदरत्वादिकृतो विशेषः पूर्ववदवधात
व्यः पितामहीसन्तानदत्तपिण्डानाम् पितामह्याऽपि भोग्यत्वात् पितामहीसपत्नीसन्तानद
त्तपिंडानांच तद्भोग्यत्वात् दौहित्रे तु न विशेषः दौहित्रदत्तपिंडस्य मातामह्या अभोग्यत्वात्
ततश्च दौहित्रान्तपितामहसन्तानाभावे च पितामहोऽधिकारी तदभावे प्रपितामहीति प्रपौत्र
दत्तपिंडभोक्तृत्वात् इति जीमूतवाहनस्वारस्ये लिखितमित्यादरणीयं न च विशेषवचनाभावा
त्॥ न स्त्री मूर्खविधर्मि(?)षित्यनेन निषेधोऽस्तीति वाच्यं शास्त्रपारावारस्यापारत्वेन प्रपिता
मह्यधिकारे विशेषवचनं नास्तीति स्वतो वक्तुमशक्यत्वात् तदभावे पूर्ववत् दौहित्रान्तः ततस
न्तानोऽधिकारी तत्रापि प्रपितामहपुत्रपौत्रप्रपौत्राणामधिकारे पितामहसोदरत्वादिकृतो वि
शेषोऽवधातव्यः न तु दौहित्राधिकारे॥ इति गोत्रजाधिकारः॥ तदभावे बन्धुः॥ पत्नी दुहितरश्चै
व पितरौ भ्रातरस्तथा॥ तत्सुतो गोत्रजो बंधुरिति याज्ञवल्क्यात् दौहित्रान्तप्रपितामहसंतानाभा
वे मृतदेयमातामहादिपिण्डभोक्तृणां तद्दातृणांच सन्निकर्षेण मातामहमातुलतत्पुत्रतत्
पौत्रप्रमातामहतत्पुत्रपौत्रप्रपौत्रवृद्धप्रमातामहतत्पुत्रतत्पौत्रप्रपौत्राणां पूर्वपूर्वाभावे
परंपरोऽधिकारी एवं तेषां दौहित्राणामपि मातामहतत्पितृतत्पितृपिंडदानां अधिकारः त
थाच मातामहदौहित्रान्ततत्सन्तानाभावे प्रमातामहदौहित्रान्ततत्सन्तानादीनां क्रमेणाधि
कार इति॥ एतदर्थमेव बन्धुपदं प्रयुक्तवान् याज्ञवल्क्यः इति जीमूतवाहनमतानुसारिणी।
श्रीकृष्णतर्कालंकारसम्मता व्यवस्था तेन मृतभोग्यमृतदेयपित्रादित्रिपिण्डदातुः पित्रदौ
हित्रादेरभावे मृतदेयमातामहादिपिंडदातॄणां मातुलानां आनन्तर्यक्रमेणाधिकार इति
जीमूतवाहनः अत्रेदमवधेयं पुत्रपौत्रदौहित्रयोरपि तत्पुत्रदौहित्रादीनांच सन्निकर्षे
ण मातामहात् पूर्वमधिकारः तेषामपि पिंडदानेनोपकारकत्वात् न चैवं सति स्वपिपित
रिपुत्रदौहित्रस्याधिकारोऽस्तु स्वपिंडदत्वादिति वाच्यं पैतृकपिण्डोपक्रमकर्तव्यत्वेन माताम
ह्यादिपिण्डानां गौणत्वात् स्वतिप्रधानपिण्डदातरि तद्भोक्तरि च पुत्रदौहित्रादेरनधिकारा
त् न चैवं स्वदौहित्रस्य पितृदौहित्रादेरपि तत्पिंडसत्वेऽनधिकारोऽस्तु इति वाच्यं महाभारते
न दौहित्रस्य जन्मनैव उपकारकथनेन मुख्योपकारनिर्देशात् इति अत्र श्रीकृष्णतर्कालंका
रस्यारसोऽप्यस्तीति बन्ध्वधिकारः॥ तदभावे सकुल्यः॥ अतऊर्द्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव
वा॥ इति मनुवचनात् सकुल्यो वृद्धप्रपितामहादिस्तत् सन्ततिश्च समानोदकश्च भण्यते तेषा
मुपन्यासक्रमेणाधिकार इति जीमूतवाहनः॥ पिंडलेपभुजः सकुल्या इति भावः बौधायनः २४४
विभक्तदायादान् सकुल्यानाचक्षते। इति अत्र वृद्धप्रपितामहात् प्रभृति त्रयः पूर्वपुरुषाः प्र ५१

तिपणाकुश्च प्रभृति अधस्तनास्त्रयः पुरुषा एका पिंडभोक्तृत्वाभावात् विभक्तादायादाः सकु
ल्याः इत्याख्यास्यते इति जीमूतवाहनः अत्र च ॥ लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागि
नः । पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषं । इति अशौच सपिंडेष्वेव त्रयः पुरुषाः दायसपिं
डाः त्रयः पुरुषाः दायसकुल्या इत्यवधातव्यं तेन धनितत्पित तत्पितृलेपदातृत्वात्
प्रपौत्रपुत्रस्यादावधिकारः ततः प्रपौत्रपौत्रस्य ततः प्रपौत्रप्रपौत्रस्य तदभावे धनिदत्तपिंड
लेपभोक्तृत्वात् वृद्धप्रपितामहस्य तदभावे तत्पुत्रादिपुरुषत्रयस्य क्रमेणाधिकारः तदभावे
वृद्धप्रपितामहदौहित्रादीनां तत्पार्वणपिंडदानां क्रमेणाधिकारः तदभावे वृद्धप्रपितामहस्य
पुत्रपौत्रप्रपौत्राणां वृद्धप्रपितामहलेपदातॄणां क्रमेणाधिकारः ॥ तदभावेऽतिवृद्धप्रपिताम
हस्य तदभावे तत्पुत्रपौत्रप्रपौत्रदौहित्रप्रपौत्रात्मजतदात्मजतदात्मजानां क्रमेण पूर्ववद
धिकारः तदभावेऽत्यार्य्यवृद्धप्रपितामहतत्पुत्रपौत्रप्रपौत्रदौहित्रप्रपौत्रात्मजतदात्मजत
दात्मजानां क्रमेण पूर्ववदधिकारः ॥ तदभावे समानोदकानामधिकारः चतुर्दशपुरुषपर्यंतं
च समानोदकभावः समानोदकभावस्तु निवर्त्तेताचतुर्दशादिति वचनात् । बृहस्पतिः तदभावे
भ्रातरस्तु भ्रातृपुत्राः सनाभयः ॥ सकुल्या बांधवाः शिष्याः श्रोत्रियाश्च धनार्हकाः मृतोऽनपत
स्योऽभार्य्यश्चेदभ्रातृपितृमातृकः सर्वे सपिंडास्तद्दायं विभजेरन् यथांशतः ॥ समुत्पन्नाद्धनाद
र्द्धं तदर्थं स्थापयेत् पृथक् ॥ मासषाण्मासिके श्राद्धे वार्षिके वा प्रयत्नतः ॥ बहवो ज्ञातयो यत्र
सकुल्या बान्धवास्तथा । यो ह्यासन्नतरस्तेषां सोऽनपत्य धनं हरेत् । अर्द्धं द्रव्यं तदीयश्राद्धार्थम्
स्थापयेदित्यर्थः ॥ तेषां चाष्टमपुरुषस्य तत्पुत्रपौत्रप्रपौत्रदौहित्रादि अष्टमापेक्षया चतुर्द
शपुरुषपर्यंतानां अधिकारः एवं नवमपुरुषादावपि ज्ञेयं आसन्नेरासन्नोपकारस्य च सर्व
त्रैवाभ्यहितत्वात् समानोदकाश्च सकुल्या एव एवंविधसकुल्याभावे च समानोदकाः सकुल्य
पदेनैवोपात्ता मंतव्या इति जीमूतवाहनलिखनात् इति सकुल्याधिकारः ॥ तदभावे आचार्य्यः
तदभावे शिष्यः ॥ अत ऊर्द्ध्वं सकुल्यः स्यादाचार्य्यः शिष्य एव वा ॥ इति मनुवचनादिति जीमूतवा
हनः । अत्र आर्थशाब्दक्रमाभावात् पाठक्रम एवादर्त्त इत्युक्ति प्रायः याज्ञवल्क्योक्तवस्तुप
दात्स्वआचार्य्यपर्य्यन्तस्यैवग्रहणं इति याज्ञवल्क्यवचनेन न्यूनता इत्यवधेयं परे तु आचा
र्य्यस्य पितृस्थानपातित्वात् शिष्यस्य पुत्रस्थानपातित्वात् शिष्याभाव एवाचार्य्यस्याधि
कार इति तत्तुच्छं ॥ तदभावे आचार्य्योऽन्तेवासी तत्स्निग्धा हरेत् तदभावे राजा इति बौधाय
नवचनादि श्रुतादृश्याठात् शिष्याभावे सब्रह्मचारी शिष्यः सब्रह्मचारिण इति याज्ञवल्क्यो
क्तेः आचार्य्यो नाम उपनीय च वेदं दद्यात् स आचार्य्यः स उदाहृतः ॥ इति वचनोपात्त उपनयनकर्त्ताऽ
भिमतः श्रीकृष्णतर्कालंकारोप्येवं ॥ सब्रह्मचारी एकाचार्य्यीत् वेदाध्यायी सब्रह्मचारि
णोऽभावे एकगोत्राः तदभावे एकप्रवराः ॥ पिंडगोत्रऋषिसम्बंधा ऋक्थं भजेरन्निति गौतमवच

नादितिजीमूतवाहनः केचित्तु समानप्रवराभावे एव आचार्य्यादीनामधिकारोस्तु गोतमव
चने पाठक्रमानुरोधात् याज्ञवल्क्यबृहस्पतिबौधायनवचनेषु बन्धुबांधवसकुल्यपदेन गो
त्रसप्रवरयोरपि ग्रहणे क्षत्यभावात् यथा जीमूतवाहनेनैवमनूक्तसकुल्यपदस्य समानो
दकपर्य्यन्तपरत्वमंगीकृतं तथात्रापि गोतमैकवाक्यतानुरोधेन संभवात् इति वदन्ति त
च्चिन्त्यं ॥ अपरे तु तेषु सत्सु शिष्यानन्तरं ऋत्विजोऽधिकारः सपिंडाभावे सकुल्यस्तदभावे
चाचार्य्योऽन्तेवासी ऋत्विग्वा हरेत् तदभावे राजेति बौधायनवचनात् ऋत्विजः साक्षात्
संबन्धात् सब्रह्मचार्य्यपेक्षया प्रथममधिकार इत्यपि युज्यते इति वदन्ति मिश्रास्तु तदयं
संक्षेपः ॥ पुत्रस्तदभावे पौत्रस्तदभावे प्रपौत्रस्तदभावे साध्वी भार्य्या तदभावे दुहिता तदभावे माता
तदभावे पिता तदभावे भ्राता तदभावे तत्पुत्रः तदभावे स्वासन्नसपिण्डः तदभावे यथाक्र
मंव्यवहितसपिंडः तदभावे आसन्नसकुल्यस्तदभावे यथाक्रमंव्यवहितसकुल्यः तदभावे
दौहित्रः तदभावे मातृकुलादिः सर्वाभावे ब्राह्मणधनवर्जं राजा ब्राह्म णधने तु सब्रा
ह्मणान्तरमेव धनग्रहणाधिकारीति आहुः ॥ सगोत्राभावे बंधुः बन्धुश्च आत्मपितृमातृ
णां यथा ॥ आत्मपितुः स्वसुः पुत्राः आत्ममातुः स्वसुः सुताः आत्ममातुलपुत्राश्च विज्ञेया
आत्मबांधवाः ॥ एवं मातापित्रोरपि पितृस्वसेयमातृस्वसेयमातुलपुत्ररूपा बन्धवः ॥ एषां
क्रमेणाधिकारः इत्यप्याहुः ॥ तथा च संक्षेपे तदभावे मातृकुलादिरित्यनेनैव तेषां परिग्र
हः कृत इति भावः अत्र च जीमूतवाहनोक्तप्रकारेण सपिंडसकुल्ययोरभावे पितृमातुल
पुत्रपितृस्वसृपुत्रयोर्मातुलपुत्रमातृस्वसृपुत्रयोरप्यधिकारः इति कल्पयन्ति तन्न समी
चीनं। पितृमातामहमातृमातामहादितत्तद्वंशजघन्यत्वेन पितृमातुलपुत्रादेरधिकारं ति
नाविशेषशास्त्रं कल्पयितुमयुक्तत्वात् बंधुपदस्य पारिभाषिकबंधुपरत्वेन आत्मबंधु
परतयैव चरितार्थत्वात् तेषां चाधिकारस्य फलतः सिद्धत्वात् इति युक्तमुत्पश्यामः ॥ सप्र
वरपर्य्यन्ताभावे ब्राह्मणानाम धिकारः ॥ सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः ।
त्रैविद्याः शुचयो दान्ता एवं धर्मो न हीयते ॥ इति मनुवचनात् त्रैविद्याः वेदत्रयाभ्यासवं तः
एवं धर्मो न हीयते तथा च भोगेन क्षीयमाणो धर्मस्तदीयधनस्य ब्राह्मणगामित्वेन परध
र्म्मप्राप्त्या पूर्य्यमाणो न हीयते इति जीमूतवाहनः तथा सति मृतस्य धनिनः श्राद्धादिधर्म्म
हानिर्भवतीति कुल्लूकभट्टः सप्रवरपर्य्यन्ताभावे मृतधनस्य ब्राह्मणगामित्वे राज्ञो यथा
र्थव्यवहारप्रवर्त्तननिबंधनं धर्म्महानिर्भवतीत्यपरे एषामभाव इति वक्तव्ये मनुना यत् सर्वेषा
मभावे इत्युक्तं तत् परोक्तानामपि सप्रवरादीनामधिकारव्यंजनायेति कुल्लूकभट्टमतं ॥ अ
त्र गोत्रऋषिब्राह्मणसंबंधानां चाभावस्तत्क्रमे बोध्यः ॥ अन्यथा राजाधिकारस्य निर्विषयता
पत्तेरिति जीमूतवाहनः राज्ञोऽधिकारोऽनुपदं वक्ष्यमाणः ॥ सग्रामस्थसद्ब्राह्मणाभावे क्षत्रियादि ५२

धनेराजाधिकारमाहमनुः। अहार्य्यंब्राह्मणधनंराज्ञानित्यमितिस्थितिः। इतरेषान्तुवर्णा
नांसर्व्वाभावेहरेन्नृपः॥ सर्व्वाभावेसतब्राह्मणपर्य्यन्ताभावे। इतरेषांब्राह्मणेतरेषांक्षत्रिया
दीनामित्यर्थः। ब्राह्मणधनंन्तुराज्ञाकदाचिदपिनग्रहीतव्यं तथाचसतब्राह्मणाभावेब्राह्मण
धनंसामान्यब्राह्मणेभ्योदद्यादितिकुल्लूकभट्टाभिप्रायः। तथाचइतरेषांधनंसप्रवरपर्य्यन्ताभावे
सद्ब्राह्मणेभ्योदद्यात्तदभावेराजास्वयंगृह्णीयादितिजीमूतवाहनमतं मिश्रादयस्तुसर्व्वेषामप्य
भावेइत्यादिमनुवचनंब्राह्मणपरंक्षत्रियादिधनंतुराज्ञैवग्रहीतव्यंइतिव्यवस्थायांब्राह्मणध
नमपिकथंसनगृह्णीयादित्याकांक्षानिवृत्तयेआदौब्राह्मणधनस्यराज्ञोऽग्राह्यत्वमाह अहा
र्य्यमित्यादि। अतएववौधायनः ब्रह्मस्वंपुत्रपौत्रघ्नंहन्त्यादेकाकिनंविषं॥ तस्माद्राजाब्राह्मण
स्वंनाददीतकथंचन॥ इतिब्रह्मस्वग्रहणेराज्ञोनिंदामाह पुत्रपौत्रघ्नं पुत्रपौत्रावपिहन्तीत्यर्थः
॥ परमंह्येतद्विषं। ब्राह्मणस्वमितिरत्नाकरः नन्वेतद्वचनंब्राह्मणतोवलात्कारादिनाधनग्रहणे
निंदातिशयबोधकमेववक्तव्यमितिचेन्नदेवलवचनेनस्पष्टमभिधानात्। सर्वत्रादायकंराज्ञा
हरेतब्रह्मणस्ववर्ज्जितं। अदायकंतुब्रह्मस्वंश्रोत्रियेभ्यःप्रदापयत्। दायोदायग्राहीसंप्रदानघ
जात्युत्पत्तिः वृहस्पतिः यरपुत्राःक्षेत्रविट्स्पृद्रापत्नीभ्रातविवर्ज्जिताः। तेषांधनहरोराजासर्व
स्याधिपतिर्हिसः। अत्रवचनेक्षत्रियादीनांधनग्रहणकथनेनब्राह्मणधनस्याग्राह्यत्वमुक्तं।
शंखलिखितौ परिषद्गामिवाश्रोत्रियद्रव्यंनराजगामिनहार्य्यं राज्ञादेवब्राह्मणसंस्थितं॥ निःक्षे
पोपनिधिक्रमागतंनवालस्त्रीधनानिएवन्चाह॥ नहार्य्यंस्त्रीधनंराज्ञातथावालधनानिच॥
नार्य्याःषडागमंवित्तंवालानांपैतृकंधनं॥ परिषद्ब्राह्मणा। इतिविवादरत्नाकरविवादचिंतामणीनिः
क्षेपेत्यादिउपलक्षणंतेनदंडादिकंविनाकथंचिदपिदेवब्राह्मणधनंराज्ञानग्राह्यमित्यर्थः। उपनि
धिःनिःक्षेपविशेषःसमुद्रनिःक्षेपइतियावत्क्रमागतंपितृपरंपरयागतमितिमदनपारिजात
रत्नाकरौएतदेतेषुवचनेषुब्राह्मणधनग्रहणनिषेधात्ब्राह्मणधनंकिंगामिकार्य्यमित्याकांक्षा
यांउक्तस्य। श्रोत्रियेभ्यःप्रदापयेदितिदेवलवाक्यस्यएकवाक्यत्वाच्च॥ सर्वेषामप्यभावेतुइत्यादिम
नुवचनंब्राह्मणमात्रपरंतुतथाचसप्रवरपर्य्यन्ताभावेब्राह्मणधनंश्रोत्रियगामिइतरधनंरा
जगामिनतुक्षत्रियादिधनमपिश्रोत्रीयगामीतिफलितं अतएव अभावेदुहितॄणांहिसकुल्या
वान्धवास्तथा। ततःसजात्याश्चसर्वेषामभावेराजगामितत्। अन्यत्रब्राह्मणांतकिंतुराजधर्म्मपरा
यणः। तत्स्त्रीणांजीवनंदद्यादेषदायविधिःस्मृतः॥ इतिनारदवचनेपिदुहित्राद्यभावएवराज्ञोधन
संवन्धोदृश्यतेनतुश्रोत्रियपर्य्यन्ताभावेसकुल्याःपितृव्यपुत्रादयःसजात्याःएकजातीयाःकिंत्वि
त्यादिनिर्गुणस्त्रीविषयमितिरत्नाकरः एकजातीयाःनक्षत्रियस्यक्षत्रियःवैश्यस्यवैश्यइत्यादिरू
पाअश्रुतकल्पनापत्तेःकिंतुपिंडगोत्रऋषिसंवन्धात्तत्स्वंभजेरन्नितिगौतमवचनेकवाक्य
त्वात् सजात्यंसादृश्यंगोत्रप्रवराभ्यामेवज्ञेयमित्याहुः। निर्गुणस्त्रीविषयमितिक्षत्रियादीनांनि

र्गेणब्राह्मणस्त्रीविषयेतुतद्दायादेभ्य आनीयदद्यादितिवाक्यार्थइतिभावः विष्णुरपि॥अपुत्रधनं
पत्न्यभिगामि तदभावेदुहितृगामि तदभावेपितृगामि तदभावेमातृगामि तदभावेभ्रातृगामि
तदभावेभ्रातृपुत्रगामि तदभावेबंधुगामि तदभावेसकुल्यगामि तदभावेसहाध्यायिगामि तद
भावेब्राह्मणधनवर्ज्जंराजगामीति सहाध्यायिनोऽभावेवचनान्तरैकवाक्यत्वेनतस्योपल
क्षणत्वेनचसप्रवराभावेएवराज्ञोधनसंबंधंदर्शयति नचमनुस्मृतेःसर्वस्मृतिप्रबलत्वात्
तयायदभिहितंतत्रैवमन्वंतरवचनानिसंगमनीयानि इतिसर्वेषामप्यभावेतुइतिवचनैक
वाक्यत्वार्थंअन्यवचनोक्तस्यराज्ञःसतद्ब्राह्मणाभावेएवाधिकारइतिवाच्यं सर्वेषामित्या
दिमनुवचनस्यएवदर्थकरणेपिक्षत्यभावात् मन्वर्थविपरीतायासास्मृतिर्नप्रशस्यतेइति
बृहस्पतिनामनुविपरीतार्थस्यैवाप्रमाण्यकथनात् यथास्मृत्यर्थद्वयविवादेन्याययुक्तस्मृ
त्यर्थएवबलवान्। तथामनुस्मृत्यर्थद्वयविवादेमन्वंतरवचनैकवाक्यतापन्नमनुस्मृत्यर्थ
एवबलवानितिकल्पयितुंन्याय्यत्वाच्चेति तथाचइतरेषांतुवर्णानांसर्वाभावेहरेन्नृपः इत्य
त्रसर्वशब्दस्यपूर्वोक्तऋक्थहराभावेइतिकुल्लूकभट्टोपदर्शिततदर्थवाक्येऋक्थहरशब्दस्य
सप्रवरपर्यन्तोऽर्थः ननुब्राह्मणपर्यन्तइत्याशेरतेमतयोरनयोरेकमेवोपादेयंब्राह्मणधनं
यदिअन्येब्राह्मणानगृह्णन्तिनसन्त्येववातदाब्राह्मणस्यतुयद्द्रव्यंसान्वयस्यनचास्तिसः।
सकुल्येभ्योऽस्यनिनयेतदभावेऽस्यबंधुषु। यदातुनसकुल्याःस्युर्नचसम्बन्धिबान्धवाः। तदा
दद्यात्द्विजातीभ्यस्तेष्वसत्स्वप्सुनिंक्षिपेत्॥इतिनारदोक्तवत् अत्रापिजलेक्षिपेदिति
विभावनीयं शंखलिखितौ परिषद्गामिवाश्रोत्रियद्रव्यंनराजगामिनहार्य्यंराज्ञादेवब्राह्म
णसंस्थितंसनिःक्षेपोपनिधिक्रमागतंनवालस्त्रीधनानि। एवंत्वाह नहार्य्यंस्त्रीधनंराज्ञा
तथाबालधनानिच॥नार्य्याःषडागमंवित्तंबालानांपैतृकंधनं॥बालधनानिस्त्रीसंबन्धीनि
धनानिवास्ववशेप्राप्तान्यपिराज्ञानग्राह्याणीत्यर्थः॥अत्रप्रमाणानुपन्यस्यतः। शंखलिखि
तौस्वयमेव। एवंत्वाहइतिवेद इतिशेषः। स्त्रीधनंस्त्रीसंबन्धीधनंभर्तृदायादिबालधनानि
बालकेनकथंचित्लभ्यानिकेनचित्दत्तानीति केचित्तुस्त्रीधनंबालधनानिचविवृणोति॥
नार्य्याःषडागममित्यादिएवञ्चस्वकीयस्त्रीस्वस्रादिपरं॥अन्यस्त्रीणांन्तुदायादिकमपिन
ग्राह्यमितिउत्तरत्रव्यक्तीभविष्यतिइत्याहुःषडागममध्यग्न्यादिषडागमलब्धं मनुः बालदा
यागतंरिक्थंतावद्राजानुपालयेत्। यावत्सस्यात्समावृत्तोयावद्वातीतशैशवः। बालदाया
गतंबालस्वामिकंअनुपालयेत्दायादेभ्योरक्षेदितिरत्नाकरः॥तथाचअप्राप्तव्यवहारंबालं
वंचयित्वायथाअन्येदायादाःसर्वंनगृह्णीयुस्तथाकुर्य्यादित्यर्थः॥यद्वादायादेएवकस्मिंश्चित्
अन्यस्मिन्वातदंशंवानिःक्षिपेदित्यर्थः। यावत्सस्यादितिवर्णत्रयाभिप्रायेणतेषांसमाव १७६
र्त्तनात्प्राक्व्यवहारानधिकारात् यावद्वेतिशूद्रादिप्रायेणअतीतशैशवःषोडशवर्षान्यूनव ५३

श्लोकः २५

या:।विष्णुः वालधनानिस्त्रीपुंधनानि राजापरिपालयत्॥संखलिखितौरक्षेद्राजावालानांध
नान्यप्राप्तव्यवहाराणांश्रोत्रियपत्नीर्वीरपत्नीनां प्रहीणस्वामिकानि राजागामीनिभवन्ति॥श्रोत्रि
यपत्नीनांश्रोत्रियेवीरपत्नीनांच॥वीरेप्रोषितेऽपगतेवातत् पत्नीगत धनंराजापालयेदितिचण्डेश्वर
सम्मतव्याख्या पुत्राधिकारेवौधायनः तेषांअप्राप्तव्यवहाराणांसोपचयानंशान् सुनिगुप्तान्निद
ध्याद्राव्यवहारप्रापणात्॥सोपचयान् सवृद्धिकान्सुनिगुप्तान्सुरक्षितान् आङ्‌·अभिविधौतेन
सप्तदशवर्षात्प्राक्इतिरत्नाकरः तथाचस्वामिनिमृतेतद्धनेचपुत्रैर्विभज्यमानेवालकेनपुत्रेण
अन्येनवंधुनांराजपुरुषेणवाज्ञापितोराजावालकस्यश्चोडषवर्षवयोयावत् केनचित्स्वनियुक्तेन षो
पुरुषेणस्वेनैववातदंशः पालनीयः वृद्ध्यर्थंप्रयोज्यापिक्वचिदितिभावः एवंव्ययादिकमपिस्वयं
स्वनियुक्तपुरुषेणवाअवेक्षणीयंइत्यादिकंयुक्त्याऊहनीयं एवंयस्यभ्रातानास्तितस्यसमुदायध
नमपिएवंरीत्यैवपालनीयंतुल्ययुक्तेरित्यवधेयं॥एवंचस्त्रीधनंवालधनंचराजवश्यतामायातंरा
ज्ञास्वामित्वेननग्रहीतव्यमितिपूर्वमुक्तंअत्रेदमवधेयंदायादादिषुवालधन निःक्षेपः वालकानुम
त्याएवकर्त्तव्यः वालस्यात्यंतव्यवहारानर्हत्वेतुतन्मात्रादिरूपासन्ननिर्दोषसुहृदमनुमत्यैवेति व
न्धूनांवालधनपालनमाह कात्यायनः प्रोषितस्यचयोभागोरक्षेयुः सर्वएवतं॥वालपुत्रेमृतेऽर
क्ष्यंरक्ष्यंततस्तुवंधुभिः पौगंडात् परतस्तत्तुविभजेरन्यथांशतः॥वालःपुत्रोयस्यएवंभूतेमृतेवालक
वन्धुभिर्भ्रातृभिरेवतद्धनंरक्षणीयं नतुतदानीमेवविभजनीयंपौगंडात् परतस्तुविभजेरन्इतिवा
क्यार्थः तथाचप्रोषितभागवत् पौगंडभागोपिवन्धुभिःरक्षणीयःतुल्ययुक्तेःपौगंडात् पूर्वंतुविभा
गएवनोचितइत्यवधेयं एवंचवालस्यधनंभ्रातृभ्योऽप्यारूपेणप्राप्तंराजावंधवोवाराज्ञाप्रतिषिद्धाः
पालयेयुः अत्रवंधवोज्ञातव्यः अभावेभागिनेयदौहित्रादयः॥आसन्नाःव्यवहारस्तुमातावाल
कंवालधनंचपालयतीतिस्पष्टुक्तः सतिसामर्थ्येकिंतुसापिस्त्रीश्वश्र्वादिवशगाफलतस्तत्रैववध्व
पौत्रधनानिपालनीयानि तस्याअपिस्त्रीत्वात् वन्ध्वन्तरमपेक्षते सचवंधुःपितामह्याअभिमतोग्रा
ह्यः॥राजाभिमतश्चतेषांमध्ये पितामह्याएवव्यवहारकुशलत्वात् राज्ञश्चसर्वाध्यक्षत्वात् यदिचव
धूःप्राचीनास्वरक्षणादिकुशला तदातदभिमतवधुनापालनेपिनदोषः यथाकथंचित्वध्वादि
पालनस्यैवोपादेयत्वात् अत्रश्वश्रुवध्वोर्विवादेराज्ञाचेत् दूरस्थितत्वादिनासदसत्स्वरूपंसू
क्ष्ममवधारयितुंनशक्यतेतदातुस्वाभिमतएवकश्चित्पुरुषःनियोजनीयइतिस्ववुद्धिकल्पि
तोयुक्तिसिद्धःपंथाः वृहस्पतिः भ्रातावाभ्रातृपुत्रोवासपिण्डःशिष्यएववा॥सहपिंडक्रियांकृत्वा
कुर्य्यादभ्युदयंततः॥तथाचप्रेतधनहारीप्रेतस्यऔर्द्ध्वदेहिकंकुर्य्यात् यदिचएकोधनाधिकारीअ
न्यऔर्द्ध्वदेहिकाधिकारीभवति तदाधनंदत्वाक्रियाधिकारिणाक्रियांकारयेदिति स्मृतिः योध
नमसदद्दीतसतस्मैश्राद्धंकुर्य्यात् अत्रश्राद्धशब्देनप्रेतैकोद्दिष्टान्युच्यन्तेइतिप्रकाशरत्नाकरौ।
अन्येतुमासषाण्मासिकेश्राद्धेवार्षिकेवाप्रयत्नतः॥इतिप्रागुक्तवृहस्पतिवचनात् प्रेतधनग्रहण

कर्त्रीवार्षिकंश्राद्धमपिकर्त्तव्यंव्यवह्रियेतेपिकेश्चित्तथैवेतिवदन्ति तन्नवार्षिकपदस्यसपि
ण्डीकरणपरत्वेपिक्षितिविरहात्।अकृत्वाप्रेतकार्य्याणिप्रेतस्यधनहारकः॥इत्यादिवचनमपि
प्रेतैकोद्दिष्टपरं नन्वयस्यक्षत्रियस्यआचार्य्योधनहारीतस्यौर्द्ध्वदेहिकक्रियांकथंकुर्य्यात्।यथा।
ब्राह्मणस्त्वन्यवर्णानांयःकरोत्यौर्द्ध्वदेहिकं॥तद्वर्णत्वमसौजातिइहलोकेपरत्रच॥इतिअनेननिषे
धात्इतिचेन्न एतद्वचनस्यासवर्णभ्रातृपरत्वात्।आचार्य्यःसजातीयाधिकारीद्वाराऔर्द्ध्वदेहि
कंनिष्पादयेदित्युक्तावपिक्षतिविरहाच्च।विष्णुःयःश्राद्धनहरःसपिण्डदायीइतिगृहस्थधनाधि
कारेपर्य्याप्तिआश्रमान्तरगतधनाधिकारमाह याज्ञवल्क्यःवानप्रस्थयतिब्रह्मचारिणामृक्थ
भागिनः।क्रमेणाचार्य्यसत्शिष्यधर्म्मभ्रात्रेकतीर्थिनः॥अत्रएकतीर्थीसमानगुरुःधर्म्मभ्रा
ताचासौएकतीर्थीचेतिकर्म्मधारयः॥क्रमेणप्रतिलोमक्रमेणतेनब्रह्मचारिणोनैष्ठिकस्य
धनमाचार्य्योगृह्णीयात्यतेर्धनंसत्शिष्यःअध्यात्मशास्त्रश्रवणधारणतदनुष्ठानदक्षः
वानप्रस्थधनंधर्म्मभ्रात्रेकतीर्थीगृह्णातिधर्म्मभ्रातात्वेनप्रतिपन्नः एकतीर्थी एका
श्रमी यद्यनंशाआश्रमांतरगतां इतिवशिष्ठवचनविरोधः तथाप्ययथाकथंचिद्धनवत्त्वमा
दायसमाधेयमिदंइतिचरुउम्बरःवाचस्पतिमिश्रोप्येवं परस्तुयथाकथंचिद्धनवत्त्वमादायेत्य
स्यस्फुटंकिंयदुक्तवानयथावानप्रस्थस्यवार्षिकसंचयः यतेस्तुकौपीनादिकमेवधनमिति
जीमूतवाहनस्तुएकतीर्थीतिविभिन्नंतथाच वानप्रस्थधनंधर्म्मभ्रातायतिधनंसत्शिष्यः
नैष्ठिकब्रह्मचारिधनंआचार्य्योगृह्णीयात् तदभावेएकतीर्थी एकाश्रमीति नैष्ठिकब्रह्मचा
रीयथा पित्रादिपरित्यागेनयावज्जीवमाचार्य्यकुलनिवासपरिचर्य्यानिष्ठा तेनकृतउपकुर्वाण
कस्यब्रह्मचारिणोधनंपित्रादिभिरेवग्राह्यमिति उपाकुर्वाणकःपित्रादिसन्निहितोब्रह्मचारीति
पंडिताः नचवानप्रस्थधनमाचार्य्योगृह्णीयादितिविष्णुसूत्रैकवाक्यतयाक्रमोत्रानुलोमक्रमो
ऽस्तुकिंप्रतिलोमक्रमेणेत्यनेनइतिवाच्यं तथासतिनैष्ठिकब्रह्मचारिणांसत्यपाचार्य्येधर्म्मभ्रा
तुर्धनाधिकारित्वेनानुभवविरोधात् नचात्रपुत्रधनाधिकारवत्पूर्वपूर्वाभावेपरंपराधिकार
रूपएवात्रक्रमोऽस्त्वितिवाच्यंयतेराचार्य्यसंभवात् तथाचवानप्रस्थधनमाद्यावाचार्य्योगृह्णी
यात् तदभावेधर्म्मभ्राता इत्यपुत्रधनाधिकारवदिहापिवोध्यंजीमूतवाहनमतेचधर्म्मभ्रात्रेक
तीर्थिनइत्यत्रउभयोपादानंव्यर्थंधर्म्मभ्रातृशब्देनैवचरितार्थत्वादित्याशयः।एवंक्रमोहिसमसं
ख्यकत्वएवभवतियथा।तस्याःप्रवृद्धलीलाभिरालापस्मितदृष्टिभिः।जीयन्तेवल्लकीकुन्दमृगे
न्दीवरसंपदः।इत्यत्रअन्वयसंख्यावैषम्यमिति तथाविषमसंख्यकानांक्रमत्वाकारेविक्रमयेषप
तितस्यैवत्यागोर्थायत्नोभवतिक्रमिणोऽभावात् नतुक्रमपूर्वयातिनःइतिचपूर्वपक्षःसमाधेयः
अन्वयवोधस्यतात्पर्य्याधीनत्वात् यथाखड्गीकुंडलीचचैत्रस्तादृशोमैत्रइत्यादौक्वचित्तात्पर्य्यसि
तेतादृशपदेनकुण्डलिनएवोपस्थितिःयत्तुयतिपक्षेशिष्यपदस्यअनुष्ठानशिक्षापात्रपरत्ववत् ५४

आचार्यपदस्य अनुष्ठानोपदेशकपरत्वमस्तु तथाच वानप्रस्थादीनां धने आदौ आचार्यस्य
तदनु शिष्यस्य तदनु धर्मभ्रातुस्तदनु एकतीर्थिनः इत्येवमेव क्रमोऽस्त्विति तन्न शिष्टाचारवि
रोधादिति। अपुत्रधनाधिकारे श्रुतं संसृष्टिनो धनं संसृष्टी गृह्णीयादिति तत्र यदि संसृष्टिनौ द्वा
वेव पुनर्विभजतः तत्र कीदृशी व्यवस्था इति चेदत्र मनुर्विष्णुर्विभक्ताः सह जीवन्तो विभजेरन् पुनर्य
दि॥ समस्तत्र विभागः स्यात् ज्यैष्ठ्यं तत्र न विद्यते॥ अत्र समस्तत्रेति सवर्णभ्रातृसंसर्गाभिप्रायेण॥
ब्राह्मणक्षत्रिययोस्तु संसर्गे पूर्वक्लृप्तभागानुसारेणैव भागो बोद्धव्यः पूर्वक्लृप्तज्येष्ठांशनिषेधमात्रप
रत्वादिति जीमूतवाहनः॥ ननु विभक्ता भ्रातरो येच संप्रीत्यैकत्र संस्थिताः। तेषां विभागकरणे पुनर्ज्ये
ष्ठ्यं न विद्यते॥ इति बृहस्पतिवचनैकवाक्यत्वात् पुनर्विभागनिबंधनपुनर्ज्यैष्ठ्यस्यैव निषेधः
नतु प्राक्तनज्यैष्ठ्यस्य तस्य पूर्वमेव सिद्धत्वात् इति चेन्न येषामेव हि पितृभ्रातृपितृव्यादीनां पितृपि
तामहार्जितद्रव्येण विभक्तत्वमुत्पत्तितः संभवति अतएव विभक्ताः सन्तः पूर्वकृतविभागध्वंसे
न यन्नव धनं तन्मम धनं यन्मम तत्तवेति एकगृहे एकरूपतया संस्थिताः संसृज्यन्ते इति जीमूत
वाहनवाक्यात् पूर्वविभागप्रकाशितस्वत्वध्वंसेन अखिलेषु धनेषु उभयेषां स्वत्वोत्पत्तौ पूर्वत्वस्य ज्ये
ष्ठांशे ज्येष्ठस्यासाधारण्यस्यैवासंभवात् नच विभागध्वंसपदेन विभागप्रत्ययपरम्परा ध्वंस एवोक्तः
नतु स्वत्वध्वंस इति वाच्यं तथासति पुनर्गुटिकापातस्तत्रैव द्रव्ये इति नियमाभावात् द्रव्यान्तरे गुटि
कापाते नच तत्रापि स्वत्वज्ञानात् पुनर्विभागोत्तरं प्रायः सर्वेष्वेव द्रव्येषु उभयोः स्वत्वापत्तेः नन्वेवं स
ति ब्राह्मणक्षत्रिययोः पूर्वक्लृप्तभागः कथं तिष्ठतीति वाच्यं। नानावर्णविभागवचनस्य पूर्वविभाग इव
द्वितीयविभागेऽपि विषयत्वसंभवात् वाक्यान्तरेण च तन्निषेधाभावाच्च तथैव कल्पितत्वात्॥ एवं च पू
र्वक्लृप्तभागानुसारेणेत्यस्य पूर्वस्मिन् व्यवस्थापितो यो विभागः तदनुसारेण तद्रूपेणेत्यर्थः अस्या
पि विभागत्वाविशेषादिति भावः॥ मिश्रास्तु ज्यैष्ठ्यमिति अंशाधिक्यप्रयोजकरूपवत्त्वं पंशाधिक्यं
नेत्यर्थः विद्यार्जितत्वस्यापवादमयमेव वक्ष्यतीत्याहुः तथास्यायमेवाशयः जन्मविद्या
गुणज्येष्ठो द्व्यंशं दायादवाप्नुयात् इति बृहस्पतिवचनात् जन्मादिनिबन्धनज्येष्ठत्वसत्त्वेन अत्रापि
विभागे विभागत्वसत्त्वात् पुनः प्राप्तो ज्येष्ठांशो निषिध्यते इति पूर्वप्राप्तज्येष्ठांशस्य पूर्वमेव सिद्धत्वात्
फलैक्यं पांडित्यमस्य विशिष्यते यत्तु विद्यार्जितत्वस्यापवादमाहेत्युक्तं तत्र विरोधस्य विवक्षितं॥ सामान्य
तोऽर्जित एव द्व्यंशरूपवक्ष्यमाणापवादस्य न्याय्यत्वादिति पूर्वविभागवत् अत्रापि अर्जकस्य द्व्यंशि
त्वमाह॥ विभक्तानां तु यः कश्चित् विद्याशौर्यादिना धनं प्राप्नोति तस्य दातव्यो द्व्यंशः शेषाः समांशि
नः॥ विद्याशौर्यादिना असाधारण्यप्रयोजकरूपवदन्येनेति रत्नाकरः॥ तथाच॥ साधारणं समा
श्रित्य यत्किंचिद्वाहनायुधं। शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः। तस्य भागद्वयं देयं शेषास्तु
समभागिनः॥ इति व्यासोक्तमाद्यविभागधर्मं द्वितीयविभागेऽतिदिशति तस्माद्रत्नाकरादिमते
विद्यादिनासंबन्धमात्रेण साधारणधनोपघातादिनार्जितेऽर्जकस्य द्व्यंशित्वं कात्यायनोक्तपरि

भाधिकविद्यार्जितधनेसाधारणधनाद्यनुपघातेसतिअर्ज्जकस्यासाधारण्यंतदुपघातेतोस
मविद्याधिकविद्ययोरेकैकांशित्वं न्यूनविद्याविद्ययोरनंशित्वमेवकृष्यादिनार्जितेऽनुपष्टम्भ
सत्वेऽर्जकासाधारण्यंततस्तत्वेसर्वेषामंशित्वमितिप्रागुक्तं अत्रापिवोध्यं जीमूतवाहनादिम
तेतुयथाकथंचित्तुसाधारणधनोपघाताद्यर्जितधनेऽर्जकस्यद्व्यंशित्वंइतरेषामेकैकांशित्वं
साधारणभक्तोपयोगेनविद्याऽर्ज्जनेतुधनार्ज्जनेसाधारणविद्याद्रव्यानुपश्लेषेपिसर्वेषांयथा
भिहितमंशित्वंविद्याधनार्जनकालेसाधारणभक्तधनानुपश्लेषेपिसमविद्याधिकविद्ययोरंशि
त्वं साधारणउपष्टम्भपुत्राकृष्यादिनासाधारणधनानुपघातार्जितेऽर्जकस्यासाधारण्यमितिप्राग्
क्तंबोध्यं सर्वत्रैवमतेउपष्टम्भानुसारेणैवभागः॥मैत्रौद्वाहिकादावसाधारण्यंएतावत्पर्यंतं
यथायोग्यं बृहस्पतिवचनस्यतात्पर्यमालोकनीयं अत्रननुपः अर्ज्जनकुशलः पूर्वविभागात्प्रा
क् बहुतरमर्जयामास ततोविभागकालेतस्यद्व्यंशभागित्वमासीत्तस्ययोवाविभागांतरमेव
बहुतरमर्जयामासतस्यचततःसंसृष्टित्वशन्नपरंपुनर्विभागकरणेकीदृशोभागः समइतिचेदनु
भवविरोधः तस्मात्समत्वएवविभागःस्यात् ज्येष्ठांततत्रनविधत्तेइत्यनेनज्येष्ठांशनिषेधस्य
मेवसमत्वंव्यवस्थापनीयं एवंचनानावर्णभ्रातृसंसर्गेत्तरमपिविषमविभागःसिद्ध्यति।तेषांवि
भागकरणेपुनर्ज्येष्ठ्यंनविद्यतेइत्यनेनपुनर्ज्येष्ठांशएवनिषिध्यतेनतुपूर्वज्येष्ठ्यनिषेधः॥ त
स्यसिद्धत्वात्॥पुनर्विभागकरणेतेषांज्यैष्ठ्यंनविद्यते॥इतिचंडेश्वरादिसम्मतपाठेपिपुनर्वि
भागकरणएवज्येष्ठत्वनिषेधइत्यर्थः नचज्येष्ठ्यपदंसामान्यपरमेवास्तुविशेषपरत्वेप्रमाणाभा
वात् पुनःसंसृष्टेपित्वर्थेऽस्तुइतिवाच्यं।पूर्वलब्धज्येष्ठांशस्यइदानींनिषेद्धुमशक्यत्वात् अधिकध
नंदत्त्वासंसृष्टीभूयअल्पंगृहीत्वाविभागस्यानुभवविरुद्धत्वात् योऽर्जकःपूर्वमुक्तःतत्तुल्यत्वाच्च न
नुसमुदायधनएवउभयस्वत्वेजातेऽनन्तरंविषमविभागेषुप्रमाणाभावइतिवाच्यं संभूयवणि
ग्भिःविषमसंख्यकैर्धनैर्वाणिज्यंकुर्वद्भिरुत्पादितेद्रव्येसर्वेषांस्वामित्वाविशेषेपियथाधना
नुसारेणभागोभवति तथात्रापिकल्पनेबाधकाभावात्॥अतएवमिश्राःअंशाधिक्यप्रयोजक
रूपवत्त्वेपिअत्रांशाधिक्यंनेत्यनेनद्वितीयविभागएवज्येष्ठांशनिषेधमाहुः।ननुपूर्वप्राप्तज्येष्ठ्य
स्यापिनिषेधंपूर्वक्लृप्तज्येष्ठांशनिषेधमात्रपरत्वाद्वचनस्येतिजीमूतवाहनवाक्यस्यचपूर्वक्लृप्तः
पूर्वस्मिन्विभागेक्लृप्तःमुनिभिःकथितोयोज्येष्ठांशस्तन्मात्रनिषेधपरत्वादित्यर्थः इत्यपरेआहुः
॥संसृष्टिनमाहबृहस्पतिः।विभक्तोयःपुनःपित्राभ्रात्रावैकत्रसंस्थितः।पितृव्येणाथवाप्रीत्यासतुसंस
ष्टउच्यते॥वचनोक्तैःपित्रादिभिरेवसंसृष्टित्वंसिद्ध्यतीतिस्मार्त्तादीनांमतं वाकारेणानास्ययायेषामे
वाविभागउत्पन्नितःसंभवतितैःसर्वैरेवप्रपौत्रपर्यन्तैश्चसंसृष्टित्वंभवति इतिचंडेश्वरादिमतं॥
अत्रसंसृष्टिपुत्रादिसत्वेऽसंसृष्टिपुत्रादीनामनधिकारइतिकेचिदाहुः स्त्रीभिश्चकैश्चिन्नसंसृष्टि
त्वंस्वीक्रियतेइतिधेयं॥अत्रउत्रान्विभज्यकेनचित्पुत्रेणसहसंसृष्टीभूयतिष्ठतःपुत्रांतरमुत्पाद्य ९५

मरणे तद्धने विभक्तजस्यैवाधिकारः। ऊर्द्धं विभागाज्जातस्तु पित्र्यमेव हरेद्धनं। संसृष्टा येन वा ये स्युर्वि
भजेत स तैः सह॥ इति मनुवचनात् विभजेत इति संसृष्टाः स्वकीयं स्वकीयं भागं गृह्णीयः विभक्त
जश्च पित्र्यमंशं न च विभक्तजस्य संसृष्टैः सह विभाग एव विभजेत इति वाक्यस्यार्थः इति वाच्यं विभ
क्तजः पित्र्यमेव इत्यस्य वाधापत्तेः नचैवमपि संसृष्टिनस्तु संसृष्टी इत्यस्य वाध इति वाच्यं तस्य तु
ल्य सम्बन्धि सद्भाव विषयकत्वात् नच संसृष्टिनः संसृष्टित्वं धर्मः विभक्तिजस्य च विभक्तजत्वमि
ति द्वयोरेवासाधारण धर्मद्वयसत्वात् विभाग एव युज्यते इति वाच्यं। अनीशः पूर्वजः पित्र्ये इत्यने
न विभक्तजसत्वे विभाग पूर्वजातानां विभागानंतरं पित्रा परिगृहीत धनेऽनधिकारवोधनात् विना
नुभयवाधं शास्त्रवाधं च तद्वचनस्य विशेषपरत्व कल्पनायोगात् तथाहि संसृष्टाः स्वांशैरेव कृता
र्थाः विभक्तजस्य तु पित्र्य एवांशो जीविकेति अवधातव्यं अथ यः भ्रात्रंतरेणासंसृष्टः तस्य चेत् किंचि
द्द्रव्यं अविभक्तमेवासीत् अनंतरं तत् द्रव्ये कस्याधिकार इति चेत् संसृष्टिनस्तु संसृष्टी तिवचने संसृ
ष्टि पुरुष धन एव संसृष्टिनामधिकारवोधनात् अविभक्तस्य तद्धनस्यापि संसृष्टि पुरुषस्वत्वावि
शेषात् संसृष्टिनामेवाधिकारः। इतिनारदः संसृष्टिनां तु यो भागस्तेषामेव स इष्यते। अतोऽन्यथां
शभाजस्तु निर्वीजे ष्वितरानियात्॥ इति मिश्रसम्मतः पाठः॥ संसृष्टानां वाधक सम्बन्ध्य सद्भावे सत्य
पि तुल्य सम्बन्धिनि असंसृष्टिनि संसृष्टिनामधिकारः। अतोऽन्यथा संसृष्टिनामभावेऽंशभाजः सं
सृष्टि पुत्रादीन् इयात्। अथ च संसृष्टिनोर्द्वयोः पुत्रमुत्पाद्य एकस्य मरणोत्तरं पुत्रादिकं विना कृतस्या
परस्य मरणे तद्धनं संसृष्टि पुत्रा एव गृह्णीयुरिति भावः। निर्वीजेषु निरपत्येषु पुत्रादि शून्येष्विति यावत्
इतरान् पत्न्यादीन् इयात् गच्छेत् तथा च तादृश स्थले संसृष्टिन उत्तराधिकारिण एव तद्धनं गृह्णीयुः।
नान्ये असंसृष्टिन स्तदुत्तराधिकारिणो वा इति केचित् संसृष्टानां यो भागः स तेषामेव संसृष्टानामेव
तदभावेऽन्याधिकार ज्ञापनाय मूलं वधरूपः यद्वा तद्धनस्यापि फलतः पित्राद्यर्जितत्वात् विभागका
ले॥ पितर्युपरते पुत्रा विभजेयुर्धनं पितुः॥ इत्यादि देवलादि वचनेभ्यः पुत्रत्वाविशेषात् सर्वेषां पुत्रा
णां विभाग ग्रहणमाशंक्य नियमयति तेषामेवेति अतोऽन्यथा संसृष्टानामभावेऽंशभाजः पुत्रादय
इति वोध्यं॥ निर्वीजेषु निरपत्येषु पत्न्येषु संसृष्टिषु प्रमीतेषु इतर संसृष्टान् इयात् गच्छेदित्यर्थः इति मि
श्र सम्मत व्याख्या इतरान् पियानुक्तांश्चिदित्यपि यथायोग्यं उक्तव्यवस्थानुसारेण वोध्यं। अत्र मिश्राः।
संसर्गकाले यो यस्य भाग आसीत् स पुनर्विभागकाले प्रत्यभिज्ञायमानस्तस्यैव रक्षणीय इति तु न पूर्वा
र्द्धार्थ संसर्गे न सम्भावे एतादृश नियमे वाक्यस्यादृष्टार्थतापत्तेः इत्याहुः। पारिजाते तु अतोऽन्यथांश
भाज इति पठितं तत्तु वहुग्रंथ विसंवादत्वक्तमिति रत्नाकरः कात्यायनः संसृष्टानां तु संसृष्टाः पृथक् स्था
नां पृथक् स्थिताः अभावे शहरा ज्ञेया निर्वीजान्योन्यभागिनः। एकस्याभावे यदपरस्यार्थहरत्वमुक्तं तत्
विशिनष्टि निर्वीजेति ते हि परस्परं निरन्वयापरभाग भाज इत्यर्थः इति मिश्राः॥ निरन्वये तु पलक्षणं प
त्न्यादि शून्यादेः तेन निरन्वयस्य सत्यां पत्न्यां न संसृष्टिनो भ्रात्रादेरधिकारः। एतेन निरन्वयेति मिश्रव्या

ख्यानात् असंसृष्टिपुत्रवतः पुत्रांतरसंसृष्टिनश्च पितरुपरमे तद्धनं सर्वैरेव पुत्रैः समं विभज
नीयं संसृष्टित्वगतविशेषे निरन्वयत्वस्य तत्र त्वादितिनिरस्तं अन्वयपदस्य उपलक्षणत्वे
भ्रात्रादिपर्यंतपरत्वस्यावश्यकत्वात् अन्यथा सति भ्रातरि संसृष्टिनो धने संसृष्टिनः पि
तृव्यस्याधिकारापत्तेः॥ तस्मात् बाधकसम्बन्ध्यभवितुल्यसम्बन्धिनां मध्यात् संसृष्टानामे
व संसृष्टधनेऽधिकारः॥ तत्रापि भ्रात्रादौ विशेषो वाचनिकः सोदरत्वादिना एवं चात्र अन्व
यपदं बाधकसम्बन्धिपरं मिश्रस्य लक्षणायामयं स्यं आशयो वर्त्ततेतेन संसृष्टिपुत्रवत्त्वेऽ
संसृष्टिपुत्रस्यानधिकारलिखनात् इत्यवधेयं यत्तु अत्र वचने बीजपदेन संतानस्य शीघ्र
प्रतातिः सन्तानाभावः एवं संसृष्टित्वनिबंधनविशेषः इतियुक्तिसिद्धोऽर्थस्तत्रायं दोषो ल
क्ष्यते॥ यथा बाधकसंबन्ध्यसद्भावे सत्सु तुल्यसम्बन्धिषु संसृष्टानामेवाधिकार इति विधेः
पुत्राद्यभावे इतिस्वातंत्र्यविशेषणात् गौरवं निर्मूलकं च निर्बीजपदस्य उक्तार्थसंभवात्०॥
इति विवादभंगार्णवे दायभागदीपे अस्मत्कर्षमिरकृतरत्नमष्टमं॥ ० ॥ अथ स्त्रीधनं॥
तत्र नारदः॥ पितर्य्यूर्द्ध्वं गते पुत्राः विभजेरन् पितुर्धनं मातुर्दुहितरोऽभावे दुहितृणां तदन्व
यः॥ मनुः॥ ऊर्द्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समं॥ भजेरन् पैतृकं रिक्थमनीशास्ते हि
जीवतोः॥ पैतृकमित्येकशेषात् पितृधनं मातृधनं चेत्यर्थ इति कुल्लूकभट्टाचार्य्यः॥ तथा च मा
तृधनं दुहितरः पुत्राश्च प्राप्नुवन्तीति फलितार्थे तत्र मातृधनं कीदृशं केन लभ्यमिति विशेषाय
मातृधनान्येव विविच्यंते तत्र मनुः कात्यायनेन॥ अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतितः स्त्रियै मातृ
भ्रातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतं॥ अध्यग्नि उद्वाहकाले येनकेनचिद्दत्तं अध्यावाहनिकं
पतिगृहं नीयमानायाः दत्तं तायस्यित दत्तं च प्रीतितः॥ इति शीलधर्म्मेण पुण्यादिपून्नुपन्नप्रीति
नाश्वशुरादिना दत्तं च॥ षड्विधमिति न्यूनसंख्याव्यवच्छेदार्थं नत्वधिकसंख्याव्यवच्छेदार्थं।
आधिवेदनिकस्यापि स्त्रीधनस्याधिकस्य याज्ञवल्क्येनाभिधानात् तथा च याज्ञवल्क्यः पितृ
मातृपतिभ्रातृदत्तमध्यग्न्युपागतं आधिवेदनिकं चापि स्त्रीधनं परिकीर्त्तितं॥ इति रत्नाकरः
भर्तृगृहात् पतिगृहं यदा वाह्यते तदा श्वशुरादिभिर्दत्तं मध्यावाहनिकमिति मेधातिथि स्तद
त्रापि याह्यं न्यायसाम्यादिति [redacted] रत्नाकरं अध्यग्निधनमाहकात्याय
नः॥ विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ॥ तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्त्तितं
अत्र दीयते इत्यस्य कर्त्ता न पित्रादिना इति तथा सति मातृभ्रातृपितृप्राप्तमित्येनैव गतार्थत्ता
स्यात् तस्मात् येन केन चिद्दीयते इत्येवार्थः॥ अत एवोक्तं रत्नाकरकृता उद्वाहकाले केन चिद्दत्तमि
ति कन्याया विवाहकाले सुहृदोपि कन्यासम्मानार्थं यद्ददाति तदपि स्त्रीधनमिति एवं च यथावि
वाहितायैव ध्वैच सुहृदो मानार्थं किंचिद्ददाति तिव्यवहार एतद्देशेऽस्ति तथा कन्यायै कन्यापि १४९
तृसुहृदः किंचिद्ददतीति व्यवहारोपि कुत्र चिद्देशेऽस्तीत्यवगम्यते अध्यावाहनिकमाह॥ सएव॥ ५६

यत् पुनर्लभते नारी नीयमाना हि पैतृकात्। अध्यावाहनिकं नाम स्त्रीधनं समुदाहृतं पितृ
गृहात् पतिगृहं यान्त्याः कन्यायाः सम्बंधे सम्मानार्थं यत् केनचिद्दीयते तदध्यावाहनिकं एतदेव
रत्नाकरकृता उक्तं पृष्ठतो यद्दीयते इति अत्र पृष्ठत इति गच्छन्त्याः सम्बंधे यद्दीयते तत् पृष्ठत एव भ
वतीति तस्या अग्रेसरत्वात् दानस्य च पश्चात् सिद्धत्वात् इति लौकिकी भाषा अत्र पतिगृहगमनं
किं विवाहकाले उत द्विरागमनकाले उत वा अन्यदा इति तत्र रत्नाकरकृता किंचिन्नोक्तं मिश्रैस्तु द्वि
रागमनकाल इत्युक्तं जीमूतवाहनस्तु पितृगृहात् पतिगृहं नीयमानायै कन्यायै सुहृद्भिर्धनदानस्या
दर्शनात् अन्यथा वचनयोजनां करोति यथा पितृगृहं नीयमाना पैतृकात् पितृमातृकुलात् यल्ल
भते इति मातृभ्रात पितृत्वादिनैव कृतार्थत्वेऽध्यावाहनिकस्य पृथगुल्लेखो विफल इति विवेचनीयं
दत्तं प्रीतिदत्तं इति दत्तं श्वशुरादिभिर्दत्तं इति रत्नाकराशयः॥ मात्रादिदत्तं त्रितयं व्यक्तमेव इति मि
श्राः अत्र दत्तं च प्रीतितः स्त्रियै इत्यस्य कर्त्ता भर्तृकुलेनेति तथा चाधिवेदनिकादेरपि संग्रहः मातृ
इति मातृकुलोपलक्षणं भ्रातुः पुनरुपादानं गोवलीवर्दन्यायेन भ्रातुः प्राधान्यसूचनाय एवंच षड्
विधातिरिक्तस्त्रीधनाभावात् न्यूनसंख्याव्यवच्छेदाय इति लिखनं व्यर्थमिति रत्नाकरमते आक्षेपः
॥ मिश्रादिभिरपि न्यूनसंख्याव्यवच्छेदपरमित्युक्तं तुल्यन्यायात् तत्राप्याक्षेपः। ननु प्रीत्या दत्तमि
त्यत्र कात्यायनेन विशेषकथनात् न भर्तृदत्तस्य प्रीतिदत्तत्वं यथाह कात्यायनः॥ प्रीत्या दत्तं तु यत्
किंचित् श्वश्र्वा वा श्वशुरेण वा पादवन्दनिकं यत्तु लावण्यार्जितमुच्यते॥ लावण्यं शीलनैपुण्यादि
तथा च पादग्रहणात्तयैः शीलादिमत्त्वे वा स्त्रियै श्वशुरादिना यद्दत्तं तत्तीयं धनमित्यर्थ इति मिश्राः।
इति चेन्न श्वश्र्वा श्वशुरेण वा इत्यत्र वाकारद्वयस्यानास्थायां पर्य्यवसानात् भर्त्रादेरपि परिग्रहसंभ
वात् पादवन्दनिकं यत्तु लावण्यार्जितमुच्यते इत्यस्याभिन्नवाक्यत्वेपि क्षतिविरहात् तथाहि वचना
र्थः श्वश्र्वादिभिः यद्दत्तं तत् प्रीत्या दत्तं यच्च पादप्र[illegible]णामाल्लब्धं तल्लावण्यार्जितमिति एकमेव वा कं
प्रीत्या श्वश्र्वादिभिर्यद्दत्तं तत्पादवंदनिकं तदेव लावण्यार्जितमिति तन्न एव यत् पदद्वैयर्थ्यात्॥
न च प्रीत्या दत्तमेव तत्तीयं धनं आधिवेदनिकं च न प्रीतिदत्तं तस्याधिवेदननिमित्तं स्त्रियाः क्रोधादिना
ऽभिमुखीकृत्य गृहीतत्वात् इति वाच्यं विना प्रीतिं तत्रापि दानासंभवात् अधिवेदनानुमत्यैव पति
प्रीतिजननात् प्रीतित इत्यस्य प्रदर्शनपरत्वे क्षतिविरहाच्च आधिवेदनिकदानमाह॥ याज्ञवल्क्यः
अधिविन्नस्त्रियै देयमाधिवेदकं समं॥ न दत्तं स्त्रीधनं यासां दत्ते त्वर्द्धं प्रकीर्त्तितं॥ यस्या उपरि विवाहः
साधिविन्ना इति रत्नाकरः॥ तथा च अधि उपर्य्यर्थे विदनं च कन्यालाभः विद्लृ लाभे इति धात्वनुसारा
त् तथा च अधिवेदनं उपरि विवाह इत्यर्थः आधिवेदनिकं अधिवेदनार्थं स्वीकृतं। तावदेव दत्ते त्वर्द्ध
मिति पूर्वापरदत्तेन स्वाकृपूरणं कर्त्तव्यमित्यर्थः पूर्वं बहुतरे दत्ते दानप्रतिज्ञासिद्ध्यर्थं किंचिद्देयमित्या
दरणीयं विवाह्यमानायै यावद्दीयते तावद्देवाधिविन्नायै देयमिति श्रीकृष्णतर्कालंकारः द्वितीय
विवाहे भावान् व्ययो भवतिताह्नानेव समर्थत्वार्थं इति विज्ञानेश्वरः अत्र मतम ध्ये प्रथममते दोषः।

प्रविश्रुतार्थसंप्रदानंअन्यायास्तुतद्धनदानस्यअधिवेदननिमित्तकत्वाभावात्‌आधिवेद
निकत्वाभावः प्रथमस्त्रीदानस्यनिमित्तंहिनात्रद्वितीयविवाहः द्वितीयविवाहेदत्तेतत्र
व्ययाद्यभावेएतन्मतेदानाभावात्‌ तद्वयादिसत्वेलिनोपिद्वितीयविवाहोननिमित्तं अपितु
प्रथमभार्य्यात्वमेवएवंमतद्वयेऽनध्यवसायश्च नहिसमशब्दःनिसापेक्षोऽपितथादिकमे
वाकांक्षतेइतिनियमःसंभवतिएवंद्वितीयस्याअतिशयगुणशालित्वेप्रीत्यायद्दीयतेतत्‌अस्ये
अपियद्दीयतांतदाऽनुभववाधः इति वदन्नविविच्यव्यवहर्त्तव्यं नचपितृमातृसुहृद्भ्रात्‌
दत्तमध्येग्न्युपागतं॥आधिवेदनिकंशुल्कान्वाधेयमितिस्त्रीधनलक्षणमिति विष्णुसू
त्रेषड्विधिकस्यापिकथनात्‌ मनुवचने[illegible]न्यूनसंख्याव्यवच्छेदआवश्यकइतिवाच्यं सुहृ
दादेःपितृकुलएवान्तर्भावात्‌उपागतपदस्यउपएवागत आगमनाश्रयेणदत्तंअध्यावाहनि
कमित्यर्थात्‌आधिवेदनिकस्यचपूर्वोक्तरूपत्वात्‌।शुल्कान्वाधेययोस्तुफलतःपत्न्यादिभिर्दी
यमानत्वात्‌ यथाकात्यायनः।विवाहात्परतोयत्तुलब्धंभ्रातृकुलात्स्त्रिया॥अन्वाधेयन्तुत
त्प्रोक्तंयल्लब्धंस्वकुलात्तथा॥ऊर्द्ध्वंलब्धन्तुयत्किंचित्संस्कारात्परतःस्त्रिया॥भर्तुःपित्रोःसका
शाद्वाअन्वाधेयन्तुतद्भृगुः॥गृहोपस्करवाह्यानांदोह्याभरणकर्म्मिणां॥मूल्यंलब्धंतुयत्किंचि
त्‌शुल्कंतत्परिकीर्तितं॥तथाचविवाहात्परतोभर्तृमातृपितृकुलात्‌यल्लब्धं यच्चभर्तुःमा
तुःपितुर्वालब्धंतदन्वाधेयमित्यर्थः इतिजीमूतवाहनोसम्मतोऽर्थ॥विवाहात्पूर्वंतत्संग्रहा
यमातृपितृभ्रातृदत्तमिति नचतथापिविष्णुवचनेपितृमातृसुतभ्रातृइति मिश्रसम्मतपाठसुते
तिव्यर्थमितिवाच्यं सपत्नीसुतस्यापिसुतपदवाच्यत्वात्‌।अत्रलब्धंबंधुकुलात्तथेति जीमूतवा
हनसम्मतःपाठःबन्धुपदंमातुलाद्यभिप्रायंपित्रादीनांस्वपदेनैवनिर्दिष्टत्वात्‌ इतिव्याख्यातंच
तेनैवयल्लब्धंस्वकुलात्तयेतिरत्नाकरादिसम्मतपाठेपिस्वकुलंदेनस्वीतपतिकुलंपितृमातृकुलं
मेवग्राह्यंअतःसुतपदंसार्थकंइत्यपिकेचित्।गृहेत्यादिगृहोपस्करादिकरणोपाधिनास्त्रियागृ
हपतिनायल्लब्धंतत्शुल्कमित्यर्थः इतिमिश्राः गृहकर्म्मकरणेनतुष्टोगृहपतिर्यद्ददातितत्
शुल्कमित्यर्थः।यच्चविवाहकालेयत्किंचिद्धरायोद्दिश्य।दीयते कन्यायास्तद्धनंसर्वमविभाज्यंचव
न्धुभिरितिव्यासोक्तंउद्दिश्येतिकन्यायाइदंभवत्विन्युद्दिश्ययत्वरायदानंनपुनरेतदभिसन्धिं
विनापीत्यर्थः अतएवविवाहकालेइतिप्रदर्शनार्थं नपुनरेतदेवप्रयोजकं दात्रभिसंधिनिमित्त
त्वात्स्वत्वस्येतिजीमूतवाहनव्याख्यातं अत्रैवविषयेविवाहकालेइतिपदनिर्मुक्तं जीमूतवाह
नधृतप्रामाणिकंवचनंयद्दत्तंदुहितुःपत्येस्त्रियमेवतदन्वियात्॥मृतेजीवतिवापत्यौनतदपत्यमेते
स्त्रियाइतितन्त्रस्त्रीधनवत्स्त्रियास्वान्त्र्यंवोधयतिवरायदीयते इत्यनेनवरस्यैवसंप्रदानत्वकथ
नात्‌ द्वितीयवचनंजीवभीस्त्र्यायतिसहभावेनतद्धनंछंन्नेस्वानुमतंदानंचनिषेधति जीवत्पितृक
विभागेतद्धनंस्वयंगृह्णाति मताचेत्तदजीवत्पितृकविभागेतत्पुत्राएवतद्धनंप्राप्नुयुर्भ्रातृभागेपि 

तथेत्यर्थः बोधयति अथवा दत्तात्प्रदानिकप्रकरणोक्तयुक्त्या यदि स्त्रीस्वत्वमेव स्वीक्रियते तत्र
च स्वातन्त्र्यमपि जीमूतवाहनस्वरसात् तदा पितृदैस्य पितृदत्तत्वमव्याहतमेव शूलपाणिकुल्लू
कभट्टादिभिस्तु अध्यग्न्यध्यावाहनिकयोरपि पित्रादिदत्तत्वमंगीकृतं तत्रादिशब्देन उदासीनपरि
ग्रहस्य वारयितुमयोग्यत्वात् अध्यग्न्यध्यावाहनिकयोः पित्रादिदत्ततो भेद इति षट्त्वम विरुद्धं त
था च पितृतः प्राप्तं मातृतः प्राप्तं इति द्वे भ्रातृदत्तं बंधुदत्तं वा इत्येकं भर्तृकुलप्राप्तं अध्यग्निअध्या
वाहनिकं च इति षट् धनानि स्त्रीधनानि इति जीमूतवाहनस्तुः बंधुदत्तं मातुलादिदत्तमाह शूलपा
णिस्तु बंधुदत्तं मातृबंधुपितृबंधुभ्यां दत्तं इत्याह इति षड्विधमेव स्त्रीधनं दृश्यते किं न्यूनसंख्याव्य
वच्छेदेनेति नारदोपि षड्विधस्त्रीधनमाह अध्यग्न्याध्यावाहनिकं भर्तृदायस्तथैव च॥ भ्रात्रा दत्तं
पितृभ्यां च षड्विधं स्त्रीधनं स्मृतं। अत्र भर्तृदायशब्देन मनूक्तदत्तं च प्रीतितः स्त्रिया इत्यस्य संग्रहः
एवं च भर्त्रादिसम्बंधिवाचकपदानि तत्र तत् कुलपराणि भ्रातृपदं तु पूर्ववत् बंधुपरं गोबलीवर्दन्या
यात् भ्रातृपरमेव वा। एवं च प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः॥ भर्तुः स्वाम्यं भवेत्तत्र शेषन्तु।
स्त्रीधनं स्मृतमिति कात्यायनवचने शिल्पैरिति बहुवचनमाद्यर्थकं तथा च षड्विधस्त्रीधनातिरि
क्तधने सर्वत्रैव भर्तुः स्वातंत्र्यं इति फलितं न त्वेवं स्वसंक्रांतपित्रादिधनस्य का गतिरिति न च तत्रा
पि पतिपारतंत्र्यं षड्विधस्त्रीधनबहिर्भावादिति तिवाच्यं पित्रादितः संक्रांतिधने उत्तरकाले पित्रा
द्युत्तराधिकारिण एवाधिकारे पतिपारतंत्र्यस्यानुभवविरुद्धत्वादिति चेत् यावत्पत्न्यावशीभूतं ताव
देव पतिपारतंत्र्यं तदुत्तरं च पित्राद्युत्तराधिकारिणे वलब्धव्यं अथ ये पत्न्यार्जितधने पतिस्वामित्वं स्वी
कुर्वन्ति न तु पतिपरतंत्रत्वमात्रं तन्मते पत्न्यां मरणे कथं तत्पितुरुत्तराधिकारिणामधिकारः स्वामि
नो विद्यमानत्वेन स्वत्वानाशादिति चेत् जीमूतवाहनो ह्येवं दुहितृसंक्रान्तपितृधने दुहित्रनन्तरं॥
पित्रुत्तराधिकारिणामधिकारं वदति स च पत्नीधने पतिस्वत्वं न स्वीकरोति ये तु पत्नीधने पतिस्वत्वं स्वी
कुर्वन्ति तैरेवं दुहितृसंक्रान्तपित्र्यधनेपि उत्तराधिकारिणामधिकारो न स्वीकार्यः स्वत्वनाशयोर
भावात् यावत् अपुत्रधनाधिकारमूलीभूतायाः पत्न्यधिकारे तथा दर्शनादन्यत्र दुहित्रादावपि त
था कल्प्यते इति युक्तिः सा च दौहित्राभ्रात्रधिकारे दुरीकृतत्वे नान्यत्रापि गलहस्ता सा च युक्तिर्नशा
स्त्रमूला किन्तु स्वबुद्धिकल्पितैव च ऐश्वरादिभिरपि अलिखिता पत्नीधने उभयस्वत्ववादिमते तु म
कोऽपि दोषः पत्नीस्वत्वनाशेनैव पतिस्वत्वनाशकल्पनायाः शक्यत्वात् इत्यवधेयं अत्र अन्यत्व
इति पितृमातृभर्तृकुलव्यतिरिक्तात् यल्लब्धं शिल्पेन यदर्जितं तत्र भर्तुः स्वाम्यं स्वातंत्र्यं अनापद्य
पि ग्रहीतुं योग्यत्वं तेन स्त्रिया अपि धनं न स्त्रीधनं अस्वातंत्र्यात् इति जीमूतवाहनलिखितं तस्मा
त्त्वसंक्रान्तधने पतिपरतंत्रपत्नीस्वत्वं इति जीमूतवाहनस्मार्त्तादिमतं पतिस्वत्वमिति प्राचीनम
तं इति वर्णयन्ति केचित्तु प्राप्तं शिल्पैस्तु इत्यादिवचने दुहितृसंक्रान्तपितृधनस्यानुल्लेखात् ऊढया
कन्यया वापि पत्युः पितृगृहेऽथवा। भर्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतं इति कात्यायनवच

नेलब्धमित्येतावन्मात्रदर्शनात् दुहितृसंक्रान्तपितृधनं दुहितुः स्त्रीधनं एवं जीमूतवाह
नस्याप्ययमेवाशयः इत्याहुः तदस्माभिर्नाद्रियते अदत्ते स्त्रीस्वातंत्र्यस्य क्वचिदपि अदर्शना
त् शेषतु स्त्रीधनं स्मृतमित्यनेन भर्तृस्वातंत्र्यकातिरिक्तधनमात्रकस्यैव स्त्रीधनत्वकथने
न मन्वादिप्रणीत षड्विधधनातिरिक्तधन एव भर्तृस्वातन्त्र्यस्य युक्तत्वात् यदि च इदं त्रै
यं धनं तथाहि एकं स्त्रीस्वातंत्र्यविषयीभूतं यत् स्त्रीधनमुच्यते द्वितीयं तु शिल्पाद्यर्ज्जितं य
त्र पतिपारतंत्र्यं तृतीयं तु इदं संक्रान्तधनं अत्र द्वयोरेव स्वातंत्र्यं इत्येव जीमूतवाहनमतं इत्युच्य
ते तदा तु युक्त्यनुरोधात् स्वीक्रियत एव जीमूतवाहनमते किंत्वनुभवविरोध इति वदेवमुक्तप्र
बन्धेः स्त्रीधनानां। षड्विध एवांतर्भावात् न्यूनसंख्याव्यवच्छेदपरमिति यदुक्तं ग्रंथकारैस्त
द्विरुध्यते न हि न्यूनसंख्याव्यवच्छेदे षड्विधमित्यस्य सार्थकत्वं भवति षट्सु स्त्रीधनत्वस्य
स्वस्वशब्दे नैव बोधितत्वात् नवायः कात्यायनः षड्विधं स्त्रीधनमाह। तस्यैवाधिकोक्तिः संग
च्छते अत एव कन्यया ऊढया वापि पितृतो वा ततः कुलतो वा पतिकुलाद्वा यल्लब्धं तत् सर्वं तस्याः
सौदायिकमित्यर्थः॥ वक्ष्यमाणं गृह्यादिकमप्येतत् प्रपंच इति मिश्राः॥ अत्र केचित् एवं तृतीयाभर
णं शुल्कं लाभश्च स्त्रीधनं भवेदिति देवलोक्तस्य प्रागुक्तस्य विष्णुवचनोयान्तस्य च शुल्कस्य आ
धिक्यात् न्यूनसंख्याव्यवच्छेदकथनं तस्य यथा जीमूतवाहनमते॥ गृहादिधर्म्मिभिः शिल्पिभिस्तन्त्र
त् कर्म्मकरणार्थं भित्त्यादि प्रेरणार्थं स्त्रियै यदुत्कोचादानं तत् शुल्कं तदेव मूल्यं प्रवृत्त्यर्थत्वादि
ति रत्नाकराशयोऽप्येवं मिश्राणामप्यत्रैवाशयो नेयः। तथा च एतद्धनस्य पित्रादिकुलव्यतिरेकेण
दत्तत्वान्न षड्विधान्तर्भावः। न चेदं प्रीत्या दत्तमेव यदन्यतत्तुल्यस्यैव विषयइति वाच्यं एतदतिरिक्तस्य
ल एव तद्वाक्यप्रवृत्तेरित्याहुः। यदि शुल्कस्यास्पष्टवाक्यस्य यत् किंचिदर्थविकल्पने षड्विधान्त
र्भावः संभवति तदा किमर्थमप्रचाररूपस्याधिकस्य कथनेन मुनिवचनान्यथाव्याख्यानं तथा
हि गृहकर्म्मकरणेन परितुष्टो यद्ददाति तत् शुल्कं यथा यत् पादवंदनेन दत्तं तल्लावण्यार्ज्जित
मित्यादिकं श्वश्रुरादिस्तत्स्यैव विभाग इति विवेचनीयं अथ गृहोपस्कर वाह्यानां दोह्याभरणक
र्म्मिणां॥ मूल्यं लब्धं तु यत् किंचित्तत् शुल्कं परिकीर्त्तितं॥ इति गृहादिसम्बन्धेन द्व्यापारसम्ब
न्धे इति यावत् यल्लब्धं तन्मूल्यं वेतनप्रायमेव प्रकरणात् स्त्रियै दत्तं तत् शुल्कनामकं स्त्रीधन
मुच्यते इति वचनार्थः। अत्र गृहं प्रसिद्धं उपस्करः संमार्ज्जनीवाह्या बलीवर्दादयः॥ दोह्या गवादयः
। आभरणानि भूषणानि कर्म्मिणो दासाः एतेषां मार्ज्जनरक्षणावेक्षणशासनादिनैपुण्यात् ।
तुष्ट्या दानं अथावातन्त्रत् कर्म्मसमवधानाय यदुत्कोचत्वेन दत्तमिति फलितार्थः व्यासस्तु शुल्क
मन्यथैव लक्षयति यदानेतुं भर्तृकुले तत् शुल्कं परिकीर्त्तितं॥ भर्तृगृहगमनार्थमत् कोचादिभिर्य
द्दत्तं इति जीमूतवाहनः॥ अत्र ब्रूमः॥ गृहप्रक्षालनाद्यर्थं कर्म्मकरणप्रेरणनिमित्तं तत्पत्न्यादिभ्यः १५१
यदुत्कोचेन दीयते तस्यापि स्त्रीधनत्वमंगीकृत्य ग्रंथकारा मुनिवचनानामन्यथा व्याख्यानं चक्रुः ५०

यद्वाविशेषतोलक्षितानांअन्वाधेयादीनांकथंचिद्भेदमंगीकृत्येतिअत्रकल्पद्वयेविशेषोवि
वेचनीयः शिल्पेनस्त्रियायदर्जितं धर्म्मबुध्याप्रीत्यावाउदासीनेनस्त्रियैयद्दत्तंवानंतत्रस्त्री।
स्वातंत्र्यं स्वातंत्र्यंतुउतक्रोन्वायामिति अत्रयुक्तिर्नदृश्यतेइतिरत्ति इत्यर्थंदत्तंधनं यस्मात्सदा
नृशंस्यार्थंतैर्दत्तंततप्रजीवनइत्येकवाक्यत्वात् आभरणमलंकारःशुल्कंविवाहार्थितयाकन्यायै
दत्तं लाभःवंधुतोलब्धं एतत्सर्वंस्त्रीधनमितिमिश्रचण्डेश्वरौ॥अत्रपूर्वोक्तशुल्कमपिज्ञेयं।आ
पस्तम्बः॥अलंकारोभार्य्यायाज्ञातिधनंचेत्येकेँ।इतिव्यवस्थितविकल्पार्थंविवाहादिसमयेयौत
कत्वेनज्ञातिभिर्दत्तं ततस्त्रीधनंअन्यदा+ ज्ञातिभिर्मित्रैर्दत्तंधनंभार्य्यायाःस्त्रीधनमित्यर्थः॥इत्येके +
दत्तेपतिस्वाम्यं अतएवज्ञातिधनंचेत्यके विवाहेयद्धनंयौतकाख्यंलब्धंतदपिभार्य्यायाएवेत्यर्थः
इतिचण्डेश्वरः अलंकारेमनुविष्णू।पत्यौजीवतियःकश्चिदलंकारोधृतोभवेत्।नतंभजेरन्दायाया
भजमानाःपतन्तिते॥भर्त्तरिजीवतितत्संमत्यायोऽलंकारःस्त्रीभिर्धृतःसतस्मिन्मृतेविभागेतं पु
त्रादयोनविभजेरन् भजमानाःपापिनोभवन्तिइतिकुल्लूकभट्टः तावतोवस्त्रोऽलंकारःभार्य्यायाःस्त्री
भवतीतिमेधातिथिश्रीकाशकारश्चण्डेश्वरवाचस्पतिमिश्रस्मार्त्तादयः।अत्रपत्यनुमतिरावश्यकी
तिपत्यसाधारणधनत्वापेक्षावर्त्ततेइतिचाह॥मनुः॥ननिर्हारंस्त्रियःकुर्य्युःकुटुम्बाद्बहुमध्यगात्
।स्वकादपिचवित्ताद्धिस्वस्यभर्तुरनुज्ञया॥भ्रात्रादिवहुसाधारणात्कुटुम्बधनात्भार्य्यादिस्त्रीभि
रात्मालंकाराद्यर्थंधनसंचयोनकर्त्तव्यः नापिचभर्त्रनुज्ञांविनाभर्तृधनादपिकार्य्यः ततश्चनेदंस्त्री
धनमिति कुल्लूभट्टः अत्रननिर्हारंकुर्य्युरित्यनेनग्रहणनिषेधएवबोध्यते॥नतुग्रहणेफलानिष्प
त्तिः ननुकथमुक्तंनेदंस्त्रीधनंइति उच्यते स्वाम्यनुमतिंविनाग्रहणेस्वत्वासंभवादेवनस्त्रीधनत्वं
यदिचगृह्णतींपश्चान्नकोपिनिवारयतितदाऔपादानिकं भवत्येवस्वत्वं अप्रतिसिद्धमनुमतंभवती
तिन्यायात् अन्यथातवेदंभवत्वित्यनुमतेरेवदानत्वात् वचनारंभवैयर्थ्यात् यद्वाएतत्परिधेहीत्य
नुमत्यैवस्वत्वंभवतीतिवाक्यार्थः नचास्याअर्जनाभावात् कथंस्वत्वमिति वाच्यंशास्त्रवलेनपरि
धानस्यैवात्रार्ज्जनरूपत्वात् यत्रच्चपरिधानंअन्यान्यनिवारयति तत्रपरिधानानुमतिरेवविद्यतेअ
न्यथानकथंनिवार्य्यते यदिचक्रोधस्त्रोभप्रीतिभंगभयादितोननिवारयति तदास्तुअनुमतावपितादृ
शरूपायांनस्त्रीधनत्वसिद्धिरिति चण्डेश्वरस्तु कुटुम्बशब्देनात्रकुटुम्बधनंसाहचर्य्यादभिप्रेतं तेन
वहुमध्यगात्धनात्स्त्रीभिर्धनिनामनुमत्यानिर्हारोधनस्यनिष्कृष्यहरणंनकार्य्यं तथस्वकादपिकु
टुम्बांतरापेक्षयाभर्तुरसाधारणधनादपिनिष्कृष्यहरणंधनस्वामिनोऽनुनुमत्यानकार्य्यमित्याह।
अत्रवहुकुटुम्बधनादपिसर्वस्वाम्यनुमत्याग्रहणेस्त्रीधनत्वसिद्धिरि त्यायातं तच्चयथाश्रुतवचनान्ना
न्नलभ्यते इतिकुल्लूभट्टेननादृतं नचनतंभजेरन्दायादाइत्यनेनैवतत् प्राप्यते अन्यथापतिमात्रस्व
त्वास्पदस्यदायादांतरैर्भजिनेप्रसक्त्यभावात्निषेधवैयर्थ्यादितिवाच्यं दायादाइत्यनेनपुत्रस्यविवक्षण
संभवा त्तथाचपत्यमुपत्यापरिहितमलंकारंपुत्रामातुःस्त्रीधनंमन्येरन्नित्येवंविधीयतेइति॥वस्त्रंम

त्रसलंकारः कृतान्नमुदकं स्त्रियः॥ योगक्षेमप्रचारं च न विभाज्यं प्रचक्षते इति मनुविष्णुवच
नाभ्यां परस्परानुमत्या परिहितालंकारस्याविभाज्यत्वमुक्तं एतदेकवाक्यत्वेनात्रोक्तं च एवेश्व
रेण तथा च दायादानां भार्याभिः॥ परस्परानुमत्या येऽलंकारा धृतास्तेषां स्त्रीधनत्वमेव अथ
यद्येको भ्राताऽपरभार्यालंकारमनुमन्यते अनन्तरं तद्भार्यालंकारं पूर्वालंकृतापतिर परोक्षात
नानुमन्यते तत्र किं स्यादिति चेत् वस्त्रं पत्रमलंकार इत्यादि शास्त्रबलात् वस्त्रं पूर्वपरिहितालंकार
स्यासिद्धिरेव परन्तु तद्भार्यायै अपि यथोचितालंकारं राजा दापयेत्। अंततो विभागकाले तदुपयुक्त
धनं तस्या पयित्वा विभागं प्रवर्त्तयेत् विभागकाले निर्धनत्वे तु गत्यंतराभाव इति ध्येयं एतत् स्त्रीधन
स्वरूपं अत्र स्त्रीणां स्वामिनीनां स्वातंत्र्यं न तु भर्त्रादीनां तदाह कात्यायनः॥ ऊढया कन्यया वापि पत्युः
पितृगृहेऽथवा। भर्त्तुः सकाशात् पित्रा वा लब्धं सौदायिकं स्मृतं सौदायिकं धनं प्राप्य स्त्रीणां स्वातंत्र्य
मिष्यते। यस्मात्तदानृशंस्यार्थं तैर्दत्तं तत् प्रजीवनं॥ सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्तितं॥ वि
क्रये चैव दाने च यथेष्टं स्थावरेष्वपि" तथा न भर्त्ता नैव च सुतो न पिता भ्रातरो न च॥ आदाने वा विसर्गे
वा स्त्रीधने प्रभविष्णवः। यदि ह्येकतरोऽमीषां स्त्रीधनं भक्षयेद्बलात्॥ सवृद्धिं प्रतिदाप्यः स्यात्
दंडं चैव समाप्नुयात्। तदेव यद्यनुज्ञाप्य भक्षयेत् प्रीतिपूर्वकं। मूलमेव स दाप्यः स्यात् यदा स धनवान्
भवेत्॥ व्याधितं व्यसनस्थं च धनिकैर्वा प्रपीडितं॥ ततो निसृष्टं यत् प्रीत्या दद्याद्दात्मेच्छया हि तत्।
पत्युर्गृहे इति सम्बन्धः भर्त्तुः सकाशात् पित्रोर्वेत्युपलक्षणं तेन ऊढया कन्यया वा पतिगृहे पितृगृहे
वा स्वमातुः स्वपितुर्वा तद्भिन्नेभ्यो वा यल्लब्धं तत् सौदायिकमिति च एवेश्वरः वाचस्पतिमिश्रोप्येवं
॥ परन्तु तद्भिन्नेभ्य इत्यत्र तत्कुलतो वा पतिकुलतो वेत्याह इति विशेषः सुदायसम्बन्धिभ्यो लब्धं सौ
दायिकमिति जीमूतवाहनः॥ सुदायिभ्यः पितृमातृभर्तृतत्सम्बंधिभ्यो लब्धं सौदायिकं। आनृशंस्यं।
अनैष्ठुर्यमिति स्मार्त्तः स्वातन्त्र्यमिष्यते तथा च पत्याद्यनुमतिं विनैव भुंजीतेति भावः॥ यत्तु स्त्रीणा
मेव स्वातन्त्र्यमिति परिसंख्याविधिः॥ तथा च भर्त्रादीनां न स्वातंत्र्यं इत्यायातं तदेव स्वयं व्याख्या
स्यते न भर्त्तेत्यादि तन्न आदौ स्त्रीस्वातंत्र्यबोधकवचनोल्लेखं विना परिसंख्याबोधनस्य सन्दर्भवि
रुद्धत्वात् परिसंख्यायाश्च प्राप्तिपूर्वकत्वनियमादिति ध्येयं। इदानीं परस्यानुमतिं विना स्त्रिया स्त्रीध
नदान विक्रयाधिकारित्वमाह॥ विक्रये चैव दाने च यथेष्टं स्थावरेष्वपीति। अत्र दादेवं सौदायिके स्थावरसाध
रधने स्त्रीणां स्वातंत्र्यं भर्तृदत्तस्थावरादन्यस्मिन्निति स्थितमिति रत्नाकरः॥ अत्र भर्तृदत्तस्थावरा
दन्यस्मिन्निति यदुक्तं तदाह नारदः॥ भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन् मृते पि तत्॥ सा यथाकामम
श्नीयाद्दद्याद्वा स्थावराद्दते" केचित् भर्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतः॥ विद्यमाने तु संरक्षे
त् क्षपयेत्तत्कुलेऽन्यथा॥ अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता॥ भुंजीतामरणात् क्षान्ता दाया
दा ऊर्द्ध्वमाप्नुयुः॥ इति कात्यायनवचनद्वयं स्त्रीधनप्रकरणीयत्वात् स्त्रीधनविषयकमुक्त्वा भर्तृदत्तं १५२
धनं मण्यादिकमपि जीवति भर्त्तरि न कस्मैचिद्दद्यात् त्वा वा अन्यत्र न्यस्येत् वचनबलात् स्थावरं तु मृते ५८

पिभार्त्तरिनकस्मैचित् दद्यादितिव्यंजयन्नाह अपुत्रेति भर्तृशयनपालनाभावेआच्छिन्द्युरि
तरासुचेति स्त्रीधनस्यादेयतामभिप्रेत्याह भर्तुरितित्वात् तच्चाद स्यस्त्रीधनस्यैवव्यवस्थायां
सिद्धायां संक्रान्तपतिधनस्यापितथात्वं युक्तं यद्वानैतत् धनमात्रविषयकं अपितु स्त्रीस्वत्वा
स्पदीभूत धनमात्रविषयकं एवंचचलेश्वरादिभिरुत्तरवाक्येन एकवाक्यता भवति। जीमूतवा
हनेनतु उभयवाक्यैनैवइत्याह प्रकाशकारश्चचलेश्वरमतप्रकाशकः हलायुधपारिजातौतुएत
द्वचनद्वयं प्रकरणात् स्त्रीधनविषयकमाहतुः भर्तृदत्तमण्यादिकं जीवतिभर्त्तरि न देयमितिस्व
संक्रान्तभर्तृकमण्यादिकं उभयविधभर्तृस्थावरं च स्त्रियाकदापिनदेयं इतिजीमूतवाहनमतं।
भर्तृदत्तमण्यादिकं स्वसंक्रान्तभर्तृमण्यादिकं च यथेष्टदद्यात् उभयविधं भर्तृस्थावरं नदद्यात् किं
तु भुंजीतैवदम्पत्योर्मध्यगं धनमितिवचनात् त्वात्तसकलभर्तृधनजीवतिभर्त्तरि पालयेत् इतिच
चलेश्वरादीनां मतमितिसुधीभिरालोचनीयं पतिविना भावकालेपत्न्यायदर्जितंतदपिस्त्रीध
नमेव ननुचषड्विधवहिर्भावात् कथं स्त्रीधनत्वमितिचेत् निबन्धकारैः षड्विधगणनस्यान्या
दरणात्तुदारेपिसेश्वराया एवैषनियमइत्युक्तौक्षतिविरहात् ननुअविवाहितायायदर्जितं त
त्रकस्याधिकारः इतिचेत् आर्य्यापुत्रश्चदासश्चइत्यादिवचनेपुंस्त्वस्याविवक्षणात् उकारस्यानुक्तस
मुच्चयार्थत्वात् उपलक्षणत्वाद्दुहितुर्व्या अपिसंग्रहेणतदर्जितकानीनपुत्रइवतदर्जितधनेपिपि
तुरेवस्वत्वं इतिप्राचीनमतानुसारीनवीनः पंथाः सुधीभिः सुदृढमालोचनीयः जीमूतवाहनादिमते
तुसर्वमेवस्त्रियार्जितं स्त्रीस्वत्वास्पदं तत्रपतिमत्यार्जितं पतिपरतंत्रमिवानूढार्जितं पितृपरतंत्रं
तस्याअपिपितृस्वत्वाश्रयत्वात् अतस्तद्धनं पतिमत्यपिपित्राज्ञयैवभुंजीतदद्याच्च पतिमरणोत्तरं
चविधवायानकश्चित्स्वामीकन्तुभरणादिकंतत्रगुरुरेव श्वशुरादि रतस्तदानीमर्जितस्वातंत्र्य
मेवइतिविभावनीयं अत्रस्त्रीधनेभर्त्रादीनामप्रभुत्वमाह नभर्त्तानैवचसुतइत्यादि अत्रविशेषमा
ह देवलः॥ वृत्तिराभरणं शुल्कं लाभश्चस्त्रीधनंभवेत्॥ भोक्त्रीचस्वयमेवेदं पतिर्नार्हत्यनापदि॥ वृ
थामोक्षेचभोगेचस्त्रियैदद्यात् सवृद्धिकं पुत्रार्त्तिहरणेवापिस्त्रीधनंभोक्तुमर्हति॥ वृत्तिर्वृत्त्यर्थंदत्तं
धनं आभरणमलंकारः लाभः बन्धुभ्योलब्धं शुल्कं विवाहार्थितयाकन्यायैदत्तं धनमितिरत्नाकरः।
चिन्तामणौ अत्रकात्यायनोक्तयोरपिशुल्कयोरितरेषांचग्रहणं युक्तं। आभ्यां एतस्यापिशुल्कत्वम
स्तीतिज्ञापनायदुक्तं इतरेषांस्त्रीधनानामपिउपलक्षणतयाग्रहणंकर्त्तव्यं अत्रयदावश्यकावश्यक
कार्य्यादिनान्याधनमादायवृथादानभोगौकरोतितदासवृद्धिकंधनंदद्यात् पुत्रार्त्तिहरणार्थन्तुवृ
धनंविनापिस्त्रीसंमत्याग्रहीतव्यमितिरत्नाकरः॥ तथाचवृथादानाद्यर्थमेवपूर्वग्रहणेनव
द्धिरितिव्याइतिभावः स्त्रीणामननुमत्यैवस्त्रीधनस्यवृथादानभोगौनकार्य्यौ पुत्रप्रतीकारार्थं कार्य्या
वेवइतिचिन्तामणिः भोक्तुमर्हतित्यनेन निष्टद्धिकस्यापिअदेयत्वं लभ्यते इतिस्पष्टयति॥ याज्ञ
वल्क्यः॥ दुर्भिक्षेधर्म्मकार्य्येचव्याधौसंप्रतिरोधके॥ गृहीतंस्त्रीधनंभर्त्ता नाकामोदातुमर्हति॥ ध

र्म्मिकार्य्येऽवश्यकर्त्तव्ये व्याधावितियस्मिन्व्याधौकार्य्यसंप्रतिरोधोभवतितन्निहार्थंगृही
तंस्त्रीधनंस्त्रियैनदातव्यमित्यर्थइतिरत्नाकरः।प्रतिरोधकइतिव्याधिविशेषणंकार्य्यानु
ष्ठानरोधकइतितदर्थः तथाचावश्यककर्म्मानुष्ठानस्यप्रकारांतरेणकर्त्तुमशक्तितस्यनिर्वा
हायपत्यायतभार्य्यायाःस्त्रीधनंगृहीतंतत्तत्काकामेनदेयमित्यर्थइतिविवादचिन्तामणिः॥
अत्रकेचित् पुत्रार्त्तौअप्रतिरोधिकायामपियत्गृहीतंतदपिनाकामोदद्यात् देवलवचने।
प्रतिरोधकेइतिविशेषाभावात्पुत्रेतरस्यप्रतिरोधकव्याधिनिहत्यर्थंगृहीतस्यैवअदेयत्व
मितिप्राहुः संप्रतिरोधकेभोजनाद्युपरोधकारिणिउत्तमर्णादिकेइतिदीपकलिकामतद्द्वय
मेवोपादेयं॥ एतद्वाक्यस्यउपलक्षणतयाउत्तमर्णस्यापिग्रहणमितिचएवम्भूराशयस्तथा
चद्वयोरेकवाक्यत्वमेववस्तुत[illegible]स्तुयत्रयत्रकार्यप्रतिरोधोपस्थितिस्तत्रतत्रगत्यंतराभावेगृही
तंस्त्रीधनंनाकामोदद्यात् तत्रापिभर्त्रेति दर्शनात्भर्तुरेवेयंव्यवस्यानत्वन्यस्येतिविभावनीयं
जीमूतवाहनोपिभर्त्तास्त्रीधनंविनादुर्भिक्षादौवर्त्तनाक्षमस्तदापिगृहीतुमर्हतिनान्यदाइ
त्युक्तवान् यदिह्येकतरइत्यादिएकतरः।भर्त्तासुतादिर्वाएतेषांदण्डस्तुयथायोग्यंवाग्दण्डादि
रूपः।अन्येषांतुचौरदण्डमाहुः॥मनुः।वशापुत्रासुचैवंस्याद्रक्षणंनिष्कुलासुच। पतिव्रता
सुचस्त्रीषुविधवास्वातुरासुच।जीवन्तीनांतुतासांयेतद्धरेयुःस्वबान्धवाः।तान्शिष्यात्चौर
दण्डेनधार्म्मिकःपृथिवीपतिः।वशावन्ध्यातथाचवंध्यानष्टपुत्रापितमातृभर्तृकुलहीनासु
विवाहितासु प्रतिव्रतासु एवंबालरक्षणवत्रक्षणंकुर्य्यात् विधवाप्रोषितभर्तृकाविनापराधं
भर्त्रापरित्यक्ताचजीवन्तीनांतुतासांयेउद्धरेयुधनंगृह्णीयुःबलेनच्छलेनवातान्धार्म्मिकःराजा
चौरदण्डेनशिष्यात् इतिकुल्लूकभट्टसम्मताव्याख्या वान्धवाइत्युपलक्षणंअन्यान्यपिइतिद्रष्ट
व्यं तदेकइत्यादि यदासधनवान्भवेदितितथाचनिधनत्वकालेऋणशोधनेपिनक्षतिरि
तिभावःअतएवमहद्भिःस्त्रीधनेलाभइतिवचनंऋणदानदीपेउक्तं॥ एतच्चमूलमात्रशोधनं
पुत्रार्त्त्यादितिरिक्तस्थले अनुमतत्वथादानादौचज्ञेयं।अत्रैसवृद्धिकतद्धनशोधनकथनात्प
तिधनमात्रेपत्नीस्वत्वमिवपत्नीधनमात्रेपतिस्वत्वंस्त्रीधनेतुपत्नीस्वातंत्र्यमेवाधिकमिति
निरस्तं स्वस्वामिकधनस्यऋणत्वासंभवात् व्याधितमित्यादिव्यसनस्थंविपन्नं तथाच
यथास्त्रीविपत्तिंदृष्ट्वाधनंदद्यात्तथापतिरपित्वयमेवयाचनंविनैवदद्यादित्यर्थः अतएवत
त्आत्मेच्छयास्वामिप्रभृतिदद्यादितिरत्नाकरः॥व्याध्यादिग्रस्तंपत्यादिकमवेक्ष्यस्त्रियात्व
धनंयत्प्रयुक्तंतत्स्वेच्छयात्[illegible]द्यादित्यर्थः॥इतिचिन्तामणिः।तथाचायव्याधिर्नप्रतिरोधकः
धनिकोपिनतथाइतिनयाज्ञवल्क्यविरोधइतिकेचित् तन्नसंभवत्येकवाक्यत्वेवाक्यभेदोन
युज्यते इतिन्यायविरोधात् तथाहिआत्मेच्छयाइत्यनेनआत्मनःकामनयैवदद्यात्नतुकाम
नांविनाएतदेवोक्तं याज्ञवल्क्येननाकामोदातुमर्हतीतिरत्नाकरचिन्तामण्योरप्ययमेवाशयइति ६०

श्लोकः२७

ध्येयं अत्र कात्यायनः॥ अथचेत्सद्विभाग्यैः स्यान्न चतां भजते पुनः। प्रीत्यानिसृष्टमपितत् प्रतिदाप्यः

स तद्धनं। ग्रासाच्छादनवासानामाच्छेदो यत्र योषितः तत्र स्वमाददीत स्त्री विभागम् रिक्थिनस्तथा लिखित

स्येति धर्म्मोयं प्राप्नेभर्तृकुले वसेत् व्याधिता प्रेतकाले तु गच्छेद्बन्धुजनं ततः यदा व्याध्यादि तिनिस्ताशर्थं

प्रीत्या वापत्ये धनं दत्तं अनन्तरं तासामपि क्रतु काले यथेष्ट भार्य्यागामी तु अनन्ताव पियदि न भजेते तदा

एवं ग्रासाच्छादनमपि यदि तस्यै न ददाति तदा चव्याध्यादि ग्रस्तां पतिमालोक्य दत्तमपि स्व धनं तया क्ला

त् ग्रहीतव्यं विभागं विशेषेण भजते प्राप्यते यः स विभागः लब्धव्यः इत्यर्थः तथा च तत्राश्रमे तया लब्धव्यं

ग्रासाच्छादनादिकं अन्यद्वा किंचिन्नदपि। रिक्थिनो धनिनः भ्रात्रादेश्च सकाशादिति यावत् जादपि

आददित्यर्थः॥ इत्ययं धर्म्मो लिखितस्य लिखितमुनेः वक्तव्यः अथवा ते लिखितस्य शास्त्रस्यार्थं ध

र्म्मः। तद्धने प्राप्ते तु भर्तृकुले एकत्र वसेत् न तु एषान्विताऽन्यत्र गच्छेत् भर्तृकुलमात्रगतिकत्वात् यदि तु

व्याधिरुत्पद्येत तदा तत्रैव चिकित्सां कारयेत् यदि तु बलवान् व्याधिरुत्पन्नः तेन प्राणप्रयाणे संभा

वना भर्त्रा च न चिकित्सति तदा बन्धुकुलं पितृकुलं गच्छेदिति च ऐश्वरं वाचस्पतिमिश्रं चोपजीव्य व्या

ख्यातं यदि प्रीत्या दत्तधनोऽपि पतिर्न भजते तदा तस्मात् राजा बलाद् पितद्धनं दापयेदिति पूर्ववचनार्थः

यदि च भार्य्यायै ग्रासाच्छादनं न ददाति तदा स्वकीयं भजनीयं ग्रासाच्छादनगृहादिकं दापयेदिति पूर्ववच

नार्थ इति जीमूतवाहनग्रंथस्य श्रीकृष्णतर्कालंकारसम्मतोऽभिप्रायः शोभन एव परेतु ग्रासाच्छादने

त्यादिकं विधवापरं तथा च पतिहीनायै भ्रातृपत्न्यै देवरो यदि ग्रासाच्छादनं योग्यं न ददाति तदा सा वि

भागं देवरात् गृह्णीयादित्यर्थः एवं च ग्रासाच्छादनदानेन भागकरणं एतेन अपुत्रधनाधिकारे उक्तानां

विभाग। बोधकानां भरणमात्रबोधकानां च संगतिः सुलभैवेत्याहुः अथ भर्त्रा यावत् धनं स्त्रियै देयं त

दाह॥ व्यासः॥ द्विसहस्रः परो दायः स्त्रियै देयो धनस्य तु। यच्च भर्त्रा धनं दत्तं सा यथाकाममश्नियात्॥ अ

त्रोत्तरार्द्धे भर्त्रेति दर्शनात् पूर्वार्द्धेपि देय इत्यस्य केन देय इति कर्त्राकांक्षायां तस्यैवोपस्थितिरिति जीमूत

वाहनः। एते भ्रातरिम्नेतत्पत्न्यै द्विसहस्रं दत्वा भ्रातरः शेषं विभजेयुरिति पूर्वार्द्धाशयः। भर्त्रा प्रीतेन

सर्वस्वमपि दत्तं स्त्री स्वातंत्र्यविषय इति परार्द्धाशयं वदन्तो निरस्ताः तादृशार्थकल्पनायामश्रुतकल्पनाप

त्तेः दायशब्दस्य च योगार्थादरेण धनमात्रवचनत्वाच्च तथा च अन्येनाधिकमपि देयं इति भावः अत्र द्वि

सहस्रादधिकदाने स्त्रीधनत्वसिद्धिर्भवति न वा इत्यत्र न सिद्धिरिति च ऐश्वराभिप्रायः॥ यतो यावद्भर्त्रा

धनं दत्तं स्त्रीस्वातंत्र्यविषयता वदर्शयितीत्यनेन व्यासवचनमु[illegible] [था] पितं द्विसहस्रे पणानां परिमाणम

स्य द्विसहस्रः पर इति वचनादल्पधनेऽल्पदानमायातीति चाहस एव तथा द्विसहस्रशब्दो द्विगु लुप्त

तद्धितः पणानामिति प्रायः संख्याश्रुतौ संख्येयाश्रुतौ पणस्यैव ग्रहणमाद्यत्य इति जीमूतवाहनस्तु नाधि

धिकोदयः इत्यनेन दाननिषेधमेव यौक्तिकं शाब्दं च प्राह मात्र दानासिद्धिप्रसंगः अत्र मतद्वय एवानु

भवविरोधः तथाहि यस्य दशकोटयो धनानि तेन द्विसहस्रपणा देयाः यस्य च शतं धनानि तेनापि इति

अत्र केचित् शास्त्रादनुभवस्य दुर्बलत्वमिति समाधत्ते अपरे तु द्वौ दीयते यस्मिन् स द्विशब्दवाच्यः उप

चाराणत्तद्धितलोपाद्वा॥ एवंभूतंसहस्रंयस्यद्विदानकारणंसहस्रंयस्येतिवासमासात् द्विसहस्रश

ब्दार्थोदायविशेषणं तथाचदायेसहस्रंप्रतिदोदेयोऽद्वित्येवंपरंदानं यद्वाद्विसहस्रभागैकभागः।

तथासहस्रंद्वयंप्रतिएकइति एवंचयत्लोपात्तिसहस्रशब्दादपिपूरणार्थेऽकारप्रत्ययःस्वीकर

णीयएवद्रष्टाहुः चण्डेश्वरस्तुएतमनुभवविरोधमनुसन्धायमतांतरंलिखति स्मस्वेच्छादेयंस्वयंप्रा

प्तमितिवचनात् साधारणधनाभिप्रायमितिवदन्ति इतितथाचस्वयंप्राप्तेस्वेच्छादेयत्वप्रति

पादनेनद्विसहस्रपर्य्यन्तदाननियमासंभवात् साधारणधनस्यस्वयंदातुमशक्तस्यएवस्त्री

धनार्थद्विसहस्रपणपर्य्यन्तदानानुमतिर्विशेषशास्त्रस्येति एवंचयद्यपिअविभक्तेनसाधा

रणधनद्रव्यमदेयंचण्डेश्वरादीनांमतेतथापिस्त्रीपुत्रादिभ्यःप्रसादात्किंचिद्दानानुमतिरस्त्येव

तत्रैवऊर्द्ध्वसंख्याव्यवच्छेदइति अधिकंरत्नमसिद्धमेवेति तन्मतवर्तुलार्थःप्रत्येकोकारस्तुकुष्ठा

दिपत्नीनांग्रासादिच्छादनमात्रभागिनीनांपृथक्पाकेनवसन्तीनांपणसहस्रद्वयाधिकमदेय

मित्याहतत्रचभरणस्यानियतत्वेनसंख्यानियमासंगतेरिदंतासांस्त्रीधनंदेवरादिदत्तमिति

प्रतीयते॥ एकपाकेनवसन्तीनान्तुननियमः अन्यभार्य्यावत् अस्याअपिपूजनीयत्वादितिध्ये

यंअत्रमतत्रयविसंवादात्। अननुष्ठानापत्तौप्रकाशकारमतमेवादरणीयंप्राचीनत्वात् अ

न्यमतलिखनन्तुप्रकाशकारमतोपरितन्मतार्थस्फुरणेननवीनदोषासंजनवारणार्थंइतिविभा

वनीयं॥ यदिच्चदेयंस्त्रीधनंदातुंप्रतिश्रुत्यपितामृतः तत्राहकात्यायनः॥ भर्त्राप्रतिश्रुतंदेयमृ

णवत्स्त्रीधनंसुतैः। तिष्ठेत्भर्तृकुलेयातुनयापितृकुलेवसेत् तथाचस्वातंत्र्याद्पितृकुलवासिन्यै

प्रतिश्रुतस्त्रीधनादानेपिनक्षतिरितिद्रष्टव्यंपुनःसएव। अपकारक्रियायुक्तानिर्लज्जाचार्थना

शिनी॥ व्यभिचाररतास्त्रीचस्त्रीधनंनचसार्हति॥ एतादृश्याःस्त्रीधनमप्याच्छिद्यबांधवैर्ग्राह्या

मितिविवादचिन्तामणिः॥ अपकारक्रियाविषप्रयोगादिःनिर्लज्जावृथाग्रामान्तरगमनादि

शीला अर्थनाशिनीवृथाव्ययशीला तथायज्ञार्थंद्रव्यमुत्पन्नंतस्माद्यज्ञेनियोजयेत्॥ स्थानेषु

धर्म्मयोग्येषुनस्त्रीमूर्खविधर्म्मिषु॥ एतद्वचनंअपुत्रधनाधिकारेजीमूतवाहनाद्यैरुपन्यस्तं

चण्डेश्वरेणात्रापिलिखितं तस्मात् नियोजयेदित्यनेनदानंदायग्रहणंचविवक्षितंकर्त्तानुअ

स्यराजातदन्योपिपुरुषः अथवादानाभावदायग्रहणाभावयोरेकःशब्दःअपरश्चतुल्यन्यायाव

लम्बितइतिध्येयं। स्त्रीमूर्खविधर्म्मिषुननियोजयेदितियोजना तथाचस्त्रियैस्त्रीधनंस्वेच्छामा

त्रेणैवनदेयंदेयन्तुगुणदापेक्षयाकार्य्यापेक्षयाचेतिभावः। इतिस्त्रीधनं॥ एतादृशमातृधनंपु

त्रादुहितरश्चयुगपत्गृह्णीयुः॥ मनुवचनात्। तत्स्वयमेवव्यक्तिकरोति जनन्यांसंस्थितायान्तु

समंसर्व्वेसहोदराः। भजेरन्मातृकंरिक्थंभगिन्यश्चसनाभयः। एवंचपितर्यूर्द्ध्वंगतेपुत्राविभजेयु

र्धनंपितुः॥ मातुर्दुहितरोऽभावेदुहितृणांतदन्वयः॥ इतिनारदवचनं। यौतुकधनपरंवक्ष्यते॥ ऋ १५४

णशेषधनेमर्थायातंवोध्यंपितृधनग्रहणतुल्यत्वाद्दुहितुरपिऋक्थग्राहित्वाच्च अतएवयाज्ञ ६१

श्लोकः २५

वल्क्यः मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेन्वयः॥ इति अत्र विभजेरन्सुताः पित्रोरूर्द्ध्वमृक्थमृणं
समं इति पूर्वार्द्धात् सुता इति विभजेरन्निति ऊर्द्ध्वमिति चानुवर्त्तते। तथा मातुरूर्द्ध्वं मातुर्ऋक्थं सुता दुहित
रश्च विभजेरन्निति योजना प्राचां मते तु पित्रोरुरूर्द्ध्वमित्येवानुवर्त्तनीयं पितर्य्यपि जीवति पुत्रस्यास्वातं
त्र्येण तदनुमतिं विना तद्धनविभागस्याप्यन्याय्यत्वात् जीमूतवाहनादिमतेपि प्रायस्तथा कल्प्यते अ
त्र दुहिता अनूढैव पुत्रसमांशभागिनी नतूढा यथाह॥ बृहस्पतिः। स्त्रीधनं स्यादपत्यानां दुहिता च त
दंशिनी। अप्रत्ता चेत् समूढा तु न लभेन्मातृकं धनं॥ अपत्यपदं पुत्रपरमिति चण्डेश्वरजीमूतवाहनादयः
॥ शंखलिखितौ समं सर्वे सोदर्य्या द्रव्यमर्हन्ति कुमार्य्यश्च॥ देवलः। सामान्यं पुत्रकन्यानां मृतायां स्त्री
धनं स्त्रियां। अप्रजायां हरेद्भर्त्ता माता भ्राता पिता पि वेति तस्मात् स्त्रीधनं दुहितॄणामप्रत्तानां अप्रति
ष्ठितानां च इति गोतमवचनदर्शनात् मातुर्दुहितरः। इति नारदयाज्ञवल्क्यवाक्ययोर्यथाश्रुतार्थविक
लनाच्च स्त्रीधने आदौ कन्यानामधिकारः। तदभावे पुत्रस्येति निरस्तं मनुबृहस्पतिदेवलैः पुत्रकन्ययो
स्तुल्याधिकारस्य स्पष्टलिखनात् एवं च मतमात् स्त्रीधने पुत्रस्याधिकारः अप्रत्ता च दुहिता तुल्याधि
कारिणी। एकतराभावे अन्यतराधिकारः अदत्तायाअभावे वाग्दत्ता गोतमेन पृथग्निर्देशस्वरसात् इति
चण्डेश्वरः॥ बृहस्पतिवचने शेषचरणे लभते मानमात्रकमिति मिश्रश्च चण्डेश्वर कुल्लूकभट्टसम्मतः पा
ठः अत्र च बृहस्पत्येकवाक्यत्वात् मनुवचनेपि अनूढानामेव भगिनां भ्रातृभिस्तुल्यांशित्वं ऊढानां तु
धनानुसारेण किंचित् मानार्थं देयमिति च चण्डेश्वरमतव्याख्या मिश्रोप्येवं कुल्लूकभट्टस्तु पित्र्यधने
ऽनूढानामिव मातृधनेऽऊढानामपि चतुर्थांश इत्याह जीमूतवाहनस्तु न लभेन्मातृकं धनमिति पठ
ति पुत्रकन्यायोरेकतराभावे अन्यतराधिकारः द्वयोरभावे ऊढायाः पुत्रपत्याः संभावितपुत्रायाश्च दु
हितुस्तुल्योऽधिकार इति वदति च नन्वत्र ऊढायामातृस्त्रीधनाधिकारे किं प्रमाणं मन्वादिवचने
षु भगिनीदुहित्रादिपदानां अनूढामात्रपरत्वात् औरसमा धन्ने अप्रजायां हरेद्भर्त्ता माता भ्राता पिता
पि वेति देवलवचने प्रजापददर्शनात् उढायाश्च प्रजात्वात्तयोरधिकार इति अथैवं वंध्याविधवयो
रप्यधिकारोस्तु इति चेत् तयोरुपकाराभावात् नाधिकारः पुत्रवती संभावितपुत्रयोस्तु स्वपुत्रद्वारेणै
व उपकारसंभवादिति जीमूतवाहनः केचित्तु अनूढाया अभावे ऊढा दुहिता पुत्रसमांशिनी मनु
नारदयाज्ञवल्क्यवशिष्ठवचनेषु दुहितृगतविशेषानभिधानात् बृहस्पतिवचनन्तु अनूढासद्भा
वविषयकमेव गोतमवचनेपि यथा पित्र्यधनाधिकारे क्रमस्तथात्रापि परन्तु पुत्रदुहित्रोर्युगप
दधिकार इति विशेष इत्याहुः स्वनिबन्धकारैरनादृतमिति हेयं अत्र अनूढयोर्वाग्दत्तावाग्दत्त
योश्च युगपदेव तुल्यांशित्वमिति श्रीकृष्णतर्कालंकारादयः तत्र ननु स्त्रीधनं दुहितॄणामप्रत्तानाम
प्रतिष्ठितानां गोतमवचने पृथङ्निर्देशात् क्रमेणाधिकारोस्त्विति चेद्दत्रवयं वाग्दत्ताया अवाग्दत्ता
वाध्यत्व स्वीकारे द्वयोर्भ्रातृत्वात् तुल्याधिकारित्वानस्यात् नहि वाधकेन सह तुल्याधिकारित्वाध्येन सह
तुल्याधिकारी भवितुमर्हतिसवलदुर्वलयोः समानत्वस्य एकत्रासंभवादिति क्रमः॥ अत्र क्रमागत

धनेपितृवाध्यस्यपुत्रस्यपितृतुल्याधिकारिणा पितृव्येणतुल्याधिकारित्वमिव अत्रापिभव
ति यत्तुमृतपितृकस्यैवपौत्रस्यपार्वणपिंडदानेनउपकारतानतुजीवति पितरीति नतस्यदाय
प्राप्त्यभावेहेतुः पितृवाध्यत्वमिति तन्नुच्छं॥मृतपितृकप्रपौत्रस्यपितामहवाध्यत्वावश्यकत्वा
त् तस्माद्यथापितृव्यादेःभ्रातृतत्पुत्रपौत्राणांवाध्यत्वंवाधकत्वंचनस्वीक्रीयतेतथापुत्रस्यापि
सामान्यतोऽप्रतिष्ठितात्वेनवाध्यत्वंवाधकत्वंचनस्वीक्रियतेइत्यादिकन्तु स्मार्त्तादिभिरनादृत
मेव गौतमवचनन्तुविवाहसमयेलब्धधनपरंतथाच मनुर्महाभारतंचमातुस्त्वयौतुकंयत्स्या
त्कुमारीभागएवस तथाचावाग्दत्ताकुमारीमाहायौतुकंगृह्णीयात्तदभावेऽधिकार्य्याकांक्षा
यांगौतमोक्तात् प्रतिष्ठिता तदभावेतुमातुःपारिणाय्यंस्त्रियोविभजेरन्निति वशिष्ठवचनस्वर
सात् उपकारसंबंधाच्च दत्ताएवपुत्रवतीसंभावितपुत्राच तदभावेपुत्रस्तदभावन्याविधवेऽपि त
योरपितत्प्रजात्वात् इतिजीमूतवाहनमतं चण्डेश्वरमतमत्रैवनेयं यत्तुअत्रअप्रतिष्ठिताइत्यने
ननिर्धनभर्तृकादुर्भगाचइतिचण्डेश्वरेणमिश्रेणचविवृतंवतदूषितंजीमूतवाहनादिभिस्ता दृ
शार्थकल्पनेवीजाभावात् युक्ताभावाच्चेतिमन्तव्यं यच्चमातुःपारिणाय्यंस्त्रियोविभजेरन्निति
वशिष्ठवचनेपारिणाय्यंपरिच्छदादर्शकंकंतादीति मिश्रचण्डेश्वराभ्यांव्याख्यातंतत्तुवेदस्मृति
वाक्यानांयथाश्रुतार्थव्याख्यानेन्यायाविरोधेसंभवतितदीयशब्दानांलाक्षणिकत्वव्यवहिता
न्वयादृत्यादिकमनुचितंअन्यथाशब्दानांकामधेनुतयासर्वशब्दानांएवसर्वार्थप्रतिपादनक्षम
त्वेनअनध्यवसायःस्यात्इतिनियममाश्रित्यस्त्रियइत्यस्यावृत्तानानार्थकल्पनाभयादेवए
वमन्यत्रापितथाचपरिच्छदादावूढानूढाविशेषानादरेणदुहितृणांतुल्योधिकारःइतिकेचित्त
न्नयाज्ञवल्क्यवचनव्याख्यानायौतुकपारिणाय्ययोरेकव्यवस्थाकथनात् तस्मात्पारिणाय्यशब्द
स्यपरिच्छदादौप्राचांप्रयोगमाकलय्यएवतथाव्याख्यानमितिमंतव्यं तत्रचपुत्रात् प्राक्दुहि
त्रधिकारेवीजंअप्रजास्त्रीधनंभर्तुःब्राह्मादिषुचतुर्ष्वपि॥दुहितृणांप्रसूताचेत्शेषेषुपितृगामि
तदितियाज्ञवल्क्यवचनेप्रसूताचेत् दुहितृणामितिकथनं नचैतत् दुहितृपदंकन्यापरमितिवा
च्यंकन्याभावेऽधिकार्य्याकांक्षायांअनध्यवसायापपत्तेः अथान्यस्त्रीधनंइवात्रापिपुत्राभावेदुहि
ताप्राप्नोतिनचान्यत्रयथातथास्तुअत्रतुमातुर्दुहितरोऽभावेदुहितृणांतदन्वयइतिनारदवचनेतत्
पदेनमातुर्वोधनात् मातुरन्वयपुत्रोदुहित्रभावेऽधिकारीतिवाच्यंतत्रापिदुहितृपदेनमन्वेकवा
क्यत्वात्।कन्यावोधनेक्षतिविरहात् तत्पदेनशीघ्रोपस्थित्यादुहितुरेववोधनाच्चमातृजन्यस्त्री
रूपदुहितृपदार्थस्यजन्यरूपेऽन्वयपदार्थेसम्बन्धस्यदुहितृपुत्रइत्यादौदर्शनात् एकत्रजन्यत्वं
जनकत्वंचवाधितमितिनिरस्तं अन्वयपदस्यमातृपुत्रतात्पर्य्यावलम्बनेतत्पदवैयर्थ्यं वि
नापितत्पदंमातुर्दुहितरइत्यत्रइवमातृपदार्थस्यप्राप्तेः नचमातुर्दुहितरःशेषमृणात्राजन्यते १५५
ऽन्वयःइतियाज्ञवल्क्यवचनेनैवपुत्रात् प्राक्दुहित्रधिकारोवोध्यते तत्रतत्पदाभावेनमात्रन्व ६२

श्लोकः २०

यस्यैवयुक्तत्वात् इतिवाच्यं तद्वचनस्य यौतुकमात्रपरत्वे प्रमाणाभावेन सामान्यस्त्रीधनविष
यकतयैव पूर्वं व्याख्यानात् अन्वयपदस्य नित्यसापेक्षस्य जनकांक्षायां सन्निहितत्वेन दुहितुरन्वय
स्यैवयुक्तत्वाच्च नचताभ्य ऋतेन्वय इतिवाक्यात् जन्यस्त्रियोभावे जन्यः पुमानितियोग्यताकांक्षा
यांपूर्वजनकत्वान्वितायामातुरेवोपस्थितिर्लाघवादितिवाच्यं दुहितॄणांप्रसूताचेत् इतिवचनान्त
रेणपौनरुक्त्यभयादस्य यौतुकान्यस्त्रीधनविषयकत्वेकल्प्यमाने दुहित्रभावे पुत्राधिकारस्यक्रु
मयोग्यत्वेन तथालाघवास्वीकारात् तस्मात् ताभ्योजातो न्वय इत्येवात्रान्वयबोधोबोद्धव्यः। एवं ए
तद्वचनमपिनयौतुकपरं तथाचयौतुकेपुत्रात् प्राक् ऊढाधिकारे प्रमाणाभावो दृढीकृतः उच्यते दु
हितॄणांप्रसूताचेदिति याज्ञवल्क्यवचने दुहितृत्वेनोपादानात् युगपत् सर्वासामेवाधिकारे प्राप्ते
मनुगौतमाभ्यांक्रमोदर्शितः नतुयाज्ञवल्क्योक्तदुहितृपदंकन्यालाक्षणिकमतः आदौक्रमेणसर्वा
सांदुहितॄणामधिकारः तदभावे पुत्रस्येति सिद्धं नन्वेवंजन न्यांसंस्थितायांत्वित्यादिमनुवचना
त् प्रागुक्तयाज्ञवल्क्यवचनाच्च सामान्यतः दुहितॄणांपुत्रसमांशित्वे प्राप्ते बृहस्पतिवचनात्क्रमएव
बोध्यतां तथाचयौतुकान्यस्त्रीधनेपुत्रोढयोस्तुल्याधिकारोस्तु नचबाधकतुल्यांशिनाबाध्यतुल्यांशि
त्वमनुभवविरुद्धमितिवाच्यं क्रमागतधनस्थलेतत्स्वीकारस्य प्रागुक्तत्वात् यौक्तिकाधिकारस्थले
हिबाधकसमानत्वसाधनीयुक्तिर्बाध्यस्यसमानत्वंसाधयितुंन शक्नोति वाचनिकस्थलेतुनतथा त
थात्वत्रपुत्रदुहित्रोरधिकारतुल्यत्वेयुक्त्यनवलोकनात् वाचनिकएवतुल्योऽधिकारोवाच्यः एवंचबा
ध्यबाधकतुल्यत्वंवचनबोधितंचेत् तदासंभवत्येव इतिचेन्न समूढातुलभतेमानमात्रकमितिवच
नखण्डेपुत्रकन्ययोर्द्वयोरेवसत्वोः ऊढायाअनधिकारबोधनात्। विनिगमनाविरहेणद्वयोरेवाभावे
ऊढाधिकारस्यपूर्वं विवेचितत्वात्। कात्यायनः। दुहितॄणामभावेतुऋक्थंपुत्रेषुतद्भवेत् बन्धुदत्तन्तु
बन्धूनामभावेभर्तृगामितत्। भगिन्योबान्धवैःसार्द्धं विभेरन्सभर्तृकाः। स्त्रीधनस्येतिधर्म्योयंविभागे
तुप्रकल्पितः। तथाचनानामुनिवचनेदुहितृपदलक्षणायांप्रमाणाभावात् बहुवचनेनक्रमव्यंजना
च्चसर्वदुहित्रभावेपुत्राधिकारइतिसिद्धं इतिध्येयं स्मार्त्तादिमतेतुसुगमएवायंबाध्यबाधकयोस्तुल्यां
शित्वास्वीकारादितिविवाहेष्विति अनुवृत्तौ विष्णुः सर्वेषुप्रसूतानांतद्धनंदुहितृगामि सर्वेषुविवाहेषु
प्रसूतानांजातजीवदपत्यानां। मनुः। स्त्रियास्तुयद्भवेद्वित्तंपित्रादत्तंकथंचन ब्राह्मणीतद्धरेत्कन्यात
दपत्यस्यवाभवेत्। अत्रजीमूतवाहनः पित्रादत्तमितिविशेषश्रवणात् विवाहसमयादन्यदापिपितृ
दत्तंकन्याया एवइत्यर्थः। ब्राह्मणीपदंचानुवादइत्याह। तथाचब्राह्मणीपदस्यविध्यघटकत्वात् सर्व
वर्णानामेवपितृदत्तधनंकन्यायानतुतत् सत्वेपुत्रस्येत्यर्थ इतिभावः अत्रकल्पेऽनुवादेऽसम्मतः कल्पां
न्तरमाह। यद्वा। ब्राह्मणीपदस्यानुवादभयात् क्षत्रियादीस्त्रीणांअनपत्यानांपितृदेत्तंधनंसप
त्नीदुहिताब्राह्मणीकन्याहरेत् नपुनरप्रजास्त्रीधनंभर्तुरितिवचनावकाशः सकलवचनस्यसामंज
स्यादितिअत्रैवकल्पेचण्डेश्वरकुल्लूभट्टयोःस्वरसः मन्वेतद्वचनंनसपत्नीकन्याधिकारविधायकं।

पत्रांक: २७

परंतुऔरस्याःकन्यायाःब्राह्मण्याएवाधिकारनियामकमितिवाच्यंपित्रादत्तमित्यस्यवैयर्थ्यात्।
कन्यागतवैलक्षण्येनसामान्यप्रवृत्तवचनानांविशेषपरत्वेबहुतरलक्षणापत्तेश्च यत्तुअयौत
कधनेपित्रादिदत्तधनेब्राह्मण्याःकन्यायाअधिकारबोधनार्थमितितदपिनग्रंथकारसम्मतं
अयौतुकयौतुकयोर्विध्यनुवादवैषम्यापत्तेः अत्रेदमवधेयंक्षत्रियादिभार्य्याणांअप्रजानांय
दाकदाचित् पितृदत्तधनेननानाजातीयसपत्नीकन्यासत्वेपिब्राह्मण्याएवसपत्नीकन्यायाअधिका
रंएवंचपितृदत्तधनेसपत्नीपुत्रमप्यपेक्ष्यसपत्नीकन्यायावलवत्वदर्शनात् स्वपुत्रमपेक्ष्यापिस्व
कन्यायावलवत्वेनसत्यपिपुत्रेकन्यायाअधिकारःअतएवपारिणाय्यंयौतुकंपितृदत्तंचधनंदुहि
त्रभावेपुत्रगामीतिरत्नाकरःपित्रतिरिक्तेनयद्दत्तंतद्भ्रातृभगिन्योरितिमिश्रव्याख्यानेपिपित्रतिरिक्ते
नइतिविशेषणं एतच्चजीमूतवाहनस्मार्त्तादिभिर्लिखितंप्रमाणंचात्रदुहितृणामभावेतुऋक्थंपु
त्रेषुतद्भवेदितितत्पदघटितकात्यायनवचनं विनास्फुटंनदृश्यते मिताक्षराकारस्तुब्राह्मणीपदंउत्त
मवर्णपरंतथाचवैश्यायाअनपत्यायाधनंपितृदत्तंब्राह्मण्याअभावेक्षत्रियासपत्नीकन्यागृह्णीय
दित्याहतत् श्रीकृष्णतर्कालंकारेणनादृतंप्रमाणमनालोक्यजीमूतवाहनालिखितत्वाच्चतदपत्य
स्यसपत्नीदौहित्रस्येत्यर्थःपित्रादत्तमितिस्त्रीधनमात्रोपलक्षणमिति असहायमेधातिथिप्रकाशका
रास्तत्रचएडेश्वरादीनांस्वरसोनावलोक्यते अत्रपुत्रपुत्र्यभावेकःस्त्रीधनाधिकारीतिअत्रजीमूतवाह
नःयौतुकान्यस्त्रीधनेपौत्रोऽधिकारीपार्वणपिण्डदानेनउपकारकत्वात् ननुदुहितुःपूर्वमेवकिंपौ
त्रोनाधिकारीति नचपुत्राभावेतुदुहितातुल्यसन्तानदर्शनात् इतिनारदवचनेनपुत्रानंतरंदुहित्र
धिकारबोधनात् अंतएपौत्राधिकारकल्पनेप्रमाणाभावान्नपौत्राधिकारइतिवाच्यं जीमूतवाह
ने नापुत्रधनाधिकारेतद्वचनस्यउपन्यस्तत्वेनपुत्रपदस्यप्रपौत्रपर्य्यन्तपरत्वस्यावश्यकत्वात् इति
चेत् दुहितुःस्त्रीधनाधिकारित्वंहिवाचनिकंनयौक्तिकं तथासतिपुत्रसत्त्वेतदधिकारोनस्यात् अतः
सामान्यतोदुहितृत्वेनप्राप्तस्याधिकारस्यबाधोऽनुचितःविशेषवचनसत्त्वेतुतद्बलादेवबाधइत्या
लोकनीयं अपरेतुअंगजत्वादेवआदौदुहित्रधिकारःअन्यथादौहित्रपश्चादपिदुहित्रधिकारःप्रस
ज्जेदित्याहुः नचात्रदौहित्रस्यपौत्रेणतुल्याधिकारःप्रागधिकारोवाबाधकस्यपुत्रस्यपुत्रेणवाध्यायाऊ
ढायादुहितुःपुत्रस्यवाधात् श्रीकृष्णतर्कालंकारश्च यौतुकधनेआदौदौहित्रस्याधिकारंएतांयुक्ति
मवलम्ब्योक्तवान् तथाचयौतुकेपुत्राभावेदौहित्रस्तदभावेपौत्रअयौतुकेतुऊढादुहित्रभावेपौत्र
स्तदभावेदौहित्रइतिनिर्णयः केचित्तुवचनबलादुपकाराभावेपिदुहित्रधिकारोस्तु दौहित्रस्यतुकथम
धिकारः अथसपिंडीकरणादूर्द्ध्वंयत्पितृभ्यःप्रदीयते।सर्व्वेषंशहराःमाताइतिधर्म्मेषुनिश्चयः॥
इतिस्मार्त्तेपिदर्शितस्मृतिवचनेपितृपदस्यपित्रादिमातामहादित्रिकत्रिकपरत्वेनमातृपदस्यमात्रा
दिमातामह्यादित्रिकत्रिकपरत्वेनचमातामहायचदत्तेपिण्डांशभोक्तृत्वेनमातामह्याअप्युपकार १५६
इतिचेत् अस्तिपितृपदस्यपित्रादित्रिकपरत्वेमातृपदस्यमातृपितामहीप्रपितामहीपरत्वकल्पनवी ६३

जं॥ स्वेन भर्त्रा सह श्राद्धं माता भुंक्ते स्वधामयं। पितामही च स्वेनैव स्वेनैव प्रपितामहीति वचनैक
वाक्यत्वं॥ अन्वष्टकासु वृद्धौ च गयायां च क्षयाहनि। मातुः श्राद्धं पृथक् कुर्यात् अन्यत्र पतिना स
ह॥ इति वचनैकवाक्यत्वं च तत्र हि यजुर्वेदिभिरन्वष्टकादौ यासां श्राद्धं पृथक् क्रियते अन्यत्र ता
सां श्राद्धस्य पतिसहभावेन बोधनात्। यत्तु मातृपदस्य मातामही लाक्षणिकत्वे प्रमाणमुपल
भ्यते तदा दौहित्रेण मातामह्या उपकारः सिद्ध्यति किंतु अपुत्रधनाधिकारे सोदरभगिनीपुत्रवै
मात्रेयभगिनीपुत्रयोस्तुल्योऽधिकार इत्याचार्यचूडामणिरिति श्रीकृष्णतर्कालंकारः। विरुद्ध
माचचक्षे नहि दौहित्रेण मातामह्युपकारसंभवे एतयोस्तुल्यता संभवतीति केचिदाहुः तन्न च्य
यदा सा मौरसा न स्यात् सुतो दौहित्र एव वा॥ तत्सुतो वा धनं तासां स्वस्त्रीयाद्याः समाप्नुयुः। इति व
क्ष्यमाणबृहस्पतिवचने दौहित्राधिकारस्य प्राप्तत्वात्। दौहित्रस्य प्रजात्वेन अप्रजास्त्रीधनं भ
र्तुरिति मनुवचनेन प्राप्त भर्त्रधिकारात् प्राक् पौत्रात् परमेव तदधिकारस्य सिद्धत्वात्। मातुर्दुहि
तरोऽभावे दुहितॄणां तदन्वय इति नारदवचनात्। मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वय इतिया
ज्ञवल्क्यवचनाच्च अथास्तु दौहित्राधिकारः किंतु प्रपौत्रात् परमेव एवं च पौत्रकेऽपि पौत्रप्रपौ
त्राभ्यां परमेवाधिकार इति चेन्न वचनसिद्धे दौहित्राधिकारे क्रमस्य युक्तिसिद्धत्वात्। युक्तिश्चाच
सान्निध्यं वा ध्यबाधकयोरव्यवहितसंतानयोर्बाध्यबाधकश्च अथ मास्तु पौत्रोऽधिकारी वच
नानुपात्तत्वात्। प्रपौत्रस्तु सुतरामिति चेत् बाध्यो दौहित्राधिकारः पौत्राधिकाराभावे दृश्यति पौत्रके
तरस्मिन्। पौत्रके तु प्रजात्वादेव भर्तुः पूर्वं पौत्रप्रपौत्रयोरधिकारः अथ प्रजात्वादेव चेत् प्रपौत्रा
धिकारस्तदा तत्पुत्रादेरपि अधिकारोऽस्तु इति चेत् प्रजात्वोपकारोभयमेव स्त्रीधनग्राहित्वे तंत्रं
इति जानीहि दौहित्रो पिह्यमुत्रैनं संतारयति पौत्रवदिति मनुवचने एनमित्यत्र पुंस्त्वस्याविवक्ष
णात्। येन दौहित्रजाल्लोकादृशो च्योऽयं यतिर्मम इति महाभारतैकवाक्यत्वाय पुत्रिकापुत्रस्याविव
क्षणाच्च दौहित्रे पौत्रधर्मातिदेशेन पौत्रात्परं दौहित्राधिकारः पौत्रके तु तन्मातुः प्राधान्याद्दाद्
वधिकार इति पिवदन्ति अत्र दौहित्री दौहित्रसहभावेन तत्पश्चात्। तत्पूर्वं वा नाधिकारिणीति
वचनाभावात्। यच्च यास्तासां स्युर्दुहितरस्तासां स्युदुहितरस्तासामपि यथांशतः। मातामह्या धनात्।
किंचित् प्रदेयं प्रीतिपूर्वकं॥ इति मनुवचनं तत्पुत्रदुहितृभ्यामपि मानरक्षार्थं किंचिद्दानं बोधयति
नतु दौहित्र्या अंशग्राहित्वं वचने किंचिदिति कथनात्। प्रदेयमित्यनेन भ्रातृभगिन्योरेव दानकर्तृत्वबो
धनात्। ताभ्यां तस्यास्तुल्याधिकारित्व [redacted] स्यायुक्तत्वाच्च यथांशत इति धन
बहुत्वाल्पत्वानुसारेण इति रत्नाकरः॥ अत्र पितामहचरणास्तु मातृतन्मातृकदौहित्र्यै एव किंचिद्धनं दे
यं एतच्च ऊढया दुहित्रा पुत्रेन वा नूढया पौत्रके तु पुत्रेणापि तच्च दानं तन्मात्रंशानुसारेण इति पिता
महधनेऽम्नत पितृकपौत्रवदिति वदन्ति तत्र तासामित्यनेन विभागकर्तॄणामेव परामर्श उचित इति
एतत् पूर्वोक्ते जनन्यां संस्थितायां तु इति वचने ऊढदुहितृरूपस्थितिर्न पूर्ववदिति सिद्धं भगिनीत्वे

नकन्याकथनादिति पुंधनवत्स्त्रीधनेऽपि पुरुषिकाधिकारो नास्तीति स्वविवेचनीयं वाचस्पतिमि
श्रो पितृदुहित्रभावे दौहित्रदौहित्र्यौ मनुवचनात् धावत् इत्युक्तवान् तदिदं विविच्य करणीयं यौतुक
धने दुहित्रभावे सत्यपि पुत्रे दौहित्रस्याधिकारः प्रागुक्तनारदयाज्ञवल्क्यवचनादिति मिश्रचरणेऽस्व
रमतमित्याहुस्तत्तु चिन्तनीयं याज्ञवल्क्यवचनस्य यौतुकान्यधनपरत्वेन पर्यवसानात् यौतुकपरत्वे
याज्ञवल्क्यवचनान्तरस्य पौनरुक्त्यापत्तेः नारदवचनस्यापि पर्यवसानसंभवात् पितर्युर्द्धं गते
पुत्राद्युत्पतः पुत्राद्युत्पत्त्या स्यानेतुं शक्यत्वात् अनुरक्तयोः पूर्वं धनत्वेन सामान्यतो धनोपस्थायक
योरेकस्य धनपदयोर्यौतुकपरत्वकल्पनामपेक्ष्य सुताः पुत्राद्यास्तेतयोरपि अनुषक्तेरुचितत्वात्
स्वपुत्रापेक्षया दुहितृपुत्रस्य विप्रकृष्टत्वाच्च जीमूतवाहनस्मार्त्तादिभिरपि यौतुके दौहित्रात् प्रा
क् पुत्राधिकारः एवोक्तः अत्र पौत्रदौहित्राभावे प्रपौत्र इति स्मार्त्तीः प्रपौत्राधिकारन्तु जीमूतवाह
नसम्मतं तत्पाठं च स्मार्त्तीयं ये लिपिकरदोषाहितं वदन्ति तन्न सुन्दरं यो जीमूतवाहनो दौहि
त्रदत्तपार्व्वणपिंडसम्बन्धाद्दुहितुरधिकारं ब्रूते तस्य स्वयं पिंडदातुः प्रपौत्रस्यानधिकाराङ्गीकारानौ
चित्यात् अत एव तद्ग्रंथटीकाकार श्रीकृष्णतर्कालंकारः दौहित्रपर्य्यन्तानां अभावे इति प्रपौत्रपर्य्य
न्तोपलक्षणमित्याहः तस्मात् पौत्रदौहित्राभावे प्रपौत्राधिकारः सिद्धः तदभावे वन्ध्याविधवयोर
पि दुहित्रोरधिकारः तयोरपि तत् प्रजात्वादिति स्मार्त्तजीमूतवाहनौ अपरे तु दुहितृत्वेनैव तयोरधि
कारः पूर्वमुपकारकैर्व्वाधित इतीदानीमेव प्राप्तावकाशः अथ इदमसंगतं दौहित्रस्यानुपकारकत्वा
त् यदि च पश्चादुपकारकत्वेनैव परम्परया उपकारकत्वं इत्युच्यते तदा पौत्रात् पूर्वं ऊढाया अधि
कारो न स्यात् इति चेत् ऊढाया दुहितुः स्वपुत्रद्वारेणैव भर्तुरुपकारसंभवात् यत्किंचिदुपकारत्वात् दु
हितृत्वेन अंगजत्वेन च अधिकोपकारकै र्न्न बाधः स्त्रीधनप्रकरणे उपकारस्य प्राधान्याभावात् उ
पकारलेशाभाववत्योस्तु वंध्याविधवयोः दुहितृत्वेन प्रजात्वेन च प्रपौत्रात्परं भर्त्तुः पूर्वमिवाधिका
रः युज्यते नन्वेवं एतयोः पूर्वं पुत्रपौत्रदौहित्रयोरप्यधिकारोऽस्त्विति चेत् अपुत्रधनवत् अत्रापि
सर्केन वारयितुं शक्यत इति अपरे तु स्त्रीधनाधिकारे पार्व्वणपिंडसम्बन्धस्य प्राधान्ये प्रमाणाभावा
त् एकोद्दिष्टपिंडदात्र्योर्वन्ध्याविधवयोर्दौहित्रात् पूर्वमधिकार इति वदन्ति अथ पुंधनवत् स्त्री
धनेऽपि कथं पुत्रपौत्रप्रपौत्राणां न युगपदधिकारः न च अविभक्तेषु मृते पुत्र इत्यादि पुंधनाधिका
रप्रकरणीय कात्यायनवचनबलादेव युगपदधिकारः अत्र तु तादृशवचनाभावान्न तथेति वाच्यं
चण्डेश्वरादिमते तथोक्तिसंभवेऽपि पुत्राभावे तु दुहिता तुल्यसन्तानदर्शनाद्धृत्यादीनि पुंधनाधि
कारप्रकरणीयानि वचनानि स्त्रीधनाधिकारेऽपन्यस्यतां जीमूतवाहनादीनां मते तथा वक्तुमश
क्यत्वात् न चेष्टापत्तिः पितामहधनवत् पितामहीधनमपि मृतपितृकपौत्रोऽधिकारी तु एवं च
दुहित्रभावे पौत्र इति जीमूतवाहनाभिप्रेतवाक्यन्तु जीवत्पितृकपौत्रव्यावृत्त्यर्थ इति वाच्यं दुहित्र
भावे पौत्रस्य इत्यस्य कः पौत्रविषयः यदि जीवत्पितृकः तदा तदानीं तत्पितुरेवाधिकारित्वनऊ ६४

दायादुहितुरधिकाराभावात्दुहित्रभावव्यंजकशब्दोपादानवयर्थ्यं यद्विवामत्पितृकस्तदाकुमा
रीतुल्यभागीसकथंदुहित्रभावपर्यन्तंप्रतीक्षेतइतिद्वयोरेवासमंजस्यात् अत्रकेचित् जीमूतवा
हनेनपुंधनाधिकारबोधकवचनात् स्त्रीधनाधिकारस्यव्यवस्थानकल्प्यते परंतुक्वचित् दार्ष्टा
र्थदृष्टान्तविधयाइवपुंधनाधिकार बोधकवचनमुपन्यस्यते एवंचपुंधनस्त्रीधनयोर्युक्तितुल्य
त्वाभावात् पुंधनप्रकरणीयवचनानांस्त्रीधनव्यवस्थापकत्वानौचित्यमित्याहुः ननुयौतुकमितिश्रू
यतेतत्कीदृशंइतिचेत् विवाहसमयेलब्धंइतिजानीहि तथाहियुमिश्रणेइत्यस्मात् धातोर्भविति
क्वाप्रत्ययेनयुतइत्यनेनमिश्रणंप्रतीयते मिश्रणंचश्रुतिबलात् वरकन्ययोर्विवाहसमयेभवतितत्
कालेचयल्लब्धंनतत् यौतुकमितिउकाररहितः पाठः जीमूतवाहनसम्मतः उकारवत्पाठस्तुक्वचित्
दृश्यतेसचयुधातोस्तुप्रत्ययेनसिद्धात् युतुशब्दात्सिद्धः विवाहश्चाष्टविधः ब्राह्मदैवार्षगांधर्वप्रा
जापत्यासुरराक्षसपैशाचभेदात् तेचयाज्ञवल्क्योक्तायथा॥ब्राह्मोविवाहःआहूयदीयतेशक्त्यलंकृ
ताइतियज्ञस्थायर्त्विजेदैवआदायार्षस्तुगोयुगमितिचरतांधर्ममित्युक्त्वासहयादीयतेऽर्थिने। स
कायइतिआसुरोद्रविणादानात्गांधर्वःसमयान्मिथः।राक्षसोयुद्धहरणात् पैशाचःकन्यकाछ
लात् इतिचत्वारोब्राह्मणस्याद्याराज्ञोगान्धर्वराक्षसौ॥आसुरोवैश्यशूद्राणांपैशाचःसर्वगर्हितइ
तिच अत्रस्तुतिनिन्दाप्रदर्शनार्थेब्राह्मयादिव्यपदेशःब्राह्मणादीनामयमुचितःकार्य्यःइत्यन्वयःउ
त्वाहु वरंत्वगृहमानीयतस्मैयदलंकृताकन्यादीयतेसब्राह्मोविवाहः आद्यः यज्ञस्यायपुरोहिताय
दक्षिणादानसमयेयत्कन्यादानंसदैवोद्वितीयःगोमिथुनंवरात्गृहीत्वातेनगोमिथुनेनसहकन्या
दानंआर्षोविवाहः ततीयः कस्मैचित्कन्यांयाचमानायअनयासहधर्मंचरताभवानित्युक्त्वाक
न्यादानंप्रजापत्यःकायःइतितस्यैवनामान्तरंकःप्रजापतिरुद्दिष्टइतिकोयः अयंचतुर्थःगोमिथु
नातिरिक्तशास्त्रीयसंख्यानियमंविनास्वाच्छन्दोनधनंगृहीत्वाकन्यादानमासुरःपंचमःअ
न्योन्यानुरागेणयत्रसंयोगःसगान्धर्वःषष्टःयुद्धेनकन्यापितरंजित्वाकन्याग्रहणंबलात्कारेणवा
ग्रहणंराक्षसःसप्तमःकन्यायानिद्रामत्ततादिदशायांछलेनग्रहणंपैशाचःअष्टमःतेषुचमध्ये
ब्राह्मणस्यब्राह्मदैवार्षप्राजापत्याश्चत्वारःक्षत्रियस्यतुगान्धर्वयुद्धहरणंच वैश्यशूद्रयोरासुरो
नुमतःइतरयोर्निषिद्धःपैशाचोनकेनाप्यादरणीयइति शूलपाणिसम्मताव्याख्या इदानीन्तुशिष्टै
ब्राह्मएवाद्रियतेअन्यैस्तुआसुरगान्धर्वराक्षसादिपिरुचित् विवाहस्तुचरमसंस्कारानुकूलंवरेण
क्रियमाणंग्रहणकर्म तदनुकूलत्वात् दानेपिविवाहपदप्रयोगःगांधर्वादिष्वपिवैवाहिकविधिरा
वश्यकः।यथादेवलः॥गान्धर्वादिविवाहेषुविधिर्वैवाहिकःस्मृतःकर्त्तव्यश्चत्रिभिर्वर्णैःसमयेनाग्नि
साक्षिकः इतिविवाहितायाःपुनर्विवाहेपिआथर्वणोक्तःसंस्कारःसोपिविवाहोगान्धर्वएवान्तर्भव
तीतिध्येयं एतादृशाःविवाहाष्टकसमयेलब्धंधनंयौतुकमितिलक्ष्यते।अत्रचमिश्रःब्राह्मादिवि
वाहसमयलब्धंदुहितृणामित्युक्तवान्।अथाप्रजास्त्रीधनाधिकारः॥याज्ञवल्क्यः।अप्रजास्त्रीध

तं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि॥ दुहितॄणां प्रसूतानां चेत् शेषेषु पितृगामि तत्। अत्र ब्राह्मादिषु इत्यत्र व्यु
त्पत्तिवैचित्र्यात् चतुर्ष्वित्यस्यार्थान्वयायाऽतद्गुणसंविज्ञानबहुव्रीहिः तथा च ब्राह्मात् परेषु दैवार्ष
गान्धर्वप्राजापत्येषु इत्यर्थः। यद्धनं लब्धं इत्यन्वये च तद्गुणसंविज्ञानबहुव्रीहिः तथा च ब्राह्मसहि
तेष्वेतेषु यद्धनमित्यर्थः। इति केचित्तु न तादृशव्युत्पत्तिकल्पनेपि चतुर्थविशिष्टेषु विवाहेषु लब्धध
नस्यैवोपस्थितेः याज्ञवल्क्यस्य स्वोक्तक्रमादरे ब्राह्मादिपंचसु आसुरस्यैवान्तर्भावात् गान्धर्वस्य बहि
र्भावाच्च तस्मात् तद्गुणसंविज्ञान एवात्र बहुव्रीहिः यथा लम्बकर्णमानयेत्यादौ लम्बकर्णयुतस्यैवा
नयनप्रतीतिस्तथात्रापि ब्राह्मयुक्तानामेव चतुर्णां विवाहानां प्रतीतिः न त्वतद्गुणसंविज्ञानबहुव्री
हिः यथा चित्रगुमानयेत्यादौ वस्तुतश्चित्रगवस्वामिन एवानयनप्रतीतिर्न तु चित्रगवस्यापीति तथा
च ब्राह्मदैवार्षप्राजापत्येषु विवाहेषु वर्त्तमानेषु यद्धनं तस्या नप्रजायां मृतायां भर्त्ता प्राप्नोतीति पूर्वार्द्धा
र्थः॥ एवं च मनुवचनविरोधः ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनं॥ अप्रजायामतीतायां भर्त्तुरेव
तदिष्यते इत्यत्र गांधर्वस्यापि संग्रहादिति चेत् चतुर्ष्वपीत्यपिकारेण अनुक्तसमुच्चायकेन मन्वे
कवाक्यत्वात् गान्धर्वमपि संगृह्णात शेषेष्विति शेषेषु आसुरादिषु गान्धर्वरहितेषु अपिकारेतस्या
पि पूर्वार्द्धसंग्रहात् पितृगामीति एकशेषेण मातापितृगामीत्यर्थः। यथा मनुः॥ यत्त्वस्याः स्यात् ध
नं दत्तं विवाहेष्वासुरादिषु। अतीतायामप्रजायां मातापित्रोस्तदिष्यते। नारदः॥ स्त्रीधनं स्यादपत्या
नां भर्तृगाम्यप्रजासु च॥ ब्राह्मादिषु चतुर्ष्वाहुः पितृगामीतरेषु च॥ अत्र चतुर्ष्विति न पंचमव्यवच्छेद
दार्थं तेन ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु विवाहेषु अप्रजाया धनं तदपगमे भर्तृगामि इतरेषु राक्ष
सासुरपैशाचेषु पितृगामि विवाहकाललब्धं स्त्रीधनविषयमिदमिति रत्नाकरः। न पंचमव्यवच्छे
दार्थमिति तथा च चतुर्षु लब्धं भर्त्तुरेवावश्यं भवतीति चतुर्भिन्ने तु क्वचित् भर्त्तुः क्वचिदितरेस्येत्यर्थः
एवं च पितृगामीतरेष्विति इतरेषु केषुचिदेव पितृगामि न तु इतरभिन्ने इति इतरेषां इतरव्यवच्छेदे ता
त्पर्य्यमिति भावः। राक्षसेति अत्र राक्षसादिष्वपि वैवाहिकविध्युपदेशात् तदानीं जितोपि पित्रादिर्य
दि दैवगतिमनुरुद्ध्य विवाहगतिमनुरुध्य च दुहितृस्नेहादिना यौतकं ददाति तदेवास्य विषयः वि
वाहकाललब्धेति तथा च ब्राह्मादिविधिपंचकेन विवाहितायाः यदा कदाचिल्लब्धं यावत् स्त्रीधन
एव भर्त्रधिकार इति मतं निरस्तं आसुरादिषु यत् द्रव्यं विवाहेषु प्रदीयते इति यम वचनैकवाक्य
त्वात् आसुरादिविवाहसमयलब्ध एव पित्रोरधिकारबोधनात् तत्तुल्यकक्षतया ब्राह्मादिविवा
हसमयलब्धधन एव भर्त्तुरधिकारस्य कल्पनाच्च अत एव यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादि
षु अतीतायामप्रजायां मातापित्रोस्तदिष्यते॥ इति मनुवचने आसुरादिषु विवाहेषु यद्धनं दत्तमि
ति योजना साध्वी भवति॥ एवं च एतत् पूर्वाव्यवहित ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनं। अती
तायामप्रजसि भर्त्तुरेव तदिष्यते। इति च वचने दत्तमिति पदानुसंगेनैव योजना कार्य्या इति जीमूत १५८
वाहनादीनां मतं। विवाहकालं वितन्वते स्मार्त्तभट्टाचार्य्याः। परिणयनकालश्च परिणयनपूर्वापरीभू ६१

तः कालः स च वृद्धिश्राद्धारंभप्रत्यभिवादनान्तो विवाहपत्वे विहितइति अत्र च प्रथमांगावधि चरमां
गान्तइति तात्पर्यं अतो वृद्धिश्राद्धादेरकरणेपि न दोषः अपरेतु विवाहेषुप्रदीयतेइत्यत्र उपलक्ष
णीयत्वे सप्तमी भिक्षायां गच्छतीतिवत् तथा च विवाहमुद्दिश्य कन्यायै यद्दत्तं तत्यौतकमिति स्पष्टो
ऽर्थः तदेव उत्तरकालं भर्त्रा लब्धव्यं अतएव विवाहदिनएव वृद्धिश्राद्धात् पूर्वं दत्तं धनमपि यौतुकं
नन्वेवं विवाहोत्तरं दिनचतुष्कपंचके गते पि दूरदेशादागतः । कार्य्यसमये आगंतुमशक्तोपि यद्दद्या
ति तत्यौतुकं भवतु विवाहदिनएव कृते वृद्धिश्राद्धे सति पूर्वं याचितं द्रव्यं दैवात् विवाहमजानता
बन्धुनामदत्तं यौतकं न स्यात् भर्त्तुरधिकारश्चस्तत्र न स्यादिति चेदिष्टमेवैतदिति च एडेश्वरेण विवा
हकाललब्धमिति लिखितं प्रायिकत्वेन विवाहनिमित्तदानस्यान्यदिने कदाचिदेव संभवादित्या
हुः यस्याः दौहित्रपर्य्यन्तरहिताया भर्त्ता सपत्नीपुत्रश्च वर्त्तेते तद्धने कस्याधिकार इति चेत् अत्र
स्मार्त्तभट्टाचार्य्यः आदौ सपत्नीपुत्रस्य तदभावे सपत्नीपौत्रस्य तदभावे भर्त्रादीनामित्याह भर्त्रादी
नां धनिनीभोग्यपिंडदानाकर्त्तृत्वं अत्र बीजमप्युक्तं तेन सपत्नीपुत्र तत् पुत्रयोरपि धनिनीभोग्य
पार्व्वणपिंडदानकर्त्तृत्वात् समानत्वं अथ धनिनी भर्त्रादिर्धनिनीभोग्यपार्व्वणपिंडदातृत्वेन स
पत्नीपुत्रापेक्षाया आधिक्यमिव र्त्तते नतु सपत्नीपुत्रस्याधिक्यं दर्शितं एवं च भर्तृसत्वेपि सपत्नीपुत्रा
धिकाराय युक्त्यन्तरमुपन्यसनीयं ॥ यथा ॥ सर्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् सर्वास्तास्ते
न पुत्रेण प्राह पुत्रवतीर्मनुः । इति मनुवचनेन तस्य पुत्रत्वातिदेशात् तत्पुत्रस्यापि पौत्रत्वमतिदिष्टमे
व भवतीति न चैवं पुंधनेपि सतिदुहित्रादिभ्रात्रीदिपर्य्यन्ते भ्रातृष्पुत्रस्यैवाधिकारस्तु सर्वेषामेक
पुत्राणामेकश्चेत् पुत्रवान्भवेत् सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ इति मनुवचनेन भ्रातृपु
त्रेपि पुत्रत्वातिदेशादिति वाच्यं पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा । तत्सुतो इत्यादि याज्ञवल्क्यव
चनेन शगवत्क्रमस्य प्राप्तत्वेन यौक्तिकक्रमस्यान्याय्यत्वात् अत्र च यौक्तिकक्रमबाधकशब्दक्रमा
भावेन यौक्तिकक्रमस्यैव उपादेयत्वादिति चेन्न युक्तिहीनविचारेण धर्म्महानिः प्रजायते इति वृ
हस्पतिना निर्युक्तिकविवेचनस्यानुपादेयत्वकथनेन याज्ञवल्क्योक्तक्रमानुरोधेन च पुत्रत्वादि
देशरूपयुक्तेरधिकारसंपाद नाक्षमत्वे पर्य्यवसानात् अतएव मातृतुल्याः प्रकीर्त्तिता इत्यनेन
फलतो भगिनीपुत्रादेरपि पुत्रत्वातिदेशेपि पूर्व्वं भर्त्रादिरधिकारः अत्राहुः सत्यपि भर्त्तरि सपत्नी
पुत्रस्य एकोद्दिष्टपिंडदातृत्वात् अधिकारः स्त्रीधने हि एकोद्दिष्टपिंडदानेनाप्युपकारः सिद्धा तिस्त्रीणां
पार्व्वणपिंडेऽप्राधान्यात् पुंधने तु पार्व्वणपिंडसम्बंधतारतम्येनैवाधिकारतारतम्यमिति न त्वत कल्पि
तं अथैवमपि कथं सपत्नीपौत्रस्य भर्त्तुः पूर्वमधिकारः न च भर्त्तुः परमेव तस्याधिकारः स्मार्त्तसम्म
तइति वाच्यं पुत्रादिभर्तृपर्य्यन्ताभावे देवराधिकारस्य तेनोक्तत्वादिति चेदेतच्चिन्त्यं पुत्रदौहित्रादेरधि
कारः पार्व्वणपिंडदानेन उपकारादिभिरपि नोक्तः तैर्दौहित्रादेः प्रजात्वास्वीकारात् विशेषवचनान्त
राभावाच्च सपत्नीपुत्राधिकारे वचनन्तु । वक्ष्यते मातापित्रोः इति तत्राप्यादौ मातुस्ततः पितुर्मातापि

त्रोस्तदिष्यते इति मनुवचने पाठिकक्रमदर्शनात् नसमुच्चयः तद्धि अकत्वकारादि विरहस्थले संभ
वति क्रमे समुच्चयस्यानुपादेयत्वात् अप्रजायां हरेद्भर्त्ता माता भ्राता पिता पिवेति अत्र अपिवा इत्य
नेन नसमुच्चयाभाव सूचनाच्च ऋक्थं मृतायाः कन्याया गृह्णीयुः सोदराः स्वयं ॥ तदभावे भवेन्मातुस्तदभा
वे भवेपितुः इति बौधायनवचने एकत्र तथा दृष्टत्वाच्च यत्तु पुनः परिणयनांतरं पितृमातृभर्तृकुला
त् स्त्रिया लब्धं तद्भ्रातॄणामेव तदाह ॥ याज्ञवल्क्यः ॥ बंधुदत्तं तथा शुल्कं मन्वाधेयकमेव च ॥ अप्र
जायामतीतायां बांधवास्तदवाप्नुयुः बंधुदत्तमिति माता पितृभ्यां मद्दत्तं तत्पुत्राश्च भ्रातर [illegible] एव
बान्धवास्तदाह ॥ वृद्धकात्यायनः ॥ पितृभ्यां चैव यद्दत्तं दुहितुः स्थावरं धनं अप्रजायामतीतायां
भ्रातृगामि च सर्वदा ॥ इति जीमूतवाहनः । अन्वाधेयपदेन विवाहात् परतः पितृमातृभर्तृकुला
त् लब्धमुच्यते एवं च बंधुदत्तमित्यनेन विवाहात् पूर्वं पितृभ्यां दत्तस्य लाभः संभवति परन्तु विवा
हात् पूर्वं भ्रातृदत्तस्य स्वोपार्जितस्य च न लाभस्तस्मात् तत्राधिकार्य्याकांक्षायां भ्रातुरेवाधिकारो
मन्तव्यः ॥ एकत्र दृष्टत्वात् सधवाया उपार्ज्जिते पि भर्त्रभावे भ्रातुरेवाधिकारो जीमूतवाहनादिभि
रगत्या स्वीकार्य्यः शुल्कमपि व्यासोक्तं कात्यायनोक्तं च भ्रातरं एव गृह्णीयुरिति जीमूतवाहनस्यानैश्चि
ल्पाणेरप्यत्रैवाशयः । चंडेश्वरस्तु शुल्कं यद्गृहीत्वा कन्या प्रदीयते तदिह विवक्षितमित्याह एवं चा
र्हतीत्यनुवृत्तौ स्वयं शुल्कं वोढेति यत् शंखवचनं तत्र शुल्कं दानान्तरं कन्या मरणे बोध्यं इति तदाश
यः तत् जीमूतवाहनेन न सहते तादृशशुल्कस्य पित्रा गृहीतत्वेन स्त्रीधनत्वाभावात् अथ यत्कन्या
यै एव आवाहनिक शुल्कवत् दीयते तत्परमेवेदं वचनमिति चेत् तादृशकल्पनायां प्रमाणाभावः
व्यासकात्यायनोक्तशुल्काधिकरिदुर्भिक्षं च एवं यद्गृहीत्वा कन्या दीयते इत्यनेन कन्यादातुरेव ग्रह
णं बोध्यते गौतमः भगिनीशुल्कं सोदर्याणामूर्द्ध्वं मातुः पूर्वं चैके इति परमतमेतदिति हलायुधः ऊर्द्ध्वं
मातुर्मातुः परमे इत्यर्थः माता पित्रोः सद्भावे तयोरेव इति दीपकलिका अन्ये चित्त स्त्रियाः शुल्कं मा
तापित्रभावे सोदरा गृह्णीयुः पूर्वं चेत्येके इति शुल्कान्यधनविषयकं शुल्कं पदं च सामान्यबोधकं क
न्यायाः शुल्कं सोदराभावे पित्रोः विवाहितायाः पित्रोरभावे सोदरस्य इति व्यवस्थित विकल्पार्थमेके इ
त्याहुः ॥ बौधायनः ॥ ऋक्थं मृतायां कन्यायाः गृह्णीयुः । सोदराः स्वयं ॥ तस्याभावे भवेन्मातुस्तदभावे भ
वेत् पितुरिति जीमूतवाहनस्तु ऊर्द्ध्वं मातुरिति सोदराणामूर्द्ध्वं मातुः इत्यर्थः तथा च बौधायनैकवा
क्यत्वात् पूर्वं चैके इति परमतमित्याह । तथा च भगिनीधनमात्रमेव विवाहसमयादन्यत्र लब्धं भ्रातु
रेव इति तन्मतं तन्मते बौधायनवचने कन्याया इति व्यर्थं इति गौतमधृतपरमतस्य अत्यन्तमनुपादे
यत्वं चायोग्यमिति बौधायनवचनव्याख्याने कन्याऽनूढाभिप्रेता इति रत्नाकरः विज्ञानेश्वरस्तु बा
न्धवास्तदवाप्नुयुरिति याज्ञवल्क्यव्याख्याने बान्धवा भर्त्रादयस्तत्र च विशेषः वचनान्तरैर्वक्ष्यते त
था च प्रजाभावे बान्धवानां तत्र च ब्राह्मादि परिणयनलब्धं भर्तुरन्यत्र पित्रोरित्याह । तदेव । अप्रजा ५५८
स्त्रीधनेन तत्र तत्राधिकारी निरुपितः माता पित्रोर्भ्रातृश्चाभावसर्वं धनं पत्युरेव बंधुदत्तं तु बन्धुनाम ६६

भावेभर्तृगामितद्दितिकात्यायनवचनादितिजीमूतवाहनः। अत्रसत्वीपौत्रस्याधिकारइतिकेचि
त्तन्मान्त्रिभट्टाचार्य्यस्तुपरिणयनकालोत्तरंभर्तृदत्तेप्रजास्त्रीधनभर्तुरेवाधिकारः। अप्रजायांहरेद्भ
र्त्तामाताभ्राताथपितापिवेति देवलवचनात् मातापितृदत्तेतुभ्रातुरेवाधिकारः पितृभ्यांचैवयद्दत्तं
दुहितुःस्थावरंधनंदूत्यादिवृद्धकात्यायनवचनात् नचदेवलवचनेभर्तृदत्तंधनमितिकुतोलभ्य
तेइतिवाच्यंमातापितृदत्तधनेभ्रातुरधिकारस्यवृद्धकात्यायनेनवोधितत्वेनपरिशेषेणभर्तृदत्त
एवदेवलवचनविषयत्ववोधनात् मातापितृदत्तेतुभ्रातुरेवाधिकारः॥अथअप्रजायामतीतायां
वान्धवास्तदवाप्नुयुः रितियाज्ञवल्क्येननतत्पदेन पूर्वोक्तस्त्रीधनपरामर्शात् याज्ञवल्क्येनेच
वक्ष्यमाणयौतुकातिरिक्तधनमात्रएववान्धवानांभ्रातृणामधिकारसिद्धौदेवलवचनमपिभर्तृवि
षयेयौतकपरमस्तुइतिचन्न याज्ञवल्क्येसंहितारीकाकृताविज्ञानेश्वरेणवांधवाइत्यस्यभर्त्रादय
इत्यर्थकरणादित्याह अत्रस्मार्त्तमतमाननुभविकंप्रतिभाति अथभर्त्रायदिनास्तितदाब्राह्मादिवि
वाहकालीनेधनंभ्राताप्राप्नुयात् नवान्चभ्रात्रधिकारवोधकवचनस्यभर्तुरेवतदिष्यतइत्यादिमन्
न्वादिवचनविरोधप्रसंगायब्राह्मादिविवाहकालीनातिरिक्तधनविषयकत्वयावश्यकं एवंचब्राह्मा
दिविवाहकालीनधनेभ्रातुर्नाधिकारेवचनाभावा[illegible]दितिवाच्यंतथासतिभ्रातृसत्वेपिभर्तृभा
भागिनेयपर्य्यंताभावेअविशेषात्सर्वधनकृत्स्नाधिकारेभ्रातृपुत्रएवाधिकारिस्यात् वक्ष्यमाणबृ
हस्पतिवचनात् इत्यनुभवविरोधापत्तेरितिचेत् यथावंधुदत्तन्तुवन्धुनामभावेभर्तृगामितद्दितिका
त्यायनवचनात् संभावितभ्रात्रधिकारेपिधनेभ्रातुरभावेभर्त्रधिकारः तथासंभावितभर्त्रधिकारेपिध
नेभर्तुरभावेभ्रातुरधिकारस्तस्मात्भर्त्रादीनामधिकारवोधकानिस्वसत्तायांअपराधिकारविरोधका
निस्वसत्ताभावेतुअन्येषामपिक्रमेणाधिकारेनविरोधकानि एवंचभर्तृदत्तेपिधनेसत्यपिभर्तृभागिने
येभर्त्रसत्वेभ्रातुरेवाधिकारइतिस्मार्त्तैरपिवक्तव्यं जीमूतवाहनेनतुतत्स्वीकृतमेवतथाचपितृभ्यां
चैवयद्दत्तंइतिवचनंपित्रादिदत्तविषयकंभर्त्रभावकालीनभर्तृदत्त(धन)विषयकंभर्त्राद्यभावकालीनयौतु
कविषयकंचउपलक्षणत्वादितिभर्त्रादिपर्य्यन्ताभावे। बृहस्पतिः मातृस्वसामातुलानीपितृव्यस्त्रीपि
तृष्वसा॥श्वश्रूपूर्वजपत्नीचमातृतुल्याःप्रकीर्त्तिताः। यदासामौरसोनस्यात्सुतोदौहित्रएववातत्
सुतोवाधनंतासांस्वस्त्रीयाद्याःसमाप्नुयुः॥औरसःसन्तानःपुत्रदुहित्रादयःप्रागुक्ताःसुतःसपत्नीपु
त्रःदौहित्रःसपत्नीदौहित्रःब्राह्मणीतद्धरेत्कन्यातदपत्यस्यवाभवेदितिवचनस्यविषयः॥तत्सुतःस
पत्नीसुतसुतःसपत्नीदौहित्रस्यानुपकारकत्वेनाधिकारवाधात् तथाचस्वस्त्रीयादिषस्तुपूर्वंसपत्नी
पुत्रपौत्रयोरधिकारःसचभर्तुःपूर्वमेवस्वदौहित्रात्ब्राह्मणीदुहितृसन्तानात्परमितिप्रागुक्तमिति।
जीमूतवाहनादीनांमतं अपरेतुऔरसःसुतःदौहित्रःसुतरांस्त्रियाश्चदुहितातत्सुतःसुतसुतःपौत्रः
वाकारसमुच्चिताश्चभर्त्रादयःवाचनिकाःतेषामभावेसत्यपिभ्रातृश्वसुरादौसपत्नीपुत्रादौचस्वस्त्रीया
देरेववक्ष्यमाणक्रमेणाधिकारः। नचऔरसइतिसुतविशेषणंव्यर्थंसपत्नीपुत्रादेरतिदिष्टपुत्रस्यव्याव

र्तनीयत्वात् नचस्वइतिविशेष्यंव्यर्थंदोषायइतिवाच्यं औरसक्षेत्रजौपुत्रौपितृक्तस्यस्यभा
गिनौइत्यादौदर्शनात् उरःसम्बन्धिपुरुषान्तरव्यावर्तकत्वाच्च नचसपत्नीपुत्रे सतिजामातुरधि
कारोऽनुभवविरोधः भ्रातृश्वशुरसत्वेजामात्राधिकारइवसहनीयत्वात् अथजामातुर्यपुत्रत्वा
तिदेशः। बृहस्पतिनोक्तः। तथासपत्नीपुत्रस्यापिपुत्रत्वातिदेशो मनुनोक्तः देवरादीनांसपत्नीपुत्र
स्यचपुत्रत्वे आदौकस्याधिकारइत्यपेक्षायांउपकारतारतम्यानुसारेण धनिपुत्रदेयमुख्यपिंडत्व
यदातृत्वात् सपत्नीपुत्रस्यैवाधिकार आदौयुज्यतेइतिचेदिष्टमेवैतत् ननुभर्तुः पूर्वंतस्याधिका
रइष्यते भर्तृद्वारैवतस्यसम्बन्धित्वात् नचैवंश्वशुरसत्वेश्वशुरद्वारासम्बन्धिनोदेवरादेरधिकारो
मास्तुइतिवाच्यं श्वशुरादेर्वचनान्तरेण अधिकारस्याप्राप्तत्वात् नचभर्तुः पूर्वंऔर्ध्वदैहिकक्रिया
धिकारात् दायाधिकारोपिगस्तुइतिवाच्यं सपिंडत्वेनऔर्ध्वदैहिकक्रियाधिकारि[illegible]णादौस
त्यपिभगिनीपुत्रादेरपिदायाधिकारकथनेनतादृशनियमस्यापिदूरीकरणात् एवंदेवरादी
नांसपत्नीपुत्रस्यचपुत्रत्वात् विशेषएकस्यभर्तुः पूर्वमधिकारः अपरेषांचनत्वपश्चादित्यत्रा
पिप्रमाणाभावोविदितव्यः नचसपत्नीपुत्रेपुत्रत्वातिदेशस्यगौणपुत्रप्रकरणेकथनस्वरसेनपु
न्नामनरकत्राणकर्तृत्वं स्वीक्रियते नत्वेषांस्वस्त्रीयादीनांदायग्रहणमात्रार्थंपुत्रत्वादितिष्टानाम्
एवंचसपत्नीपुत्रेणैषांसमानतानभवतीतिवाच्यं भर्तुस्ततोपिवहूपकारकत्वात् यत्तुपुन्नामन
रकत्राणेनैवआत्मजपुत्रस्यसर्वतोवलवत्वमिति तत्तुच्छं तथासतिस्वपुत्रसपत्नीपुत्रयोस्तुल्या
धिकारःस्यात अथस्वपितृकुलस्वभर्तृकुलोपकारकत्वपुन्नामनरकत्राणकर्तृत्वरूपोभयध
र्मवति स्वपुत्रस्यप्राधान्यमितिचेत् भगिनीसपत्नीपुत्रस्य तथात्वेनसपुत्रतुल्यत्वंइतरसपत्नी
पुत्रात् प्राधान्यंचस्यात् यदिचस्वभोग्यपार्वणपिंडदातृत्वऋणापनयनकर्तृत्वाभ्यांआत्मजस्यव
लवत्वमभिमतंतदापुन्नामनरकत्राणकर्तृत्वेनैवलवत्वमितिनवाच्यतामेति एवंसपत्नीपुत्रस्या
धिकारोयथातथास्तुसपत्नीपौत्रस्यतुभर्तुः पूर्वमधिकारेप्रमाणाभावस्तुसुतरांसिद्धइत्याहुः प्र
कृतमनुसरामः स्वस्त्रीयाद्याः समाप्नुयुरित्यत्रकिंएषांसमुच्चयेनाधिकारः अथवापाठक्रमेण ना
द्यःसक्रमसंभवेसमुच्चयस्यानादेयत्वात् विरुद्धरूपाणांभगिनीपुत्रादीनांसमुच्चयानर्हत्वाच्च।
पाठक्रमेणैवस्वस्त्रीयादीनामधिकारः अतएवस्वस्त्रीयस्यआद्यत्वंसंभवतीति नचयुक्तिवाधः दे
वरसत्वेजामातुरधिकारस्यान्याय्यत्वादितिवाच्यं तदग्रजसत्वेजामातुरधिकारस्यन्याय्यत्वेतदनु
जसत्वेजामातुरधिकारस्यापिन्याय्यत्वात् वचनस्यादरेतुवचनपाठक्रमस्याप्यादरणीयत्वादि
तिकेचित् तन्न और्ध्वदैहिकक्रियारूपस्योपकारतदितरवहूपकारककर्तरिसतिअल्पतरोपका
रकर्तुरधिकारस्यायुक्तत्वात् अथभ्रातृस्वसुरप्यपिसपिंडत्वेनऔर्ध्वदैहिकक्रियाकर्तृत्वाद्दे
रतुल्योपकारित्वाच्चतस्मिन्सतिजामात्रादेरधिकारोमास्तुइतिनवाच्यं। सपिंडत्वेनैवदेवरस्यापिपिं
डदानप्राप्तौतस्यपुनःपुत्रत्वज्ञापनंतस्यपिंडदानावश्यकत्वज्ञापनाय एवंचएकवचनोपात्तानांजा ६७

श्लोकः२०

मात्रादीनामपि पुत्रादिहीनश्वश्रूप्रभृतीनां पिंडदानमावश्यकमायातं तथाचावश्यकत्वोपका
रकर्तृत्वमेव भ्रातृश्वशुरादितो जामात्रादेर्मुख्यताप्रयोजकमिति भ्रातृश्वशुरादिसत्वेपि जामात्रादे
रधिकारस्य युक्तिसिद्धत्वात् अपरेतु भ्रातृश्वशुरसत्वे जामातुर्नाधिकारः असपिंडत्वात् परस्तु बांध
निकानां भर्त्रादिपर्य्यंतानामभावे युक्त्या उपकारकाणामधिकारे प्रस्तुते सपिंडमध्ये आदौ पत्यनु
जस्य च ततो देवरपुत्रयोः ततो भर्तृभागिनेयस्य ततः सपिंडसमानोदकचतुर्दशपुरुषसंतानरूप
सगोत्रविरहे पितृवंशानां अधिकारे प्रस्तुते भ्रातृपुत्रभगिनिपुत्रयोः ततः पितृवंशमातृवंशविश्रा
मे जामातुः ततो द्विजोत्तमस्येत्याहुः स्तन्न सपिंडपंक्तेः प्रथमं श्वशुरे आसन्ने सत्यपि देवरस्याधि
कारः इत्यत्र पितृवंशपंक्तेः प्रथमं भ्रातृपुत्रभगिनीपुत्रयोरधिकार इत्यत्र च प्रमाणाभावात् पुत्रत्वे
न तथेति चेत् मुख्यपुत्रानंतरमेव सर्वेषां प्राप्नुयुरिति मन्तव्यं अतो जीमूतवाहनादिसम्मतः पन्थाः।
आदरणीयः स यथा उपकारतारतम्येनैवाधिकारक्रमः तत्र आदौ देवरस्य तत् पिंडदातृत्वात् तत्भ
र्तृपिंडदातृत्वात् देयपुरुषत्रयपिंडदातृत्वात् तत्पुत्रे देयपुरुषद्वयपिंडदातृत्वाच्च तदनंतरं दे
वरपुत्रभ्रातृश्वशुरपुत्रयोर्युगपत् तत्पिण्डदातृत्वात् तद्भर्तृपिण्डदातृत्वात् तत्पुत्रे देयपुरुषद्वय
पिण्डदातृत्वात् तद्भर्तृदेयपुरुषद्वयपिंडदातृत्वात् अत्र च तदभावे भगिनीपुत्रस्य तत्पिंडदातृत्वात्
तत्पुत्रे देयमातामहादित्रयपिंडदातृत्वाच्च तदनंतरं भर्तृभागिनेयस्य तत्पिंडदातृत्वात् तद्भर्तृदेय
तत्श्वशुरादित्रयपिंडदातृत्वाच्च पुत्रात् भर्तुर्दुर्बलत्वेन पुत्रकर्मकर्तृतो भर्तृकर्मकर्तुर्दुर्बलत्वस्यन्या
य्यत्वेनायं क्रमः सिद्ध्यतीति जीमूतवाहनस्याशयः अत्र भर्तृभागिनेयस्य पुत्रकर्मकर्तृत्वमप्यस्ति पुत्रपितृ
पितामहादिश्राद्धकर्तृत्वात् अत उभयकर्मकर्तृभर्तृभागिनेयः केवलपुत्रकर्मकर्तृतो बलवान् भवति।
नचास्मान्मते भगिनीपुत्रस्य पुत्रमातामह्यादिषट्कतृप्तिजननात् पुत्रपितामहपितामह्यादिचतुष्क
तृप्तिजनकभर्तृभागिनेयापेक्षया बलवत्वमिति वाच्यं भर्तृपित्रादिमात्रादिषट्कतृप्तिजननेन तस्याधि
क्यात् नच तत् षट्व्यक्तितर्पणएव विश्रान्तं इति वाच्यं तत्रच पुत्रतर्पणीयषट्कतर्पकापेक्षया तत्तर्प
णीयव्यक्तिचतुष्टयतर्पकस्य न्यूनत्वात् यत्तु बंधुनामभावे भर्तृगामि तदित्यनेन भर्तृतो भ्रातुर्बलवत्त्वेन
भ्रातृकर्मकारिणो भगिनीपुत्रस्य आधिक्यमिति तत् ब्राह्मविवाहकालब्धादौ न संगच्छते तत्र भ
र्तुरेव बलवत्वादिति विभावनीयं अत्र च मातामहपक्षस्य अप्रधानत्वात् प्रधानाप्रधानयोः प्रधानेका
र्य्यसंप्रत्यय इति न्यायेन पुत्रपितृपक्षपिंडदातुर्भर्तृभागिनेयस्यादौ अधिकारित्वं एवं श्वशुरीयद्भागि
नोभर्तुरुपकारकोपि भर्तृभागिनेय एव इत्यपि विवेचनीयं तदभावे भ्रातुष्पुत्रः पुत्रयोर्देयमातामहादि
पिंडद्वयदातृत्वात् स्वपिंडदातृत्वाच्च तदभावे जामाता स्वपिंडदातृत्वात् जीमूतवाहनः पक्षं पुनरेतेषाम
भावे श्वशुरभ्रातृश्च श्वश्रुरादेः सापिंडानंतर्यक्रमतो धनाधिकारी वेदितव्यः इत्याहुः तथाच जामातृपर्य्य
न्ताभावे। सपिंडानामधिकारः तत्रादौ श्वशुरस्याधिकारः इति भावः आदौ सपत्नीपौत्रस्य ततः सपत्नीप्र
पौत्रस्य भर्त्रधिकारित्वादित्यपरे श्वशुरानन्तरं भ्रातृश्वशुरस्य श्वशुरप्रपौत्रस्य आसन्नद्वारासपिंडत्वात्

६२ ततआर्य्यश्वशुरस्यततस्तत्सन्तानस्यततोऽन्यार्य्यश्वशुरस्यतत्सन्तानस्यचक्रमेणएवंचतुर्दशसु
पुरुषेष्वपिततःपितृवंशस्यदशमपुरुषपर्य्यन्तंततोमातृवंशस्यततोब्राह्मणीधनवर्ज्जराजइतिसं
क्षेपः अत्रवीजंऔर्द्ध्वदेहिकक्रियाकारित्वंपुंधनेहिउपकारसम्बंधेनैवधानाधिकारदर्शनात्तत्र
चविष्णुपुराणंपुत्रःपौत्रःप्रपौत्रोवातद्वद्वाभ्रातृसंततिः॥सपिंडसन्ततिर्वापिक्रियार्हान्नृपजायते
।एषामभावेसर्वेषांसमानोदकसन्ततिः मातृपक्षस्यपिंडेनसम्बन्धीवाजलेनवा॥कुलद्वयेपिचाच्छि
न्नेस्त्रीभिःकार्य्यान्नृपक्रिया॥संघातान्तगतैर्वापिकार्य्याप्रेतस्यसत्क्रिया उच्छन्नवन्धुऋक्थंवा
कारयेदवनीपतिः तथापितृमातृसपिण्डैश्चसमानसलिलैस्तथा।संघातान्तगतैर्वापिराज्ञावाध
नहारिणा।पूर्वाःक्रियास्तुकर्त्तव्याःपुत्राद्यैरेवचोत्तराः॥आदौभ्रातास्तेतेतत्सन्ततिःसहार्थेसमासश्च
भ्रात्रासहसन्ततिरितिसन्ततिश्चभ्रातुरेवसन्निहितत्वात् ततःसपिण्डःपित्रादयःतत्सन्ततयश्च
स्त्रीसाधारणाःपुत्रवधूप्रभृतयःततःसमानोदकसन्ततिःसमानोदकभावश्चनिवर्त्तेताचतुर्दशादिति
स्मृत्युपदिष्टा ततोमातृपक्षसपिण्डसमानोदकाःकुलद्वयेमातृकुलेपितृकुलेच।स्त्रीभिःतत्कुलोद्
हित्रादिभिःसर्वाभावेसंघातान्तगतैः मित्रजनैस्तदभावेराज्ञातस्यस्वयमनधिकारेसवर्णद्वाराकर्त्तव्य
ता उत्तराःसपिंडीकरणोत्तराःसांवत्सरिकादयःएवंचस्त्रीणामप्याकांक्षितत्वात् तासामर्थेनैवै
वक्रमेणपारलौकिकक्रियाधिकारःतत्रभ्रातृसन्ततिरितिनसंगच्छतेअसपिंडत्वात् अतस्तस्यागे
नैवक्रमोवेदितव्यःसमानोदकपर्य्यंताभावेपित्रादयःपितृवंशाःपितृमातृसपिंडैश्चसमानसलिलैरि
तिवचनादितिस्मार्त्ताः मातृवंशात्पितृवंशस्याभ्यर्हितत्वेनयुक्ताइत्यपरेतदभावेमातृवंशाःद्विजोत्त
माश्चतदभावेद्विजोत्तमइतिवचनात् प्रेतक्रियाधिकारिणःतेषामेवउपकारकत्वात्धनाधिकारः।
तदनंतर्गतानांस्त्रीणांमन्त्राहनितुकर्तव्याःस्त्रीणामप्युत्तराःक्रियाइतिविष्णुपुराणात् प्रेतक्रियाधि
कारेपिनधनभागित्वंनस्त्रीशूद्रविधर्म्मिष्विति वचनात् अपरेतुभगिनीपुत्रादेःपुत्रतुल्यत्वकथ
नात्स्वप्रजानंतरमेवाधिकारःतत्रचपुत्रकर्त्तव्यकर्म्मकरणात्तम्येनैवपूर्ववदधिकारःअन्यथा
तेषांविष्णुपुराणेऽनुक्तानांकदाऔर्द्ध्वदेहिकक्रियाधिकारित्वमित्यनध्यवसायःस्यादित्याहुःस्मार्त्ता
।स्तुस्त्रियाःप्रेतकर्म्मणिसगोत्रपर्य्यन्ताभावेआदौपितुःतदभावेभ्रातुःततोभगिनीपुत्रभर्तृभागिने
यभ्रातृपुत्रजामातृणामधिकारः॥मातुलोभागिनेयस्यस्वस्त्रीयोमातुलस्यच।श्वशुरस्यगुरोश्चैवसख्यु
र्मातामहस्यच।एतेषांचैवभार्य्याभ्यःस्वसुर्मातुःपितुस्तथा॥पिंडदानंन्तुकर्त्तव्यमितिवेदविदांस्थिति
रितिशातातपवचनात्भर्तृमातुलशिष्ययोरपितत्राधिकारःतत्रइतरस्यपितृवंशस्यइत्याहाःतन्म
तेधनाधिकारेपित्रादशएवक्रमोवोद्धव्यःइत्ययंस्त्रीधनविभागःअत्रचभर्तृदत्तंस्थावरंस्त्रीधना
धिकारिणांनभवति।किंतुभर्तृधनाधिकारिणामेवदायादाऊर्द्ध्वमाप्नुयुरितिवचनात् तत्रयदि
दायादास्त्रियएवाभिमताःतदावचनवैयर्थ्यंअर्थतःसिद्धत्वात् अतःभर्त्तुरेवदायादाःवोधव्याःदा १५९
यादाऊर्द्ध्वमाप्नुयुरितिवचनस्यपत्नीसंक्रान्तधनविषयत्वंनिवन्धकारैर्व्याख्यातं सम्बन्धाधीनस्व ६

त्ववद्धनं दायः निरूढः तच्च पूर्वस्वामिस्वत्वोपरमइति विशेषणाक्रान्तमिह विवक्षितं ततश्च भर्तृ
दायं भर्तृसम्बन्धाधीनलब्धमिति फलितार्थः जीवति भर्त्तरि पालनीयं तदनुमतिं विना न विनाश
नीयं मृतेतु तस्या एव स्वातंत्र्यं परन्तु स्वातंत्र्येपि भोग एवानुमतः नतु ऐच्छिक व्ययादिः इति फलिता
र्थः एतच्च स्थावर एव इति रत्नाकरमतं तत्र च गुरौ स्थिता इत्यनेन मृतभर्तृकत्वं प्रतिपादितं अपुत्रा
इत्यनेन तत्र तस्याः स्वामित्वमायातं वचनं चेदं कात्यायनेन प्रसंगादुपन्यस्तं यथा पूर्ववचने यथेष्टं
स्थावरेष्वपीत्यनेन स्त्रीधने स्त्रीस्वत्वास्पदे स्त्रीस्वातंत्र्यकथनात् स्त्रीस्वत्वास्पदीभूतधनांतरस्म
रणात् तत्रास्वातंत्र्यादि व्यवस्थाप्यमितद्वचनोपन्यासः इति अथैतद्वचनं प्रकरणात् स्त्रीधनपरमस्तु
न चैवं सति अपुत्रेत्यस्य वैयर्थ्यमिति वाच्यं गुरौ स्थिता इत्यस्य अनुकूलत्वात् तथाहि पुत्रसत्वे तत्
परतंत्रा तदभावे गुरौ स्थिता इत्यर्थ इति चेन्न श्रुतिलिंगाधिकरणे प्रकरणापेक्षया आकांक्षायाबलव
त्वाभिधानात् तथा हि पारिभाषिकस्त्रीधने स्त्रीस्वत्वास्पदे स्त्रीस्वातंत्र्ये प्रतिपादिते तदितरत्र स्त्रीस्व
त्वास्पदे धने कीदृशी व्यवस्थाकांक्षा जायत इति वस्तुतः यथेष्टं स्थावरेष्वपीति वचने स्थावरं परमवश्यं भर्तृदत्तेतरस्थाव
अभिप्रेतं मुनेरिति वक्तव्यं अन्यथा दद्याद्धा स्थावरादृते इति नारदविरोधः स्यात् एवं च अन्यविधस्त्री
स्वामिकधनवत् भर्तृदत्तस्थावरेपि व्यवस्थाकांक्षा जायते भर्तृदत्तस्थावरेतरस्त्रीस्वत्वास्पदधने कीदृ
दृशी व्यवस्था इत्याकांक्षाया एव एतद्वचनोत्थापनं तत्र च भर्तृदायः भर्तृधनमित्यर्थः भर्तृस्वामित्वपूर्व
कं स्त्रिया धनमित्यर्थः अत्र भर्त्रेति विशेषणात् पित्रादितः स्त्रीसंक्रान्तधने स्वातंत्र्यमेव पर्यवस्यति मि
श्रास्तु पुत्रद्वारा स्वसंक्रान्त भर्तृधने मातृसंक्रान्ते पुत्रधने इति पर्यवसिते पि स्थावरेऽस्वातंत्र्यमाहुः
जीमूतवाहनादयस्तु कथंचिदपि स्त्रीमात्रसंक्रान्ते धनेऽस्वातंत्र्यमाहुः एवं च अपुत्रा शयनं भर्तुरित्यत्र
अपुत्रेति संक्रान्तधनाभिप्रायेण तस्मात् भर्तृदत्तमपि स्थावरं दायादैरेव लब्धव्यं इति अथ प्राप्तं शि
ल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः भर्तुः स्वाम्यं भवेत्तत्र शेषंतु स्त्रीधनं स्मृतमिति कात्यायनवचनात्॥
सधवयार्ज्जिते भर्त्तुः स्वातन्त्र्ये भार्य्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृता इति मनुवचने पुत्रपदस्य लिं
गाविवक्षया पुत्रपुत्र्युभयपरत्वेन अविवाहितयाऽर्ज्जिते पितुः स्वामित्वेपि विधवयार्ज्जिते धने कीदृशी व्य
वस्था न च तत् भ्रातुरेव तत् प्रतिपक्ष्यस्य भर्त्तुरभावेन विवादासंभवात् इति वाच्यं पितृभ्यां चैव यद्दत्तमि
त्यनेन पितृदत्तधने एव भ्रात्रधिकारकथनादिति चेन्न प्रतिपक्षाभावे भर्तृमातृभ्रातॄणां सर्वत्रैवाधि
कारस्य पूर्वमुक्तत्वात् एवं येतु दुहितृसंक्रान्तपितृधने दुहितृमरणानन्तरं दुहितृतराधिकारिणाम
धिकारं वदन्ति तन्मते संक्रान्तधनमपि स्त्रीधनमेव तत्रापि एषा व्यवस्था स्त्रीधनस्य षड्विधत्वकथ
नं निबन्धकारैर्न्यूनसंख्याव्यवच्छेदपरत्वेन व्यवस्थापितं नियमपरत्वेपि नियतस्वातंत्र्यविषयधन
परं तथा हि विवाहे दत्ते पितृधनं दुहितरि संक्रान्तमपि भर्तृस्वामिकमेव भवति षड्विधेतरधने भर्त्तुः स्वा
म्यप्रतिपादनात् भार्य्यापुत्रश्चेत्यादिवचनेन स्त्रीधनन्तु न भार्य्या पुत्रश्चेत्यादिवचनस्य विषयः स्वा
तंत्र्यवचनेन बाधितत्वात् एवं च विवाहात्पूर्वं कतिपयदिवसं यावत् स्वातंत्र्येपि नास्य पारिभाषि

कस्त्रीधनत्वं एवमर्ज्जितेपि क्वचित् भर्तृस्वाम्यात् विधवयार्ज्जिते कदाचित् स्वातंत्र्यस्वत्वेपि भ
र्ज्जितसामान्ये स्वातंत्र्याभावात् नियतस्वातंत्र्याभावः अत्र च सधवयार्ज्जितधनेप तिस्वत्वेपि
पत्नीपरतंत्रं न तत्स्वामित्वमिति भर्त्तुरुपरमे तत्रैव तद्बोद्धव्यं तदुपरमे तु भर्त्तुरुत्तराधिकारिभिरेवग्रा
ह्यं नात्रस्त्रीधनाधिकारिणामधिकारः इतियदि चादौ भर्त्ता म्रियते तदा तद्धनं अर्ज्जिकायामेव प
र्य्यवस्यति तदा तत्स्त्रीधनाधिकारिभिर्ग्राह्यं आदौ भार्य्यापरमे तद्धनं भर्तृमात्रस्वामिकं भवतीति
तदुत्तराधिकारिभिरेव ग्राह्यं जीवद्विभागे तु पतिपत्नीविभागवादिमते ताभ्यां विभक्तव्यं न पुत्रास्तदं
शं प्राप्नुवंतिवचनाभावात् एतच्च स्वार्ज्जितधनेमुनिभिर्व्यवस्थान्तरालिखनात् भर्तृस्वाम्यलिख
नात् पुत्रार्ज्जितधनेपितापुत्रयोर्भागदर्शनाच्च व्यवसीयते इतिकेचित् जीमूतवाहनस्मार्त्ता
दिमते तु सधवयार्ज्जितेपि पत्न्याएवस्वामित्वं किंतु सति पत्यौ न स्वातंत्र्यं त्रयएवाधनाः स्मृताः इति
मनुवचने अप्राशस्त्यं नञर्थः तथा च अप्रशस्तधनाः अप्रशस्तत्वं च स्वातंत्र्याभावादेव एवं च
तद्धनेपि स्त्रीधनाधिकारिणामेवाधिकारो भवतीति बोद्धव्यं एवं दुहितृसंक्रान्तपितृधनेपि तथा व
वतीत्यपि यद्यपि सुवचं तथापि जीमूतवाहनस्मार्त्ताभ्यां तत्र पितुरुत्तराधिकार्य्यधिकारस्यैव कथ
नान्नास्माभिस्तद्विविच्यते इत्यवधेयं अथस्वसंक्रान्तं मातृस्त्रीधनं दुहिता स्वेच्छया यस्मै कस्मै
चित् दद्यात्तदुपरमे पि दुहितृजामात्रादिरपि प्राप्नुयात् न च पुंधनवत् स्त्रीधनेपि दुहितुर्यावि
ज्जीवं भोगएवानुमतः इति वाच्यं जीमूतवाहनेनालिखनात् युक्त्यभावाच्च इत्यवधेयं ॥ ० ॥ प
रिच्छेदातीताखिलविद्याधारापरिशीलनविमलीकृतपालधिकुलप्रसूतजाह्नवीसमलंकृत
श्रीरुद्रतर्क[illegible]वागीशभट्टाचार्य्यात्मजजगन्नाथतर्कपंचाननकृते विवादभंगार्णवे पंच
मे दायभागद्वीपेऽतिशोभान्वितेन्द्रनीलरत्ननवमं ॥ ० ॥ समाप्तोऽयं पंचमद्वीपः ॥ ० ॥ इति ॥
मितिचैत्रकृष्णअष्टम्यां ॥ ० ॥ संख्याग्रंथ ॥ २४०० ॥ शुभंभूयात् ॥ ० ॥ संवत् ॥ १९ ॥ ९६ ॥ १ ॥ ० ॥

९५२
६९